CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.J.P.B.

Coll. No. 669

Title Mahābhārata-
Udyogaparva &
Bhāratārthapradīpikā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 869. Subject: ~~Purāṇic lit~~ Kāvya

Title: Mahābhārata Udyoga parva. & Bhāratārthapradīpikā

Author: Vedavyāsa & Arjunamiśra Scribe: —

Date of the work: — Date of the Ms.: V.S. १९३२.

Place of the work: — Place of the Ms.: —

Size: 13.5" by 5.5" Extent: 309 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

नारायणस्य विशारदः महर्षेस्तस्याव सारतत्त्वाख्या ॥ व्याकुलयन्तस्तु तेनो सारतत्त्व वार्य मर्वज्ञः ॥ गुरूपदेशमं ... आख्यां श्रुत्वा रत्न ॥ ना रत्नार्थक ... गोयसुद्योग ...
रूप्यते ॥ इदं सर्वलिंगु वीर्यो ... ग ... कुरूप ... तस्य ... व सु द्योगपर्वक्रिगु नीयमा नस्य ॥ विदर्पण
तुनपा य वला स ॥ सतो वचस्या ... तस्य सकल संपा ... हेतुः कलाम ... तीति ... वाक्य ... कुरव्याय पदार्थो च व्याख्या येवाधिगत

॥श्री॥ ॐ नमः श्रीगुरुगोपालगौरीगणपतिभ्यः॥ ॥लक्ष्मीभर्तुः ... पदकमलयुवः केशिरोमा च दंडाकृ ...
इदं यच्चक्ररहरविटपि श्रीगुरुः ... कान्तास्वर्भर्तुः ... कल्पद्रुमत्न वनाकेलिहिंदोलदण्डा ... याहका ... गुणं
यं यमनियमनुतं दुःखनिर्वाणवृक्ष॥ ॥धर्मार्थकामा ... फलसारमनोहरं। उद्योगपर्व ... कानीनकुल
... नमः॥ उद्योगोद्यमाबाधस्य ... वडवमरीचय॥ ... दुर्योधनवंशो ... महत् ... ॥ कृत्वा विवाहमित्यादेरस्या
... यत्रेदं ... तस्य नेवत्वं ... तीर्थयात्रादिभिः ... समग्री ... मस्य ... कुरुनस्य देवा ... विवाह ...

॥श्री॥ ॐ नमः श्रीगुरुगोपालगौरीगणपतिभ्यः॥ ॥नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो
जयमुदीरयेत्॥ ॥वैशंपायन उवाच॥ ॥कृत्वा विवाहं तु कुरुप्रवीरास्तदाभिमन्योर्मुदिताः सपक्षाः। विश्रम्य च
त्वार्युषसः प्रतीताः सभां विराटस्य ततोऽभिजग्मुः॥

मयी ... ह्रस्व ... रश्च तिस्रः पाण्डुपनादिविवाहस्य ... तिहा ... सामग्री ... त्वसंपत्त्या बलवत्त्वेन बकुविधा ... नाहं सामग्रीहीना ... संध्यादिगतरात्मा ... विरोधयुद्धोगमात्र ... नेतिवत्स्य ... कृतनामंद पर्वीकृत्वा विवाहमित्यादेः कृष्णेगांडीवधन्वनित्यं ... युधिष्ठिरेणकिं करणीयमिति विचारस्ता ... चत्वारि दिनानीति शेषः ॥ उषसः प्रभाताः प्रतीताः प्रहृष्टाः ॥ ... समा ... दिवस्याप ... सत्सा
मा सर्वार्थसिद्धो रंडोन कार्यमिति ॥ राज्ञां संचरणस्य चात्यंतमादिपुरुषसंश्रयेण ॥ विनिस्तरी ... विश्वरूपत्व ... धर्म ... नापेक्ष्या
विद्यास्या ... एवं ... उद्योग ... दोषप्रशमनविधिरिति ॥ नकुपपातस्य च परदारधापनेन ... पायमानत्वामे ... एवं ... पिपुरोहि

विस्तुमा ... लवच ... धर्मिरा ॥ तत्रापि यायातस्या ... निमानतिहा ॥ दान ... धर्मपालन ... महत्स्य ... तत्त्वं ... ॥ वि
... जगत वासुदेव ... विरुवास ... संकृता ... कर्णोपि ... वादस्मब
मणिशिः प्रवेकः ॥ आयनासनो दिखान विन्नागोपस्था ॥ अविद्या ... मिति निर्धारणे षष्ठी ॥ न क्रियापदं वक्ष्यमाणत्वात्क्रि

सभा तु सा मत्स्यपतेः समृद्धा मणिप्रवेकोत्तमरत्नचित्रा। न्यस्तासना माल्यवती सुगन्धा तामभ्ययुस्ते नरराजवर्याः॥ अथा
सनान्याविशतां पुरस्तादुभौ विराटद्रुपदौ नरेन्द्रौ। वृद्धाश्च मान्याः पृथिवीपतीनां पितामहो रामजनार्दनौ च॥ पाञ्चाल
राजस्य समीपतस्तु शिनिप्रवीरः सहरौहिणेयः। मत्स्यस्य राज्ञस्तु सुसन्निकृष्टौ जनार्दनश्चैव युधिष्ठिरश्च॥ सुताश्च सर्वे
द्रुपदस्य राज्ञो भीमार्जुनौ माद्रवतीसुतौ च। प्रद्युम्नसाम्बौ च युधि प्रवीरौ विराटपुत्रैश्च सहाभिमन्युः॥ सर्वे च शूरा
पितृभिः समाना वीर्येण रूपेण तथा बलेन। उपाविशन्द्रौपदेयाः कुमाराः सुवर्णचित्रेषु वरासनेषु॥ ततोपविष्टे
षु महारथेषु विभ्राजमानाम्बरभूषणेषु। रराज सा राजवती समृद्धा ग्रहैरिव द्यौर्विमलैरुपेता॥ ततः कथास्ते सम
वाययुक्ताः कृत्वा विचित्राः पुरुषप्रवीराः। तस्थुर्मुहूर्तं परिचिन्तयन्तः कृष्णं नृपास्ते समुदीक्षमाणाः॥ कथान्तमासा
द्य च माधवेन संघट्टिताः पाण्डवकार्यहेतोः। ते राजसिंहाः सहिता ह्यशृण्वन्वाक्यं महार्थं च महोदयं च॥ ॥कृ
ष्ण उवाच॥ ॥सर्वैर्भवद्भिर्विदितं यथायं युधिष्ठिरः सौबलेनाक्षवत्याम्। जितो निकृत्यापहृतं च राज्यं पुनः प्रवासे सम
यः कृतश्च॥

यायाः ॥ पितामहो वसुदेवपिता शूरः ॥ सुसन्निकृष्टे समीपे ॥ समवाये समाजे ॥ युक्ताः उचिताः ॥ दासमाणाः प्रतीक्षमाणाः ॥
संघट्टिताः प्रेरिताः ॥ महार्थं महाविषयां महोदयं महाफलं ॥

विश्वासमत्रं न शोक कर्तव्य इति ... कर्णस्कंती संवादस्यापि नित्या गोन कर्तव्य इति ॥ अ
निनिर्याणोत्कृष्ट पणरयाति ... संख्यानां ... नास्योपदेशः ॥ अतो पाख्यानस्य ... कुरूप ... लिङ्गेन मानतीय ... इत्यादि ॥ कृत्वा विवाहं तु कुरुप्रवीरा

उद्योग

सकोरयोपषांतमसारथ्यावाराइति वाचतुाारास्परयो पिद्विांकरणायइतिनमस्तः॥उयरूपंमताय नञ्चाामहोयःअन्यनाशकचात्सुकलोकापिरुद्धःप

सत्येस्थितिंसत्यवादिनिः॥सत्यास्थेतिरष्टाध्येतिारपराइयेनरपिनोलद्धंयंतेरथिस्त्वंसत्यमितियावत्।उग्रकृपतितासच्च फलमाकुः॥महोगइत्यासन्नमकल्मुषतामाद्यत्तुच्छ्रूयेते घातुसिंबन्ा।नृशाहोमकर्मकत्वान्महीयतित्वांमत्तेर्थय

शाकेर्विजतंनरसामहींचसत्येस्थितिः॥सत्यरायपुपायादरंउतिलकुतमुग्रकृद्वर्षाणिघङ्ख्यचकीर्ममिग्रः॥त्रयो दशोंचिवस्तुडस्तरोयमज्ञायमानैश्चरितंसमनीयो।केशानुसह्याग्निविधाश्चदुङ्खिस्तीर्गोमिहः॥ङ्गःस्वकलेनराजनू॥एवंगतेधर्मसुतस्यराज्ञोदुर्योधनस्यापिचपद्धितंस्यात्॥तच्चितयध्वंकुरुपांडवानांधर्म्यचयुक्तंचयशस्करंचा॥अधर्मयुक्तंनचकामयेतराज्यंसुराणामपिधर्मराजः॥धर्मार्थयुक्तंचमहीपतित्वंग्रामेपिकस्मिंश्चिदयंबुभूषेत॥पित्र्यंहिराज्यंविदितंनृपाणांयथायकर्षधृतराष्ट्रपुत्रैः॥मिथ्येनघोरणतयाऽनेनकृच्छ्रंमहत्प्राप्तमसह्यरूपं॥नचापियाहोविजिनोरणातैःस्वतेजसाधृतराष्ट्रस्यपुत्रैः॥तथापिराजासहितःसुहृद्भिरभीप्सतेनामयमेवतेषां॥यत्तत्स्वयंपांडुसुतैर्विजित्यसमाहृतंभूमिपतीन्निपीड्य॥तन्न्याय्यंचतेकुरुमुख्यवीराःकुंतीसुतामाद्रवतीसुतौ च॥बालास्त्विमेतैर्विविधैरुपायैःसंप्रार्थिताहंतुममित्रसाहाः॥राज्यंजिहीर्षद्भिरसद्भिरुग्रैःसर्वंचतद्वोविदितंयथावत्॥तेषांचलोभंप्रसमीक्ष्यवृद्धंधर्मात्मतांचापियुधिष्ठिरस्य॥संबंधितांचापिसमीक्ष्यतेषांमतिंकुरुध्वंसहिताःपृथक्का॥इमेचसत्येनिरताःसदैवक्रोधंतुप्रैतेषमवित्तुमित्वेत्तामहिपतित्वमितिस्यार्थेनदिव्निःअनामयंकुशलंतैसौयाविजनध्टिाहे॥संप्रार्थिताहृष्टा॥अमित्रसाहाःशत्रुरनतिक्रमसीया॥ दायतिवंवत्स्वमेतप्रावृमित्वेत्॥तुथ॥मांससकम

पारयित्वासमयंनियमंसमाप्यअतोस्याःकालाहृईयथेतात्वाद्देद्युर्द्धेननदेनोपिनारसबांधवारहृस्तुः॥ वासुदेव वाक्यं॥

पारयित्वासमाप्यसमयंचनवासंगतं॥अनकालाद्दृष्ट्वाविस्रज्यद्युनेहारयित्वा॥सम्यक्पष्टंतेयुवंचनाहीनेषु॥इत्यां तेयारयित्वासमयंयथावत्॥अतोन्यथानिरुपरच्युमाणाहन्युःसमेतान्धृतराष्ट्रपुत्रान्॥तेविप्रकारंवनिरार्य राज्ञःसुहृज्जनास्तान्परियालयेरन्॥युद्धेनबाधेयुरिमांस्तथैवतेर्वध्यमानायुधितांश्चहन्युः॥तथापितेमल्पतयासमर्था स्तेषांजयायेतिनवेन्मतंमे॥समेत्यसर्वेसहिताःसुहृद्भिस्तेषांविनाशाययतन्तुरेव॥दुर्योधनस्यापिमतंयथावन्नज्ञाय तेकिंनुकरिष्यतीति॥अज्ञायमानेचमतेपरस्यकिंस्यात्समारभ्यतमंमतंवः॥तस्मादितोगच्छतुधर्मशीलःशुचिःकुलीनः पुरुषोऽप्रमत्तः॥दूतःसमर्थःप्रशमायतेषांराज्यार्धदानायुधिष्ठिरस्य॥निशम्यवाक्यंतुजनार्दनस्यधर्मार्थयुक्तंमधु रंसमंच॥समाददेवाक्यमथाग्रजोस्यसंपूज्यवाक्यंतदतीवराजन्॥ ॥इतिमहाभारतेउद्योगपर्वणि॥ ॥बलदेवउवाच॥ श्रुतंभवद्भिर्गदपूर्वजस्यवाक्यंयथाधर्मवदर्थवच्च॥अजातशत्रोश्चहितंचदुर्योधनस्यापितथैवराज्ञः॥अर्धंहिराज्य स्यविसृज्यवीराःकुंतीसुतास्तस्यकृतेयतंते॥प्रदायचार्धंधृतराष्ट्रपुत्रःसुखीसहास्माभिरतीवमोदेत्॥लब्ध्वाहिराज्यंपुरुष प्रवीराःसम्यक्प्रवृत्तेष्वपरेषुचैव॥ध्रुवंप्रशांताःसुखमाविशेयुस्तेषांप्रशांतिश्चहितंप्रजानां॥दुर्योधनस्यापिमतंचवे त्तुंवक्तुंचवाक्यानियुधिष्ठिरस्य॥प्रियंममस्याद्यदितत्रकश्चिद्व्रजेच्छमार्थंकुरुपांडवानां॥सभीष्ममामंत्र्यकुरुप्रवीरं वैचित्रवीर्यंचमहानुभावं॥द्रोणंसपुत्रंविदुरंकृपंचगांधारराजंचससूतपुत्रं।

तानिवीराणकोयाग्नव सुहृद्भिरस्मादृशैश्चिन्तिः॥अर्धराज्यस्यविस्रज्यद्युनेनहारयित्वानिमोतेदःसप्रधानंयेषां॥

उद्योग

वाक्यं॥ ॥यादृशश्चात्माधर्मिष्ठो पापिष्ठो वा स: दृष्टान्तवता॥

सुखं विद्याकालोर्थ्यरूपान्यांहृष्टाः।श्रेदाप्तु ते कालहृष्टाः।गतेषु दुर्योधनादीनेतदा शिनयुरं समागतेषु मिलितेषु संगतेषु संसदि समागतेषु।सर्वा
निगमोनिष्ठयः।यथास्वकेषु स्वधर्ममनतिक्रम्य।श्रुतकाले हृष्टाः विद्याव्यासहृष्टाः।गतेषु ग्रामेषु समागतेषु अन्योन्यमिलितेषु।संगान
सुन्नमिकृतादितना व मिलितेषु।सर्वा स्ववस्था सु।बाल्यमारभ्यात्ययं यावत्॥ तेन द्यूतार्थेन।कौद्यात्।कपटात्।तैः।शकुनिप्र

मर्दिचयेन्ये धृतराष्ट्रपुत्रा बलप्रधना निगमप्रधनताः॥ स्थितास्वधर्मेषु यथास्वकेषु लोकप्रवीराः श्रुतकालहृष्टाः।एतेषु सर्वेषु समागतेषु
पौरेषु हृष्टेषु च संगतेषु।ब्रवीतु वाक्यं प्रणिपातयुक्तं कुंतीसुतस्यार्थकरं यथास्यात्॥ सर्वस्ववस्था सुचातनकौद्यात् प्रसोदिसोर्थाव
लमाश्रितिस्तैः प्रियात्मणेनेच युधिष्ठिरस्य हृतं प्रमत्तस्य कुरुतस्य राज्यं।निवार्यमाणश्च कुरुप्रवीरैः सर्वैः सुहृद्भिर्ह्ययमप्यतज्ज्ञः॥ गांधार
राजस्य सुतेमताक्षं समाह्वयाहविजमाजमीढः।दुरोदरास्तत्र सहस्रशोन्ये युधिष्ठिरो यान्विषहेत जेतुं।उत्सृज्य तान्सौबलमेव चायं स
माह्वयत्तत्र जितोत्रवत्सः।मदीव्यमानं प्रतिदीव्य चैनं महेषु नित्यं परुषा सुखेषु।संरंभमाणो विजितः प्रसह्य तत्रापराधः शकुनेर्न
कश्चित्।तस्मात्प्रणम्यैव वचो ब्रवीतु वैचित्रवीर्यं बहुसामयुक्तं।तथा हि शक्यो धृतराष्ट्रपुत्रः स्वार्थे नियोक्तुं पुरुषेण तेन॥
वैशंपायन उवाच॥ ॥एवं ब्रुवत्येव मधुप्रवीरे शिनिप्रवीरः सहसोत्पपात।तच्चापि वाक्यं परिनिंद्य तस्य समाददे वाक्यमिदं स
मन्युः॥ इति महाभारते उद्योगपर्वणि॥ ॥सात्यकिरुवाच॥ यादृशः पुरुषस्यात्मा तादृशं संप्रभाषते।यथारूपोंतरात्मा
ते तथारूपं प्रभाषसे॥

निनिः करणं सते।प्रियमित्येवाल्पपेतश्चांगारुलेन गुत्रशनिवलेन।नियंत्रपरासु खेषु।संरंभमाणाः कम्प्यत।अपि
संभावनीया।उत्पपात उत्थितः॥ ॥ स्ववस्था सुसर्वकालं ते दुर्योधनादयः॥ न कौद्यात् न कौटिल्यात्।नवतां प्रसिद्धस्तु निशेषः।कौटिल्या
भावस्तेजस्वीत्युक्तो हीति।प्रियात्सु प्रगतमं मत्ता युधिष्ठिरेण हृतात समत्तस्य सकस्य नियंत्रपरुषु सुखेषु प्रतिपत्स्वसुखेषु।संरंभमाणः कु

विदं॥ मयव्ययौ बहुकुशलमिति च निश्चिया॥ बलादेव

३

फलाफलवतीति सुयोसुल्गुगल्यादिनापूर्वसव स्रीकिंतु वितर्के तेषां श्रुत्वा परं वस्तु।
फलाफलवती।इत्यत्र यकारस्थाने ईकारश्छांदसः॥ लांगलध्वजेति तिदंगर्गर्न संबोधनं।किमित्याहे यो यदं यदसात्वमयि नचराज्यं

संति विपुरुषाः शूराः संति कापुरुषास्तथा।उभावेतौ दृढौ पक्षौ दृश्येते पुरुषान्प्रति।एकस्मिन्नेव जायेते कुले क्लीबमहाबलौ।
फलाफलवती शाखे यथैकस्मिन्वनस्पतौ।नाभ्यसूयामि ते वाक्यं ब्रुवतो लांगलध्वज।ये च शृण्वंति ते वाक्यं तानसूयामि माध
व।कथं हि धर्मराजस्य दोषमल्पमपि ब्रुवन्।लभते परिषन्मध्ये व्याहर्तुमकुतोभयः।समाहूय महात्मानं जितवंतोक्षकोवि
दः।अनक्षज्ञं यथाश्रद्धं तेषु धर्मजयः कुतः।यदि कुंतीसुतं गेहे क्रीडंतं भ्रातृभिः सह।अभिगम्य जयेयुस्ते तत्तेषां धर्मतो भवेत्
।समाहूय तु कौंतेयं क्षत्रधर्मरतं सदा।निकृत्या जितवंतस्ते किं नु तेषां परं शुभं।कथं प्रणिपतेच्चायमिह कृत्वा पणं परं।वनवा
साद्विमुक्तस्तु प्राप्तः पैतामहं पदं।यद्ययं परवित्तानि कामयीत युधिष्ठिरः।एवमप्ययमत्यर्थं परान्नार्हति याचितुं।कथं च धर्म
युक्तास्ते न च राज्यं जिहीर्षवः।निवृत्तवासान्कौंतेयानाहुर्विदिता इति।अनुनीता हि भीष्मेण द्रोणेन च महात्मना।नव्यवस्य
ति पांडुनां प्रदातुं पैतृकं वसु।अहं तु तांछितैर्बाणैरनुनीय रणे बलात्।पादयोः पातयिष्यामि कौंतेयस्य महात्मनः।अथ ते न
व्यवस्यंति प्रणिपाताय धीमतः।गमिष्यंति सहामात्या यमस्य सदनं प्रति।नहि ते युयुधानस्य संरब्धस्य युयुत्सतः।वेगं सम
र्थाः संवोढुं वज्रस्येव महीधराः।को हि गांडीवधन्वानं कश्चक्रायुधमाहवे।मां चापि विषहेत्को नु कश्च भीमं दुरासदं।यमौ च दृढ

चिकीर्षवः।कथमित्यन्वयः॥

कार्प्ण्याद्धनलोभात्।।इदनत्रअक्लीबत्वाद्।। कार्प्ण्याद्दुर्योधनस्यकार्यात्लक्ष्यतेननलोभाद्।।

उद्योग

धन्वानौयमकालोयमद्युतीं।।कोद्विजोविषुरामादेहष्ट्युम्नंचयार्थितं।।पंचेमान्पांडवेयांश्चद्रौपद्याःकीर्त्तिवर्द्धनान्।।समप्रमाणा
न्पांडूनांसमवीर्यान्मदोत्कटान्।।सौभद्रंचमहेष्वासममरैरपिदुःसहं।।गदप्रद्युम्नसांबांश्चकालवज्रानलोपमान्।।तेवयंधृतराष्ट्र
स्यपुत्रंशकुनिनासह।।कर्णेनचनिहत्याजावभिषेक्ष्यामपांडवं।।नाधर्मोविद्यतेकश्चिच्छत्रून्हत्वाततायिनः।।अधर्म्ममयशस्यं
चशात्रवाणांप्रयाचनं।।हृद्गतस्तस्ययःकामस्तंकुरुध्वमतंद्रिताः।।विसृष्टंधृतराष्ट्रेणराज्यंप्राप्नोतुपांडवः।।अद्यपांडुसुतोराज्यं
लभतांवायुधिष्ठिरः।।निहतावारणेसर्वेशेष्यंतेवसुधातले।। ।।महाभारतेचिशतउद्योगपर्वणि।। ।।द्रुपदउवाच।। ।।एवमेतन्म
हाबाहोभविष्यतिनसंशयः।।नहिदुर्योधनोराज्यंमधुरेणप्रदास्यति।।अनुवर्त्स्यतितंचापिधृतराष्ट्रःसुतप्रियः।।भीष्मद्रोणौचकार्प
ण्यान्मौर्ख्याद्राधेयसौबलौ।।बलदेवस्यवाक्यंतुममज्ञानेनयुज्यते।।एतद्धिपुरुषेणाग्रेकार्यंसुनयमिच्छता।।नतुवाच्योमृदुवचो
धार्त्तराष्ट्रःकथंचन।।नहिमार्द्दवसाध्योसौपापबुद्धिर्मतोमम।।मार्द्दवंगर्द्दभेकुर्यात्गोषुतीक्ष्णंसमाचरेत्।।मृदुदुर्योधनेवाक्यंयोब्रूया
त्पापचेतसि।।मृदुवैमन्यतेपापोभाष्यमाणमशक्तिजं।।जितमर्थंविजानीयादबुधोमार्द्दवेसति।।एतच्चैवकरिष्यामोयत्नश्चक्रियतामि
ह।।प्रस्थापयाममित्रेभ्योबलान्युद्योजयंतुनः।।शल्यस्यधृष्टकेतोश्चजयत्सेनस्यचाविभो।।कैकेयानांचसर्वेषांदूताशंवतुशीघ्रगाः।। ४

अमितवतीत्यभिद्रः।।

सचदुर्योधनोनूनंप्रेषयिष्यतिसर्वशः।।पूर्वाभिपन्नाःसंतश्चभजंतेपूर्वचोदकं।।तत्त्वरध्वंनरेंद्राणांपूर्वमेवप्रचोदने।।महद्धि
कार्यंवोढव्यमितिमेवर्त्ततेमतिः।।शल्यस्यप्रेष्यतांशीघ्रंयेचतस्यानुगानृपाः।।भगदत्तायराज्ञेचपूर्वसागरवासिने।।अमितौज
सेतथोग्रायहार्दिक्यायांधकायच।।दीर्घप्रज्ञायशूरायरोचमानायचाभिभो।।आनीयतांबृहंतश्चसेनाबिंदुश्चपार्थिवः।।सेन
जित्प्रतिविंध्यश्चचित्रवर्म्मासुवास्तुकः।।बाह्लीकोमुंजकेशश्चचैद्याधिपतिरेवच।।सुपार्श्वश्चसुबाहुश्चपौरवश्चमहारथ
ःशकानांपह्लवानांचदरदानांचयेनृपाः।।कांबोजाऋषिकायेचपश्चिमानूपकाश्चये।।जयत्सेनश्चकाश्यश्चतथापंचनदानृ
पाः।।क्राथपुत्रश्चदुर्द्धर्षःपार्वतीयाश्चयेनृपाः।।जानकिश्चसुशर्म्माचमणिमान्योतिमत्स्यकः।।पांसुराष्ट्राधिपश्चैवधृष्टकेतुश्चवी
र्यवान्।।तुंडदंडधारश्चबृहत्क्षेत्रश्चवीर्यवान्।।अपराजितोनिषादश्चश्रेणिमान्वसुमानपि।।बृहद्बलोमहौजाश्चबाहुःपरपु
रंजयः।।समुद्रसेनोराजाचसहपुत्रेणवीर्यवान्।।अदारिश्चनदीजश्चकर्णवेष्टश्चपार्थिवः।।समर्थश्चसुवीरश्चमार्जारःकन्य
कस्तथा।।महावीर्यःसुकदुश्चनिकुंभस्तुमुलःक्रथः।।नीलश्चवीरधर्माचभूमिपालश्चवीर्यवान्।।दुर्जयोदंतवक्रश्चरुक्मी
चजनमेजयः।।आषाढोवायुवेगश्चपूर्वपालीचपार्थिवः।।भूरितेजादेवकश्चएकलव्यःमहाद्युतेः।।कारुषश्चतथाराजाक्षेमधू

गी

संबंधकं संबंधः एतां वाच्युर्योधनेन दुहितादत्तेतिकौरवैः सहसंबंधः॥ कुंतीपितृष्वसेत्यस्माकमितियादवैः सहसंबंधः॥ संबंधेतरं सां

उद्योग त्रिस्यवीर्यबाहुरुचरः क्षेमकश्चैव वाटधानस्यपार्थिवः॥ श्रुतायुश्च दृढायुश्च शाल्वपुत्रश्च वीर्यवान्॥ कुमारश्च कलिंगानामीश्व
रो युद्धदुर्मदः॥ एते चान्ये च बहवस्तां शीघ्रमेतद्धि मम रोचते॥ अयं च ब्राह्मणो विद्वान्मम राजन्पुरोहितः॥ प्रेष्यतां धृतराष्ट्राय वाक्यम
स्मिन्समर्प्यतां॥ यथा दुर्योधनो वाच्यो यथा शांतनवो नृपः॥ धृतराष्ट्रो यथा वाच्यो द्रोणश्च रथिनां वरः॥ ॥महाभारते उद्योगप
र्वणि॥ ॥वासुदेव उवाच॥ ॥उपपन्नमिदं वाक्यं सोमकानां धुरंधरे॥ अर्थसिद्धिकरं राज्ञः पांडवस्यामितौजसः॥ एतच्च पूर्व
कार्यं नः सुनीतमभिकांक्षतां॥ अन्यथा ह्याचरन्कर्म पुरुषः स्यात्सुबालिशः॥ किंतु संबंधकं तुल्यमस्माकं कुरुपांडुषु॥ य
थेष्टं वर्तमानेषु पांडवेषु च तेषु च॥ ते विवाहार्थमानीता वयं सर्वे तथा भवान्॥ कृते विवाहे मुदिता गमिष्यामो गृहान्प्रति॥
भवान्वृद्धतमो राज्ञां वयसा च श्रुतेन च॥ शिष्यवत्ते वयं सर्वे भवामेह न संशयः॥ भवंतं धृतराष्ट्रश्च सततं बहु मन्यते॥ आचा
र्ययोः सखा चासि द्रोणस्य च कृपस्य च॥ स भवान्प्रेषयत्वद्य पांडवार्थकरं वचः॥ सर्वेषां निश्चितं तन्नः प्रेषयिष्यति यद्भवान्॥
राम यदि तावच्छमं कुर्यान्न्यायेन कुरुपुंगवः॥ न भवेत्कुरुपांडूनां सौभ्रात्रेण महान्क्षयः॥ अथ दर्पान्वितो मोहान्न कुर्याद्धृ
तराष्ट्रजः॥ अन्येषां प्रेषयित्वा च पश्चादस्मासु माकुधः॥ ततो दुर्योधनो मंदः सहामात्यः सबांधवः॥ निष्ठामापत्स्यते मूढः
क्रुद्धे गांडीवधन्वनि॥ ॥वैशंपायन उवाच॥ ॥ ५

संबंधकमितिवाच्या ४॥ ततः परस्परं वेति॥ निष्ठां नाशं॥

ततः सत्कृत्येत्यादेर्गंतागसाक्षयमित्यंतस्य राज्यदानेन युधिष्ठिरस्य प्रीतिमाविनीयेति तात्पर्यार्थः॥ भवंतीति भ
नानि स्थावरजंगमानि॥ प्राणिनां जंगमाः॥ बुद्धिजीविनां बुद्धिमुपजीव्य जीवंति॥ बुद्धराधिक्यगुणेन प्राणिनः॥

ततः सत्कृत्य वार्ष्णेयं विराटः पृथिवीपतिः॥ गृहान्प्रेषयामास सगणं सहबांधवं॥ द्वारकां तु गते कृष्णे युधिष्ठिरपुरो
गमाः॥ चक्रुः सांग्रामिकं सर्वं विराटश्च महीपतिः॥ ततः संप्रेषयामास विराटः सह बांधवैः॥ सर्वेषां भूमिपानां भूमिपाला
नां द्रुपदश्च महीपतिः॥ वचनात्कुरुसिंहानां मत्स्यपांचालयोश्च ते॥ समाजग्मुर्महीपालाः संहृष्टा महाबलाः॥ तच्छु
त्वा पांडुपुत्राणां समागच्छन्महद्बलं॥ धृतराष्ट्रसुताश्चापि समानिन्युर्महीपतीन्॥ समाकुला मही राजन्कुरुपांडव
नत कारणात्॥ समभवत्कृत्स्ना संप्रयाणे महीक्षितां॥ संकुला च तदा भूमिश्चतुरंगबलान्विता॥ बलानि तेषां वीराणामागच्छ ८
४५॥ न्ततस्ततः॥ चालयंतीव गां देवीं सपर्वतवनामिमां॥ ततः प्रज्ञावयोवृद्धं पांचाल्यः स्वपुरोहितं॥ कुरुभ्यः प्रेषयामास
युधिष्ठिरमते स्थितः॥ ॥महाभारते उद्योगपर्वणि॥ ॥द्रुपद उवाच॥ ॥भूतानां प्राणिनः श्रेष्ठा
ः प्राणिनां बुद्धिजीविनः॥ बुद्धिमत्सु नराः श्रेष्ठा नरेषु द्विजातयः॥ द्विजेषु वैद्याः श्रेयांसो वैद्येषु कृतबुद्ध
यः॥ कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः॥ स भवान्कृतबुद्धीनां प्रधान इति मे मतिः॥

श्रेष्ठा हितप्रदानाश्रुतरामतस्याः॥ द्विजातयो ब्राह्मणक्षत्रियवैश्याः॥ वैद्यास्त्रयीविद्यादिनाप्रवदरं॥ ब्राह्मणाः॥ कृतबुद्ध
यो विहितप्रतिषेधसंस्कृतबुद्धयः॥ कर्तारोऽनुष्ठातारः॥ ब्रह्मवादिनो ब्रह्मज्ञानिनः॥

शल्यायुद्धायोद्दमयाविया॥ अनघोऽनेनाः। विदितज्ञातेसति। आवर्तयिष्यति दुर्योधनमतादावर्तयिष्यति। एकाग्रक

उद्योग कुलेन च विशिष्टोसि वयमाचक्षतेन च। शल्याऽनवमस्थासि सुभक्ष्णां गिरसे न च। विदितं चापितसर्वं यथा वृत्तः म
कौरवः। पांडवस्य यथावृत्तः। कुंतीपुत्रो युधिष्ठिरः। धृतराष्ट्रस्य विदितं वेचिताः पांडवाः परेः। विदुरेणानुनीताः। पि
तृत्वमवानुवर्तीत। शक्रनिर्वृधिं सर्वं हि कुंतीपुत्रे समाकयत। अनेकं मताद्यः मनस्यद्यशान्तिः स्थितं स्थितिं। ततयावे
चयिवाउधर्मराजं युधिष्ठिरं। न कस्यांचिदवस्थायां राज्यदास्यतीति विस्मयः। तवास्तु धर्मसंयुक्तं धृतराष्ट्रस्य वचः। म
नांसितस्य योधानां क्रमनवमावर्तयिष्यति। विदुरस्थापितवाक्यं माधयिष्यति तावकं। भीष्मद्रोणकृपादीनां भेद
संजनयिष्यति। अमात्यसुचनिर्नेशुयोधेसु विदुरवेसु चाउतरकायकरणं। तथाकर्मनि विष्यति। एतस्मिन्नंत
रपायाः सुखमेकाग्रबुद्धयः। सेनाकर्म्म करिष्यंति द्रव्याणां चिवसंचयं। नि द्यमास्तसुच स्वस्तुलंबमा। ततथा
चयि। ततयातेकरिष्यंति सेनाकर्मेनसंशयः। एतः स्वयोजनं चात्र याधम्यनापलम्यता। संगत्या धृतराष्ट्र
कृष्याद्दिमयं वचस्य वा। सत्यवान्धर्मसंयुक्तं धर्मतिषुसमाचरत्। कृपालुस्तु परिक्लेशान्पांडवीयान्वृकोर्ते
यन्। हृदि ते कुरुधर्मचक्षुवत्प्रगर्वहृते स्थितं। विजिस्यतिमनांस्येषामितिसेनात्रसंशयः। न च तेभ्यो नयात सि ब्रा ६
ह्मणो ह्यसि यद्वदितु। हृतकर्मणि युक्तस्त्वं विरस्य विशांपतेः॥

रणासेकमत्तायाहूतं। लंबमानकुणलस्तु। सेनाकर्मसेनाद्योगं॥

जयेन जयनाम्ना॥ गतेद्वारवतीं कृष्णइत्यादेः यः सपंचालराजेन प्रेषितः कौरवान्प्रतीत्यं तस्य सेनाममवाद्यस्तान्त्यर्थिर्ध्दः। त्रिशि
रोवधोपाख्यानस्य चतपसित्थि तस्यापि वैरिणो वधस्तान्त्यर्थिः। इन्द्रवधोपाख्यानस्य तु अयन्नाविरिणो रधस्तान्त्यर्थिः

सवाणू पुष्पयोगेन कुरुन्वैनजयेन वा कौरवेयान्प्रयान्वा सु कौंतेयस्यार्थसिद्धये॥ ॥विशंपायन उवाच॥ ॥तथा
कृत्वाह्नः प्रयंथो द्रुपदेन महात्मना। पुरोधा हस्तं समं यत्नो नगरं नागसाह्वयं॥ ॥इत्युद्योगपर्वणि पुरोहितयाने॥ ॥वैशं
पायन उवाच॥ ॥पुरोहितं ते ते प्रस्थाप्य नगरं नागसाह्वयं। दूतान्प्रस्थापयामासुः पार्थिवेभ्यस्ततस्ततः। प्रस्थाप्य दू
तानन्यत्र द्वारकां पुरुषर्षभः। स्वयं जगाम कौरव्यः कुंतीपुत्रो धनंजयः। गते द्वारवतीं कृष्णे बलदेवे च माधवे। सह
वृष्ण्यंधकैः सर्वैः नीतिश्च शतशस्तथा। सर्वमागमयामास पांडवानां विचेष्टितं। धृतराष्ट्रात्मजो राजा दूतैः प्रणिहिते
श्चरैः। स श्रुत्वा माधवं जांतं सहस्त्रैर निलोपमैः। बलेन नातिमहता द्वारकामभ्ययात्पुरीं। तमेव दिवसं चापि कौंतेय
ः पांडुनंदनः। आनर्तनगरीं रम्यां जगामाशु धनंजयः। तौ यात्वा पुरुषव्याघ्रौ द्वारकां कुरुनंदनौ। सुप्तं ददृशतुः कृष्णं
शयानं चाभिजग्मतुः। ततः शयाने गोविंदे प्रविवेश सुयोधनः। उच्छीर्षतश्च कृष्णस्य निषसाद वरासने। ततः किरीटी त
स्यानु पश्चिवेश महामनाः॥

नकुशोपाख्यानस्य तस्य च नकुषवर्दस्य हृष्यसौर्हताः कौरवाहतिनात्पर्यार्थः। माधवो मधुरोत्तः। आगमयामासज्ञात
वान्। दूतैश्चैः। चारैश्चकैः। उच्छीर्षं तु प्रधानं।

पश्चार्द्धे याहीति। सद्यं महत्तां च। पूर्वसारिणः पूर्वाचारानुकारिणः॥ प्रवारणामभिपालनं। मत्संहननेशारीरं संस्कृतयोधिनो

उद्योग पश्चार्द्धे चैव कृष्णस्य स्थितो ऽतिष्ठत्कृताञ्जलिः। प्रतिबुद्धः स वार्ष्णेयो ददर्शाग्रे किरीटिनं। स तयोः स्वागतं कृत्वा यथावत्प्र
तिपूजितौ। तदागमनजं हेतुं पप्रच्छ मधुसूदनः॥ ततो दुर्योधनः कृष्णमुवाच प्रहसन्निव ततो दुर्योधनः कृष्णमुवाच प्र
हसन्निव। विग्रहे ऽस्मिन्भवान्साह्यं मम दातुमिहार्हति। समं हि भवतः सख्यं मयि चैवार्जुनेपि च। तथा संबंधकं तुल्य
मस्माकं त्वयि माधव। अहं चाभिगतः पूर्वं त्वामद्य मधुसूदन। पूर्वं चाभिगतं संतो भजंते पूर्वसारिणं। त्वं च श्रेष्ठतमो लो
के सतामद्य जनार्दन। सततं संमतश्चैव सद्वृत्तमनुपालय॥ ॥कृष्ण उवाच॥ ॥भवानभिगतः पूर्वमत्र मे नास्ति संश
यः। दृष्टस्तु प्रथमं राजन्मया पार्थो धनंजयः। तव पूर्वाभिगमनात्पूर्वं चाप्यस्य दर्शनात्। साहाय्यमुभयोरेव करिष्यामि
सुयोधन। प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः। तस्मात्प्रवारणं पूर्वमर्हः पार्थो धनंजयः। मत्संहननतुल्यानां गो प्र
पानामर्बुदं महत्। नारायणा इति ख्याताः सर्वे संस्कृतयोधिनः। ते वा युधि दुराधर्षा भवंत्वेकस्य सैनिकाः। अयुध्य
८ मानः संग्रामे न्यस्तशस्त्रो ऽहमेकतः। आभ्यामन्यतरं पार्थ यत्ते हृद्यतरं मतं। तद्वृणीतां भवानग्रे प्रवार्यस्त्वं हि
धर्मतः॥ ॥वैशंपायन उवाच॥ ॥एवमुक्तस्तु कृष्णेन कुंतीपुत्रो धनंजयः। अयुध्यमानं संग्रामे वरयामास केश १

गुरूपदेशसंस्कारेण युद्धशीलाः। प्रवार्यो निपालनीयाभिप्रायः॥

अपकृतं सुबहवास्वपक्षे न तु प्रवेशितं वा। निगृह्य पीडयित्वा।

वं। नारायणममित्रघ्नं कामाज्जातमजं नृषु। सर्वक्षत्रस्य पुरतो देवदानवयोरपि। दुर्योधनस्तु तत्सैन्यं सर्वमादाय पार्थिवः।
ततोभ्ययाद्भीमबलो रौहिणेयं महाबलः। सर्वं चागमने हेतुं स तस्मै संन्यवेदयत्। प्रत्युवाच ततः शौरिर्धार्तराष्ट्रमिदं व
चः॥ ॥बलदेव उवाच॥ ॥विदितं ते नरव्याघ्र सर्वं भवितुमर्हति। यन्मयोक्तं विराटस्य पुरा वैवाहिके तदा। निगृह्यो
क्तो हृषीकेशस्त्वदर्थं कुरुनंदन। मया संबंधकं तुल्यमिति राजन्पुनः पुनः। न च तद्वाक्यमुक्तं वै केशवः प्रत्यपद्यत॥
न चाहमुत्सहे कृष्णं विना स्थातुमपि क्षणं। नाहं सहायः पार्थानां नापि दुर्योधनस्य वै। इति मे निश्चिता बुद्धिर्वासुदेवम
वेक्ष्य ह। जातोसि भारते वंशे सर्वपार्थिवपूजिते। गच्छ युध्यस्व धर्मेण क्षात्रेण भरतर्षभ॥ ॥वैशंपायन उवाच॥ ॥इत्ये
वमुक्तस्तदा परिष्वज्य हलायुधं। कृष्णं चापकृतं ज्ञात्वा युद्धान्मेने जितं जयं। सोभ्ययात्कृतवर्माणं धृतराष्ट्रसुतो नृपः।
कृतवर्मा ददौ तस्य सेनामक्षौहिणीं तदा। स तेन सर्वसैन्येन भीमेन कुरुनंदनः। वृतः प्रतिययौ हृष्टः सुहृदः संप्रहर्षयन्।
ततः पीतांबरधरो जगत्स्रष्टा जनार्दनः। गते दुर्योधने कृष्णः किरीटिनमथाब्रवीत्। अयुध्यमानः कां बुद्धिमास्थायाहं वृत
स्त्वया॥ ॥अर्जुन उवाच॥ ॥भवान्समर्थस्तान्सर्वान्निहंतुं नात्र संशयः। निहंतुमहमप्येकः समर्थः पुरुषर्षभ। भवांस्तु की

स्पर्द्धयाअद्यमध्येकइत्येवं।अथअहंसादिःइवशब्दोवाक्यालंकारे।आनर्चपूजितवान्।

उद्योग र्तिमांल्लोकेतद्यशस्त्वांगमिष्यति।यशसाचाहमप्यर्थीतस्मादसिमयावृतः।सारथ्यंतुत्वयाकार्यमितिमेमानसंसदा।चिर
रात्रेप्सितंकार्यंतद्भवान्कर्त्तुमर्हति॥ ॥वासुदेवउवाच॥ ॥उपपन्नमिदंपार्थयत्स्पर्द्धेथामयासह।सारथ्यंतेकरिष्यामि
कामःसंपद्यतांतव॥ ॥वैशंपायनउवाच॥ ॥एवंप्रमुदितःपार्थःकृष्णेनसहितस्तदा।वृतोदाशार्हप्रवरैःपुनरायाद्युधि
ष्ठिरं॥ ॥इतिमहाभारतेउद्योगपर्वणि॥ ॥वैशंपायनउवाच॥ ॥शल्यःश्रुत्वातुदूतानांसैन्येनमहतावृतः।अभ्ययात्पां
डवान्राजन्सहपुत्रैर्महारथैः।तस्यसेनानिवेशोभूदध्यर्द्धमिवयोजनं।तथाहिविपुलांसेनांबिभर्त्तिसनरर्षभः।अक्षौ
हिणीपतीराजन्महावीर्यपराक्रमः।विचित्रकवचाःशूराविचित्रध्वजकार्मुकाः।विचित्राभरणाःसर्वेविचित्ररथवाह
नाः।विचित्रस्रग्धराःसर्वेविचित्रांबरभूषणाः।स्वदेशवेषाभरणावीराःशतसहस्रशः।तस्यसेनाप्रणेतारोबभूवुःक्षत्रि
यर्षभाः।व्यथयन्निवभूतानिकंपयन्निवमेदिनीं।शनैर्विश्रामयन्सेनांसययौयेनपांडवाः।ततोदुर्योधनःश्रुत्वामहासे
नंमहारथं।उपायांतमभिद्रुत्यस्वयमानर्चभारत।कारयामासपूजार्थंतस्यदुर्योधनःसभाः।रमणीयेषुदेशेषुरत्नचित्राःस्व
लंकृताः।शिल्पिभिर्विविधैश्चैवक्रीडास्तत्रप्रयोजिताः।तत्रमाल्यानिमांसानिभक्ष्यंपेयंचसत्कृतं।कूपाश्चविविधाकारा ८
मनोहर्षविवर्द्धनाः।वाप्यश्चविविधाकाराउदकानिगृहाणिच।सताःसभाःसमासाद्यपूज्यमानोयथामरः।दुर्योधनस्य

मोदनामारकाशिवा।पाठः॥

तुश्चे।

सचिवैर्देशेदेशेयथार्हतः।आजगामसभामन्यांदेवावसथवर्चसं।सतत्रविषयैर्युक्तःकल्याणैरतिमानुषैः।मेनेत्यधिक
मात्मानमवमेनेपुरंदरं।पप्रच्छाथततःप्रेष्यान्प्रहृष्टःक्षत्रियर्षभः।युधिष्ठिरस्यपुरुषाःकेत्रचक्रुःसभाइमाः।आनीयंतां
सभाकाराःप्रदानार्हाहिमेमताः।प्रसादमेषांदास्यामिकुंतीपुत्रोनुमन्यतां।दुर्योधनायतत्सर्वंकथयंतिस्मविस्मिताः।सं
प्रहृष्टोयदाशल्योदिदित्सुरपिजीवितं।गूढोदुर्योधनस्तत्रदर्शयामासमातुलं।तंदृष्ट्वामद्रराजस्तुज्ञात्वायत्नंचतस्यतं।प
रिष्वज्याब्रवीत्प्रीतइष्टोर्थोगृह्यतामिति॥ ॥दुर्योधनउवाच॥ ॥सत्यवाग्भवकल्याणवरोवैममदीयतां।सर्वसेनाप्रणे
तामेभवान्भवितुमर्हति॥ ॥वैशंपायनउवाच॥ ॥कृतमित्यब्रवीच्छल्यःकिमन्यत्क्रियतामिति।कृतमित्येवगांधारिः
प्रत्युवाचपुनःपुनः॥ ॥शल्यउवाच॥ ॥गच्छदुर्योधनपुरंस्वकमेवनरर्षभ।अहंगमिष्येद्रष्टुंवैयुधिष्ठिरमरिंदमं
।दृष्ट्वायुधिष्ठिरंराजन्क्षिप्रमेष्येजनाधिप।अवश्यंचापिद्रष्टव्यःपांडवःपुरुषर्षभः॥ ॥दुर्योधनउवाच॥ ॥क्षिप्रमाग
म्यतांराजन्पांडवंवीक्ष्यपार्थिव।त्वय्यधीनाःस्मराजेंद्रवरदानंस्मरस्वनः॥ ॥शल्यउवाच॥ ॥क्षिप्रमेष्यामिभद्रंतेग
च्छस्वस्वपुरंनृप।परिष्वज्यतदान्योन्यंशल्यदुर्योधनावुभौ।सतथाशल्यमामंत्र्यपुनरायात्स्वकंपुरं।शल्योजगामकौंतेयमाख्या ग।

उपप्लव्ये विराटनगरं। दुःखस्यैतस्य अंतं वै इति शेषः॥ अंते चित्तस्य बाधा॥ न च दुःखस्येति शेषः॥ अंते क्लेशावसाने। लोकतंत्रं च

उद्योग त्वं कर्म तस्य तदा। उपप्लव्यं स गत्वा तु स्कंधावारं प्रविश्य च। पांडवानथ तान्सर्वाञ्शल्यस्तत्र ददर्श ह। समेत्य च महाबाहुः शल्यः पां
डुसुतैस्तदा। पाद्यमर्घ्यं च गां चैव प्रत्यगृह्णाद्यथाविधि। ततः कुशलपूर्वं स मद्रराजोऽरिसूदनः। प्रीत्या परमया युक्तः समा
श्लिष्य युधिष्ठिरं। तथा भीमार्जुनौ हृष्टौ स्वस्रीयौ च यमावुभौ। आसने चोपविष्टस्तु शल्यः पार्थमुवाच ह। कुशलं राजशार्दू
ल कच्चित्ते कुरुनंदन। अरण्यवासाद्दिष्ट्यासि विमुक्तो जयतां वर। सुदुष्करं कृतं राजन्निर्जने वसता त्वया। भ्रातृभिः सह राजें
द्र कृष्णया चानया सह। अज्ञातवासं घोरं च वसता दुष्करं कृतं। दुःखमेव कुतः सौख्यं भ्रष्टराज्यस्य भारत। दुःखस्यैतस्य
महतो धार्तराष्ट्रकृतस्य वै। अवाप्स्यसि सुखं राजन्हत्वा शत्रून्परंतप। विदितं ते महाराज लोकतंत्रं नराधिप। तस्मा
त ल्लोभकृतं किंचित्तव तात न विद्यते। राजर्षीणां पुराणानां मार्गमन्विच्छ भारत। दाने तपसि सत्ये च भव तात युधिष्ठिर। क्ष
मा दमश्च सत्यं च अहिंसा च युधिष्ठिर। अद्भुतश्च पुनर्लोकस्त्वयि राजन्प्रतिष्ठितः। मृदुर्वदान्यो ब्रह्मण्यो दाता धर्मप
रायणः। धर्मास्ते विदिता राजन्बहवो लोकसाक्षिकाः। दिष्ट्या कृच्छ्रमिदं राजन्पारितं भरतर्षभ। दिष्ट्या पश्यामि रा
जेंद्र धर्मात्मानं सहानुगं। निस्तीर्णदुष्करं राजंस्त्वां धर्मनिचयं प्रभो॥ ॥वैशंपायन उवाच॥ ॥ततोऽस्याकथयद्रा १४

लोककारणं। अदृष्टं तस्माद्धर्मादेव न वर्ततीति निश्चयं च॥ ॥१॥

शुश्रूषितमाराधितं। सौतिः सूतपुत्रस्य। स्यमितं असमतामितं। समितं समम स्य संज्ञातमिति च। सुखोदर्कं सुखमेवोत्तरफलं यस्य॥

जनं दुर्योधनसमागमं। तच्च शुश्रूषितं सर्वं वरदानं च भारत॥ ॥युधिष्ठिर उवाच॥ ॥सुकृतं ते कृतं राजन्प्रहृष्टेनांतरात्मना। दुर्यो
धनस्य यद्वीर त्वया वाचा श्रुतं मम। एकं त्विच्छामि भद्रं ते क्रियमाणं महीपते। राजन्नकर्तव्यमपि कर्तुमर्हसि सत्तम। मम त्ववेक्ष
या वीर शृणु विज्ञापयामि ते। भवानिह महाराज वासुदेवसमो युधि। कर्णार्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम। कर्णस्य भवता कार्यं
सारथ्यं नात्र संशयः। तत्र पाल्योऽर्जुनो राजन्यदि मत्प्रियमिच्छसि। तेजोवधश्च ते कार्यः सौतेरस्मज्जयावहः। अकर्तव्यमपि ह्येत
त्कर्तुमर्हसि मातुल॥ ॥शल्य उवाच॥ ॥शृणु पांडव भद्रं ते यद्ब्रवीषि दुरात्मनः। तेजोवधनिमित्तं मां सूतपुत्रस्य संयुगे। अहं
तस्य भविष्यामि संग्रामे सारथिर्ध्रुवं। वासुदेवेन हि समं नित्यं मां स हि मन्यते। तस्याहं कुरुशार्दूल प्रतीपमहितं वचः। ध्रुवं सं
कथयिष्यामि योद्धुकामस्य संयुगे। यथा स हृतदर्पश्च हृततेजाश्च पांडव। भविष्यति सुखं हंतुं सत्यमेतद्ब्रवीमि ते। एवमेतत्क
रिष्यामि यथा तात त्वमात्थ मां। यच्चान्यदपि शक्ष्यामि तत्करिष्यामि ते प्रियं। यच्च दुःखं त्वया प्राप्तं द्यूते वै कृष्णया सह। परुषाणि च
वाक्यानि सूतपुत्रकृतानि वै। जटासुरात्परिक्लेशः कीचकाच्च महाद्युते। द्रौपद्याधिगतं सर्वं दमयंत्या यथाशुभं। सर्वं दुःखमिदं
वीर सुखोदर्कं भविष्यति। नात्र मन्युस्त्वया कार्यो विधिर्हि बलवत्तरः। दुःखानि हि महात्मानः प्राप्नुवंति युधिष्ठिर। देवैरपि हि

॥मन्युः शोकः॥

त्वष्टा प्रजापतिर्देवशिल्पिनोन्यः॥ धर्मेधर्मे निमित्तं॥ नपस्तुद्दत॥ हावैः शृंगारचेष्टितैः॥

उद्योग स्थानि शाश्वतानि लभनीयते। इंद्रेण श्रूयते राजन्सभार्येण महात्मना। अनुभूतं महद्दुःखं देवराजेन भारत॥ ॥महाभारते उद्योगपर्व
णि॥ ॥युधिष्ठिर उवाच॥ ॥कथमिंद्रेण राजेंद्र सभार्येण महात्मना। दुःखं प्राप्तं परं घोरमेतदिच्छामि वेदितुं॥ ॥शल्य उवाच॥ ॥शृणु
राजन्पुरावृत्तमितिहासं पुरातनं। सभार्येण यथा प्राप्तं दुःखमिंद्रेण भारत। त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः। स पुत्रं वै
त्रिशिरसमिंद्रद्रोहात्किलासृजत्। ऐंद्रं स प्रार्थयत्स्थानं विश्वरूपो महाद्युतिः॥ तैस्त्रिभिर्वदनैर्घोरैः सूर्येंदुज्वलनोपमैः। वे
दानेकेन सोधीते सुरामेकेन चापिबत्। एकेन च दिशः सर्वाः पिबन्निव निरीक्षते। स तपस्वी मृदुर्दांतो धर्मे तपसि चोद्य
तः। तपस्तस्य महत्तीव्रं सुदुश्चरमरिंदम। तस्य दृष्ट्वा तपोवीर्यं सत्वं चामिततेजसः। विषादमगमच्छक्र इंद्रोयं मा भवेदिति। क
थं सज्जेच्च भोगेषु न च तप्येन्महत्तपः। विवर्द्धमानस्त्रिशिराः सर्वं त्रिभुवनं ग्रसेत्। इति संचिंत्य बहुधा बुद्धिमान्भरतर्षभ। आज्ञा
पयत्सोप्सरसस्त्वष्टृपुत्रप्रलोभने। यथा स सज्जेत्त्रिशिराः कामभोगेषु वै भृशं। क्षिप्रं कुरुत गच्छध्वं प्रलोभयत माचिरं। शृंगार
हारैर्युक्ता वेषाः सुश्रोण्यो हारैर्युक्ता मनोहरैः। हावभावसमायुक्ताः सर्वाः सौंदर्यशोभिताः। प्रलोभयत भद्रं वः शमयध्वं भयं मम। अस्व
भावैः स्थं ह्यात्मनात्मानं लक्षयामि वरांगनाः। भयमेतन्महाघोरं क्षिप्रं नाशयताबलाः॥ ॥अप्सरस ऊचुः॥ ॥तथा यत्नं करिष्यामः श १७

अप्सरस
अंगेष्वांगिकेषु। सौष्ठवं संवासकृतः प्रहर्षः। सौष्ठवं शोभनवं वा। नतोसुहाना।

क्र तस्य प्रलोभने। यथा नावाप्स्यसि भयं तस्माद्बलनिषूदन। निर्दहन्निव चक्षुर्भ्यां योसावास्ते तपोनिधिः। तं प्रलोभयितुं देव
गच्छामः सहिता वयं। यतिष्यामो वशे कर्तुं व्यपनेतुं च ते भयं॥ ॥शल्य उवाच॥ ॥इंद्रेण तास्त्वनुज्ञाता जग्मुस्त्रिशिरसोंतिकं।
तत्र ता विविधैर्भावैर्लोभयंत्यो वरांगनाः। नित्यं संदर्शयामासुस्तथैवांगेषु सौष्ठवं। नाभ्यगच्छत्प्रहर्षं ताः संपश्यन्सुमहा
तपाः। इंद्रियाणि वशे कृत्वा पूर्णसागरसंनिभः। तास्तु यत्नं परं कृत्वा पुनः शक्रमुपस्थिताः। कृतांजलिपुटाः सर्वा देवराजम
थाब्रुवन्। न स शक्यः सुदुर्धर्षो धैर्याच्चालयितुं प्रभो। यत्ते कार्यं महाभाग क्रियतां तदनंतरं। संपूज्याप्सरसः शक्रो विसृज्य च महा
मतिः। चिंतयामास तस्यैव वधोपायं युधिष्ठिर। स तूष्णीं चिंतयन्वीरो देवराजः प्रतापवान्। विनिश्चितमतिर्धीमान्वधे त्रिशि
रसोभवत्। वज्रमस्य क्षिपाम्यद्य स क्षिप्रं न भविष्यति। शत्रुः प्रवृद्धो नोपेक्ष्यो दुर्बलोपि बलीयसा। शास्त्रबुद्ध्या विनिश्चित्य कृत्वा
बुद्धिं वधे दृढां। अथ वैश्वानरनिभं घोररूपं भयावहं। मुमोच वज्रं संक्रुद्धः शक्रस्त्रिशिरसं प्रति। स पपात हतस्तेन वज्रेण दृढमा
हतः। पर्वतस्येव शिखरं प्रणुन्नं मेदिनीतले। तं तु वज्रहतं दृष्ट्वा शयानमचलोपमं। न शर्म लेभे देवेंद्रो दीपितस्तस्य तेजसा। हतोपि दी
प्ततेजाः स जीवन्निव दृश्यते। घातितस्य शिरांस्याजौ जीवंतीवाद्भुतानि वै। ततोतिभीतरूपस्तु शक्र आस्ते विचारयन्। अथा

ज्वलितो लक्ष्मीकृत्या। तक्षाणं विश्वकर्माणं दृष्टमानं दर्शयंतं। विषम विन्नागेनन भविष्यति शिरसः पारं न गमिष्यति। परशुर्न

उद्योग जगाम परशुस्कंधेनादाय वर्द्धकिः॥ तदरण्यं महाराज यत्रासौ निपातितः। सोऽपि तत्र तक्षाणं दृष्टमानं शचीपतिः। अब्रवीत्त्वरयदव्र
वीच्छिंनं सत्वरं पाकशासनः। छिंधि छिंधि शिरांस्यस्य कुरुष्व वचनं मम॥ ॥तक्षोवाच॥ ॥महास्कंधो भृशं ह्येष परशुर्न भविष्यति। क
र्तुं चाहं न शक्ष्यामि कर्म सद्भिर्विगर्हितं॥ ॥इंद्र उवाच॥ ॥मा भैस्त्वं शीघ्रमेतद्वै कुरुष्व वचनं मम। मत्प्रसादाद्धि ते शस्त्रं वज्र
कल्पं भविष्यति॥ ॥तक्षोवाच॥ ॥कं भवंतमहं विद्यां घोरकर्माणमद्य वै। एतदिच्छाम्यहं श्रोतुं तत्वेन कथयस्व मे॥ ॥इंद्र उवाच॥
अहमिंद्रो देवराजस्तक्षन्विदितमस्तु ते। कुरुष्वैतद्यथोक्तं मे तक्षन्मा त्वं विचारय॥ ॥तक्षोवाच॥ ॥क्रूरेण नापत्रपसे कथं शक्रे
ह कर्मणा। ऋषिपुत्रमिमं हत्वा ब्रह्महत्यां न शंकसे॥ ॥शक्र उवाच॥ ॥पश्चाद्धर्मं चरिष्यामि पावनार्थं सुदुश्चरं। शत्रुरेष महा
वीर्यो वज्रेण निहतो मया। अद्यापि चाहमुद्विग्नस्तक्षन्नस्माद्बिभेमि वै। क्षिप्रं छिंधि शिरांसि त्वं करिष्येऽनुग्रहं तव। शिरः पशो
स्ते दास्यंति भागं यज्ञेषु मानवाः। एष तेऽनुग्रहस्तक्षन्क्षिप्रं कुरु मम प्रियं॥ ॥शल्य उवाच॥ ॥एतच्छ्रुत्वा तु तक्षा स महेंद्रवच
नात्तदा। शिरांस्यथ त्रिशिरसः कुठारेणाछिनत्तदा। निकृत्तेषु ततस्तेषु निष्क्रामंस्त्रिशिरास्त्वथ। कपिंजलास्तित्तिराश्च कलविंकाश्च
सर्वशः। येन वेदानधी ११

नविष्पेतुर्निजचास्यतिचा। कपिंजलाः शकुंताः कुलतित्तिलावा। तित्तिरा गौरसित्तिरा। कलविंकाश्चटकाः॥ ॥

तस्य चैकवक्त्रेण सुरां पिबतोपि ब्राह्मणत्वनपसोचनचयस्तदा तस्याद्दोषात्। तदनंतरमेव शुक्रेण स्यसमयस्य कृतत्वादितिमं

ते स्म पिबते सोममेव च। तस्माद्वक्त्राद्विनिष्पेतुः क्षिप्रं तस्य कपिंजलाः। येन सर्वा दिशो राजन्पिबन्निव निरीक्षते। तस्माद्वक्त्राद्विनि
ष्पेतुस्तित्तिरास्तस्य पांडव। यत्सुरापं तु तस्यासीद्वक्त्रं त्रिशिरसस्तदा। कलविंकाः समुत्पेतुः श्येनाश्च भरतर्षभ। ततस्तेषु
निकृत्तेषु विज्वरो मघवानथ। जगाम त्रिदिवं हृष्टस्तक्षापि स्वगृहान्ययौ। मेने कृतार्थमात्मानं हत्वा शत्रुं सुरारिहा। त्व
ष्टा प्रजापतिः श्रुत्वा शक्रेणाथ हतं सुतं। क्रोधसंरक्तनयन इदं वचनमब्रवीत्॥ ॥त्वष्टोवाच॥ ॥तप्यमानं तपो नि
त्यं क्षांतं दांतं जितेंद्रियं। विनापराधेन यतः पुत्रं हिंसितवान्मम। तस्माच्छक्रविनाशाय वृत्रमुत्पादयाम्यहं। लोकाः पश्यं
तु मे वीर्यं तपसश्च फलं महत्। स च पश्यतु देवेंद्रो दुरात्मा पापचेतनः। उपस्पृश्य ततः क्रुद्धस्तपस्वी सुमहायशाः। अग्निं हु
त्वा समुत्पाद्य घोरं वृत्रमुवाच ह। इंद्रशत्रो विवर्धस्व प्रभावात्तपसो मम। सोऽवर्धत दिवं स्तब्ध्वा सूर्यवैश्वानरोपमः। किं क
रोमीति चोवाच कालसूर्य इवोदितः। शक्रं जहीति चाप्युक्तो जगाम त्रिदिवं ततः। ततो युद्धं समभवद्वृत्रवासवयोस्तदा
संक्रुद्धयोर्महाघोरं प्रसक्तं कुरुसत्तम। ततो जग्राह देवेंद्रं वृत्रो वीरः शतक्रतुं॥

तव्य। क्रांतं कृतापराधं पुत्रघ्नं प्रतीकारबुद्धिं। दांतं तपश्चरिनियोगयोग्यमानसं दांतं क्लेशसहं वा। उपस्पृश्य आचम्य।
प्रसक्तं अनवरतं॥

ग्रपाहत्यथाहस्मा हृयंहृदं॥

उद्योग अपाहस्मा हिपद्भ्केशक्रंकोपसमन्वितः। यस्मिंस्तस्मिं ग्राशके तुसंन्नांताविदिवेन्द्रः राः अस्रजं स्तमहासत्वाजंनि-
कोवृत्रनाशनीं॥ जंनमाणस्यचततात्वृत्रस्यास्यादयाहृतात्। स्वमंगाप्यतिसंक्षिप्यनिक्रांताबलनाशनः। ततः शक्र
स्त्रिलोकस्य जंभिकाप्राणसंश्रिता॥ जृंभमाणे सुराः सर्वे शक्रेदृष्ट्वा विनिःसृते। ततः शक्रवृत्रयुद्धं वृत्रवासवयो-
रिहासंरब्धयास्तदा घोरंसुचिरंभरतर्षभ। यदा व्यवर्धत रणे वृत्रोबलसमन्वितः। त्वष्टुस्तेजोबलाविद्धस्तदाश-
क्रोन्यवर्तत। निवृत्ते च तदा देवा विषादमगमत्परं। समेत्य सह शक्रेण त्वष्टुस्तेजो विमोहिताः। अमंत्रयंत
तसर्वेमुनिभिः सहभारत। किंकार्यमिति वै राजन्विचिंत्य भयमोहिताः। जग्मुः सर्वे महात्मानं मनोभिर्विष्णु-
मव्ययं। उपविष्टा मंदराग्रसार्वे वृत्रवधेप्सव॥॥ इत्युद्योगपर्वणि उ वि जाय॥ ॥इंद्रउवाच॥ सर्वंव्या-
प्तमिदंदेवावृत्रेणजगदव्ययं। नह्यस्यसदृशंकिंचित्प्रतिघाताय यद्भवेत्। समर्थोह्यभवन्पूर्वमसमर्थो
स्मिसांप्रतं। कथं नु कार्यं भद्रं वो दुष्प्रधर्षः स मे मतः। तेजस्वी च महात्मा च युद्धे चामितविक्रमः। ग्रसेत्त्रि-
भुवनंसर्वं सदेवासुरमानुषं। तस्माद्विनिश्चयमिमं शृणुध्वं मे दिवौकसः। विष्णोः क्षयमुपागम्य समेत्य च मह- १२
त्मना। तेनसमंत्र्यवेत्स्यामो वधोपायं दुरात्मनः॥ शल्यउवाच॥ एवमुक्तेमघवतादेवाः सर्षिगणास्तदा। शर-
ण्यंशरणं देवं जग्मुर्विष्णुं महाबलं। ऊचुश्च सर्वे देवेशं विष्णुं वृत्रभयार्दिताः॥ ॥

वोस्तुवये॥

त्वया लोकास्त्रयःक्रांताः स्त्रिभिर्विक्रमणैः पुरा। अमृतं चाहृतं विष्णो दैत्याश्च निहतारणे। बलिं बध्वा महादैत्यं शक्रो देवा-
धिपः कृतः। त्वं प्रभुः सर्वदेवानां त्वया सर्वमिदं ततं। त्वं हि देवो महादेवः सर्वलोकनमस्कृतः। गतिर्भवत्वं देवानां स-
क्राणाममरोत्तमा। जगद्व्याप्तमिदंसर्वं वृत्रेणासुरसूदन॥ विष्णुरुवाच॥ अवश्यं करणीयं मे भवतां हितमुत्त-
मं। तस्मादुपायं वक्ष्यामि यथासौ न भविष्यति। गच्छध्वं सर्षिगंधर्वा यत्रासौ विश्वरूपधृक्। सामतस्यप्रयुंजध्वं त- सा
तएनं विजेष्यथ। भविष्यति जयो देवाः शक्रस्य मम तेजसा। अदृश्यश्च प्रवेक्ष्यामि वज्रमस्यायुधोत्तमे। गच्छ-
ध्वमृषिभिः सार्द्धं गंधर्वैश्च सुरोत्तमाः। वृत्रस्य सह शक्रेण संधिं कुरुत माचिरं॥ शल्यउवाच॥ एवमुक्ताकुदेवे-
न ऋषयस्त्रिदशास्तथा। ययुः समेत्य सहिताः शक्रं कृत्वा पुरस्सरं। समीपमेत्य च तदा सर्वएवमहौजसः। तंतेज-
सा प्रज्वलितं प्रतपंतं दिशो दश। ग्रसंतमिव लोकांस्त्रीन् सूर्याचंद्रमसौ तथा। ददृशुस्ते ततो वृत्रं शक्रेण सह देवताः।
ऋषयोथ ततोभ्येत्य वृत्रमूचुः प्रियं वचः। व्याप्तंजगदिदं सर्वं तेजसा तव दुर्जय। न च शक्नोषि निर्जेतुं वासवं ब-
लिनां वरं। युध्यतोश्चापि वां कालो व्यतीतः सुमहानिह। पीड्यंते च प्रजाः सर्वाः सदेवासुरमानुषाः। सख्यं भ-
वतु ते वृत्र शक्रेण सह नित्यदा। अवाप्स्यसि सुखं त्वं च शक्रलोकांश्च शाश्वतान्। ऋषिवाक्यं निशम्याथ स वृत्रः
सुमहाबलः। उवाच तांस्तदा सर्वान् प्रणम्य शिरसासुरः। सर्वे यूयं महाभागा गंधर्वाश्चैव सर्वशः। यद्ब्रूथ तच्छु-

१ सकृत्कदासंगतं मैत्रेणाव्यमवत्स्यमाचि। ततसंगतलिप्सवः। परस्परकालभावि। नचितान्तविश्यति। ताव्यमोवत्संएनाचिनम्म

उद्योग तं सर्वममापिस्तपुणानद्या॥ संधिः कथं वै नचितामम वा कस्य चोभयोः॥ तेजसो हि द्वयोर्देवाः सख्यं वै भविता कथं॥ ॥ऋषय
ऊचुः॥ ॥सकृत्सतां संगतं लिप्सितव्यं ततः परं भविता भव्यमेव। नातिक्रमेत्सत्पुरुषेण संगतं तस्मात्सतां संगतं लिप्सि
तव्यं। दृढं सतां संगतं चापि नित्यं ब्रूयाच्चार्थं ह्यर्थकृच्छ्रेषु धीरः॥ महार्थवत्सत्पुरुषेण संगतं तस्मात्सन्तं न जिघांसेत धीरः॥ इंद्रः स
तां संमतश्च निवासश्च महात्मनां। सत्यवादी ह्यदीनश्च धर्मवित्सूक्ष्मनिश्चयः॥ तेन ते सह शक्रेण संधिर्भवतु नित्यदा
एवं विश्वासमागच्छ मा ते भूद्बुद्धिरन्यथा॥ ॥शल्य उवाच॥ ॥महर्षिवचनं श्रुत्वा तानुवाच महाद्युतिः॥ अवश्यं भग
वंतो मे माननीयास्तपस्विनः॥ ब्रवीमि यदहं देवास्तत्सर्वं क्रियतां यदि। ततः सर्वं करिष्यामि यदूचुर्मां द्विजर्षभाः॥
न शुष्केण न चार्द्रेण नाश्मना न च दारुणा। न शस्त्रेण न चास्त्रेण न दिवा न तथा निशि। वध्यो भवेयं विप्रेन्द्राः शक्रस्य
सह दैवतैः। एवं मे रोचते संधिः शक्रेण सह नित्यदा। बाढमित्येव ऋषयस्तमूचुर्भरतर्षभ। एवं वृत्ते तु संधाने वृत्रः प्र
म मुदितोऽभवत्। यत्तः सदाभवच्चापि शक्रो हर्षसमन्वितः। वृत्रस्य वधसंयुक्तानुपायाननुचिंतयन्। छिद्रान्वेषी समुद्वि
ग्नः सदाभूद्बलवृत्रहा। स कदाचित्समुद्रांते तमपश्यन्महासुरं। संध्याकाल उपावृत्ते मुहूर्ते चातिदारुणे। ततः संचि १३
चि
न्हार्थं त्वा चरविशंसे तेन नाहं नास्ति। न शुष्केण न चार्द्रेण इत्यस्मैते रकथनं। नाश्मनेत्यादि शास्त्रमयुक्तं। रक्षादि शुष्कं युक्तं च

रौद्र न यथा दारुणे। नायं शुष्के। जलत्वेन चोन्यते। नार्द्रो निष्पीडने जलस्य नदर्शनात्। स्पर्शकठिनस्य दर्शनात्। सवज्रं वज्रस्याग्र

न्त्य भगवान्वरदानं महात्मनः॥ संध्येयं वर्तते रौद्रा न रात्रिर्दिवसं न च। वृत्रश्चावश्यवध्योऽयं मम सर्वहरो रिपुः॥ यदि वृत्रं
न हन्म्यद्य वंचयित्वा महासुरं। महाबलं महाकायं न मे श्रेयो भविष्यति। एवं संचिंतयन्नेव शक्रो विष्णुमनुस्मरन्। अथ
फेनं तदापश्यत्समुद्रे पर्वतोपमं। नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा। एनं क्षेप्स्यामि वृत्रस्य क्षणादेव न शिष्यति
सवज्रमथ फेनं तं क्षिप्रं वृत्रे निसृष्टवान्। प्रविश्य फेनं तं विष्णुरथ वृत्रं व्यनाशयत्। निहते तु ततो वृत्रे दिशो विति
मिराभवन्। प्रववौ च ततो वायुः प्रजाश्च जहृषुस्तथा। ततो देवाः सगंधर्वा यक्षरक्षोमहोरगाः। ऋषयश्च महेंद्रं तम
स्तुवन्विविधैः स्तवैः। नमस्कृतः सर्वभूतैः सर्वभूतान्यसांत्वयत्। हतशत्रुः प्रहृष्टात्मा वासवः सह दैवतैः। विष्णुं
त्रिभुवनश्रेष्ठं पूजयामास धर्मवित्। ततो हते महावीर्ये वृत्रे देवभयंकरे। अनृतेनाभिभूतोऽभूच्छक्रः परमदुर्मनाः॥
त्रैशीर्षयाभिभूतश्च स पूर्वं ब्रह्महत्यया। सोंतमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः। न प्राज्ञायत देवेंद्रस्त्वभिभूतः स्व
कल्मषैः। प्रतिच्छन्नो वसत्यप्सु चेष्टमान इवोरगः। ततः प्रनष्टे देवेंद्रे ब्रह्महत्याभयार्दिते। भूमिः प्रध्वस्तसंकाशा निर्वृ
क्षा शुष्ककानना। विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि च। संक्षोभश्चापि सत्त्वानामनावृष्टिकृतोऽभवत्। देवाश्च
नाराजकं तमसं कालं प्रध्वस्तासंकाशा ध्वस्तमहत्त्री। निर्देशः फलारं नादि निशेष॥

महर्षयः सर्वलोगहीनत्वात्॥ नो अस्माकं।(

उद्योग पितृगणं ग्रस्तास्तथा सर्वे महर्षयः॥ अराजकं जगत्सर्वमभिभूतमुपद्रवैः॥ ततोऽभीता भवन्देवाः को नो राजा भवेदिति।
दिवि देवर्षयश्चापि देवराजविनाकृताः। न स्म कश्चन देवानां राज्ये वै कुरुते मतिं॥ ॥इत्युद्योगपर्वणि इंद्रविजये॥ ॥श
ल्य उवाच॥ ॥ऋषयोथाब्रुवन्सर्वे देवाश्च त्रिदिवेश्वराः॥ अयं वै नहुषः श्रीमान्देवराज्येऽभिषिच्यतां॥ ते तेजस्वी च यश य
स्वी च धार्मिकश्चैव नित्यदा॥ ते गत्वाथाब्रुवन्सर्वे राजा नो भव पार्थिव। स तानुवाच नहुषो देवानृषिगणांस्तदा। पितृभि
ः सहितान्राजन्परीप्सन्हितमात्मनः॥ दुर्बलोऽहं न मे शक्तिर्भवतां परिपालने। बलवाञ्जायतां राजा बलं शक्रे हि नि
त्यदा॥ तमब्रुवन्पुनः सर्वे देवाः सर्षिपुरोगमाः॥ अस्माकं तपसा युक्तः पाहि राज्यं त्रिविष्टपे॥ परस्परभयं घोरमस्मा
कं हि न संशयः॥ अभिषिच्यस्व राजेंद्र भव राजा त्रिविष्टपे॥ देवदानवयक्षाणामृषीणां रक्षसां तथा॥ पितृगंधर्वभू
तानां च चक्षुर्विषयवर्तिनां॥ तेज आदास्यसे पश्यन्बलवांश्च भविष्यसि॥ धर्मं पुरस्कृत्य सदा सर्वलोकाधिपो भव॥ ब्र
ह्मर्षीश्चापि देवांश्च गोपायस्व त्रिविष्टपे॥ अभिषिक्तस्ततो राजेंद्र ततो राजा त्रिविष्टपे॥ धर्मं पुरस्कृत्य तदा सर्वलोकाधि
पोऽभवत्॥ सुदुर्लभं वरं लब्ध्वा प्राप्य राज्यं त्रिविष्टपे॥ धर्मात्मा सततं भूत्वा कामात्मा समपद्यत॥ देवोद्यानेषु सर्वेषु नंदनो १४
पवनेषु च॥ कैलासे हिमवत्पृष्ठे मंदरे श्वेतपर्वते॥ सह्ये महेंद्रे मलये समुद्रेषु सरित्सु च॥ अप्सरोभिः परिवृतो देवकन्या

समानयिष्ये सशक्रं गमयिष्यामि।(

समावृतः॥ नहुषो देवराजोऽथ क्रीडन्बहुविधं तदा। शृण्वन्दिव्या बहुविधाः कथाः श्रुतिमनोहराः॥ वादित्राणि च सर्वाणि
गीतं च मधुरस्वरं॥ विश्वावसुर्नारदश्च गंधर्वाप्सरसां गणाः॥ ऋतवः षट्च देवेंद्रं मूर्तिमंत उपस्थिताः॥ मारुतः सुरभिर्वाति
मनोज्ञः सुखशीतलः॥ एवं च क्रीडतस्तस्य नहुषस्य दुरात्मनः॥ संप्राप्ता दर्शनं देवी शक्रस्य महिषी प्रिया॥ स तां संदृश्य
दुष्टात्मा प्राह सर्वान्सभासदः॥ इंद्रस्य महिषी देवी कस्मान्मां नोपतिष्ठति॥ अहमिंद्रोऽस्मि देवानां लोकानां च तथेश्वरः॥ आ
गच्छतु शची मह्यं क्षिप्रमद्य निवेशनं॥ तच्छ्रुत्वा दुर्मना देवी बृहस्पतिमुवाच ह॥ रक्ष मां नहुषाद्ब्रह्मंस्त्वामस्मि शरणं ग
ता॥ सर्वलक्षणसंपन्नां ब्रह्मंस्त्वं मां प्रभाषसे॥ देवराजस्य दयितामत्यंतसुखभागिनीं॥ अवैधव्येन संयुक्तामेकप
त्नीं पतिव्रतां॥ उक्तवानसि मां पूर्वमृतां तां कुरु वै गिरः॥ नोक्तपूर्वं च भगवन्मृषा ते किंचिदीश्वर॥ तस्मादेतद्भवे
त्सत्यं त्वयोक्तं द्विजसत्तम॥ बृहस्पतिरथोवाच शक्राणीं भयमोहितां॥ यदुक्तासि मया देवि सत्यं तद्भविता ध्रुवं॥ द्रक्ष्य
से देवराजानमिंद्रं शीघ्रमिहागतं॥ न भेतव्यं च नहुषात्सत्यमेतद्ब्रवीमि ते॥ समानयिष्ये शक्रेण नचिराद्भवतीमहं॥
अथ शुश्राव नहुषः शक्राणीं शरणं गतां॥ बृहस्पतेरंगिरसश्चुक्रोध स नृपस्तदा॥ ॥इत्युद्योगपर्वणि इंद्रविजये॥

विधर्म्याणि धर्मविरुद्धानि । स्वार्थं जस्तहितः । उवाच याचाभयानाम् । अच्याम्यय श्राक्रत्यसंमेव्येतिवा ॥

उद्योग शल्य उवाच ॥ ॥ क्रुद्धं तु नहुषं दृष्ट्वा देवाः सर्षिपुरोगमाः । अब्रुवन्देवराजानं नहुषं घोरदर्शनम् । देवराज जहि क्रोधं
त्वयि क्रुद्धे जगद्विभो । त्रस्तं सासुरगन्धर्वं सकिंनरमहोरगम् । जहि क्रोधमिमं साधो न क्रुध्यन्ति भवद्विधाः । परस्य पत्नी सा
देवी प्रसीदस्व सुरेश्वर । निवर्तय मनः पापात्परदाराभिमर्शनात् । देवराजोऽसि भद्रं ते प्रजा धर्मेण पालय । एवमुक्तो न
जग्राह तद्वचः काममोहितः । अथ देवानुवाचेदमिन्द्रं प्रति सुराधिपः । अहल्या धर्षिता पूर्वमृषिपत्नी यशस्विनी । जीव
तो भर्तुरिन्द्रेण स वः किं न निवारितः । बहूनि च नृशंसानि कृतानीन्द्रेण वै पुरा । वैधर्म्याण्युपधाश्चैव स च वः कस्मान्न वारि
तः । उपतिष्ठतु देवी मामेतदस्या हितं परम् । युष्माकं च सदा देवाः शिवमेवं भविष्यति ॥ ॥ देवा ऊचुः ॥ ॥ इन्द्राणीमान
यिष्यामो यथेच्छसि दिवस्पते । जहि क्रोधमिमं वीर प्रीतो भव सुरेश्वर ॥ ॥ शल्य उवाच ॥ ॥ इत्युक्त्वा ते तदा देवा ऋ
षिभिः सह भारत । जग्मुर्बृहस्पतिं वक्तुमिन्द्राणीं चाशुभं वचः । जानीमः शरणं प्राप्तामिन्द्राणीं तव वेश्मनि । दत्ताभयां च
विप्रेन्द्र त्वया देवर्षिसत्तम । ते त्वां देवाः सगन्धर्वा ऋषयश्च महाद्युते । प्रसादयन्ति चेन्द्राणी नहुषाय प्रदीयताम् । इन्द्राद्वि
शिष्टो नहुषो देवराजो महाद्युतिः । वृणोत्वियं वरारोहा भर्तृत्वे वरवर्णिनी ॥ एवमुक्ते तु सा देवी बाष्पमुत्सृज्य सस्वरम् । उ १५
वाच रुदती दीना बृहस्पतिमिदं वचः । नाहमिच्छामि नहुषं पतिं देवर्षिसत्तम । शरणागतास्मि ते ब्रह्मंस्त्रायस्व मा

सोऽयमर्थं त्रिविदिति प्राप्नोति । तद्वचनस्य योगेनामयोऽत्यत्रैः । केनाप्यन्नो यत्वात् । प्रमीयते । विवासं शवासं न तु स्पृहानाग

हतोऽनयात् ॥ ॥ बृहस्पतिरुवाच ॥ ॥ शरणागतं न त्यजेयमिन्द्राणि मम निश्चयः । धर्मज्ञां सत्यशीलां च न त्यजेयमनिं
दिते । नाकार्यं कर्तुमिच्छामि ब्राह्मणः सन्विशेषतः । श्रुतधर्मा सत्यशीलो जानन्धर्मानुशासनम् । नाहमेतत्करिष्या
मि गच्छध्वं वै सुरोत्तमाः । अस्मिंश्चार्थे पुरा गीतं ब्रह्मणा श्रूयतामिदम् । न तस्य बीजं रोहति बीजकाले न चास्य वर्षं वर्षति वर्षकाले भी
तं प्रपन्नं प्रददाति शत्रवे न चात्रातारं लभते त्राणमिच्छन् । मोघमन्नं विन्दति चाप्यचेताः स्वर्गाल्लोकाद्भ्रश्यति नष्टचेष्टः
भीतं प्रपन्नं प्रददाति यो वै न तस्य हव्यं प्रतिगृह्णन्ति देवाः । प्रमीयते चास्य प्रजा ह्यकाले सदा विवासं पितरोऽस्य कुर्व
ते । भीतं प्रपन्नं प्रददाति शत्रवे सेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् । एतदेवं विजानन्वै न दास्यामि शचीमिमाम् । इन्द्राणीं विश्रु
तां लोके शक्रस्य महिषीं प्रियाम् । अस्या हितं भवेद्यच्च मम चापि हितं भवेत् । क्रियतां तत्सुरश्रेष्ठा न हि दास्याम्यहं शचीम्
॥ ॥ शल्य उवाच ॥ ॥ अथ देवाः सगन्धर्वा गुरुमाहुरिदं वचः । कथं सुनीतं तु भवेन्मन्त्रयस्व बृहस्पते ॥ ॥ बृहस्पति
रुवाच ॥ ॥ नहुषं याचतां देवी किंचित्कालान्तरं शुभा । इन्द्राणीहितमेतद्धि तथास्माकं भविष्यति । बहुविघ्न
करः कालः कालः कालं नयिष्यति । गर्वितो बलवांश्चापि नहुषो वरसंश्रयात् ॥ ॥ शल्य उवाच ॥ ॥ ततस्तेन तथोक्ते तु

ष्यतीत्यर्थः । कालक्षरः । कालं समयं गर्वितो बलवांश्चातो याचतां नहुषमित्यन्वयः ॥

भीता देवास्तथाब्रुवन्॥ ब्रह्मन्नाधिदमुक्तेनेहितं सर्वं दिवौकसां॥ एवमेतद्द्विजश्रेष्ठ दीर्घं वीचेयमुपद्रुतं॥ ततः समस्ताः ऋ-
षीं देवाः साग्निपुरोगमाः॥ ऊचुर्वचनमव्यग्रा लोकानां हितकाम्यया॥ ॥देवा ऊचुः॥ ॥त्वया जगदिदं सर्वं धृतं स्थावरजं-
गमं॥ एकपत्न्यसि सत्या च गतास्यनघ संप्रति॥ ह्रियं त्यां मतिकामस्य विनशिष्यति यापरं॥ नहुषो देवि शक्रस्य सुरेश्व-
र्यमवाप्स्यति॥ एवं विनिश्चयं कृत्वा द्रुहिणी कार्यसिद्धये॥ अन्त्यगच्छत्सव्रीडा नहुषं घोरदर्शनं॥ दृष्ट्वा तां नहुषस्तापि वयोरू-
पसमन्वितां॥ समहृष्यत दुष्टात्मा कामोपहतचेतसः॥ ॥इत्युद्योगपर्वणि इंद्रविजये॥ ॥शल्य उवाच॥ ॥अथ तामब्रवी-
द्दृष्ट्वा नहुषो देवराट् तदा॥ त्रयाणामपि लोकानामहमिंद्रः शुचिस्मिते॥ भजस्व मां वरारोहे पतित्वे वरवर्णिनि॥ एवमुक्ता तु सा दे-
वी नहुषेण पतिव्रता॥ प्रावेपत त्रयोद्विग्ना प्रवाते कदली यथा॥ प्रणम्य सा हि ब्रह्माणं शिरसा तु कृतांजलिः॥ देवराजमथो-
वाच नहुषं घोरदर्शनं॥ कालमिच्छाम्यहं लब्धुं त्वत्तः कंचित्सुरेश्वर॥ नहि विज्ञायते शक्रः किं वा प्राप्तः क्व वा गतः॥ तत्त्व-
मेतत्तु विज्ञाय यदि न ज्ञायते प्रभो॥ ततोऽहं त्वामुपस्थास्ये सत्यमेतद्ब्रवीमि ते॥ एवमुक्तः स इंद्राण्या नहुषः प्रीतिमानभू-
त्॥ ॥नहुष उवाच॥ ॥एवं भवतु सुश्रोणि यथा मामभिभाषसे॥ ज्ञात्वा चागमनं कार्यं सत्यमेतदनुस्मरेः॥ नहुषेण १९
विसृष्टा च निश्चक्राम ततः शुभा॥ बृहस्पतिनिकेतं च सा जगाम यशस्विनी॥ तस्याः संश्रुत्य च वचो देवाः साग्निपुरो-

विष्णुस्त्वमदितिपुत्रत्वे॥ पर्वतेषु पृथिव्यामिन्द्रो नागः॥ नूनं तेषु दशादिषु प्राग्युक्तेष्वेवाविश्य रूपाण्यन्ते स्थितो वज्रपा-
गमा॥ चिंतयामासुरव्यग्राः शक्रार्थे राजसत्तम॥ देवदेवेन संगम्य विष्णुना प्रभविष्णुना॥ ऊचुश्चैनं समुद्विग्ना वाक्यं वाक्यवि-
शारदाः॥ ब्रह्मवध्याभिभूतो वै शक्रः सुरगणेश्वरः॥ गतिश्च नस्त्वं देवेश पूर्वजो जगतः प्रभुः॥ रक्षार्थं सर्वभूतानां विष्णुत्वमु-
पजग्मिवान्॥ त्वद्वीर्यान्निहते वृत्रे वासवो ब्रह्महत्यया॥ वृतः सुरगणश्रेष्ठ मोक्षं तस्य विनिर्दिश॥ तेषां तद्वचनं श्रुत्वा दे-
वानां विष्णुरब्रवीत्॥ मामेव यजतां शक्रः पावयिष्यामि वज्रिणं॥ पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः॥ पुनरेष्यति
देवानामिंद्रत्वमकुतोभयः॥ स्वकर्मभिश्च नहुषो नाशं यास्यति दुर्मतिः॥ कंचित्कालमिमं देवा मर्षयध्वमतंद्रिता-
ः॥ श्रुत्वा विष्णोः शुभां सत्यां तां वाणीममृतोपमां॥ ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः॥ यत्र शक्रो भयोद्विग्नस्तं
देशमुपचक्रमुः॥ तत्राश्वमेधः सुमहान्महेंद्रस्य महात्मनः॥ ववृते पावनार्थं वै ब्रह्महत्यापहो नृप॥ विभज्य ब्रह्महत्यां
तु वृक्षेषु च नदीषु च॥ पर्वतेषु पृथिव्यां च स्त्रीषु चैव युधिष्ठिर॥ विज्वरः धूतपाप्मा च वासवोऽभवदात्मवान्॥ अकंप-
न्नहुषस्थानाद्दृष्ट्वा बलनिषूदनः॥ तेजोघ्नं सर्वभूतानां वरदानाच्च दुःसहं॥ ततः शचीपतिर्देवः पुनरेव व्यनश्यत॥ अदृश्य-
ः सर्वदेवानां कालाकांक्षी चचार ह॥ प्रणष्टे तु ततः शक्रे शची शोकसमन्विता॥ हा शक्रेति तदा देवी विललाप सुदुःखिता

उपश्रुतिस्तु यत्रास्ते कस्य अवश्यं उपश्रुतिमिति शास्या सुप आभूयते तां निशामाह ॥ बिसतंतुप्रविष्टं विशालं तत्स्था नाम्नि तं॥

उद्योग यदि दत्तं यदि हुतं गुरवस्तोषिता यदि ॥ एकभर्तृत्वमेवास्तु सत्यं यद्यस्ति वा मयि ॥ पुण्यां चेमामहं दिव्यां प्रवृत्तामुत्तरायणे दे
वीं रात्रिं नमस्यामि सिध्यतां मे मनोरथः ॥ प्रयता च निशां देवीमुपातिष्ठत तत्र सा ॥ पतिव्रतात्वात्सत्येन सोपश्रुतिमथाकरोत् ॥ य
त्रास्ते देवराजोसौ तं देशं दर्शयस्व मे ॥ इत्याहोपश्रुतिं देवी सत्यं सत्येन दृश्यतां ॥ ॥इत्युद्योगपर्वणि इंद्रविजये ॥ ॥शल्य उवाच
॥ अथैनां रुपिणीं साध्वीमुपातिष्ठदुपश्रुतिः ॥ तां वयोरूपसंपन्नां दृष्ट्वा देवीमुपस्थितां ॥ इंद्राणी संप्रहृष्टात्मा संपूज्यैना
मपृच्छत ॥ इच्छामि त्वामहं ज्ञातुं का त्वं ब्रूहि वरानने ॥ ॥उपश्रुतिरुवाच ॥ ॥उपश्रुतिरहं देवि तवांतिकमुपागता ॥ दर्शनं
चैव संप्राप्ता तव सत्येन तोषिता ॥ पतिव्रतासि युक्ता च यमेन नियमेन च ॥ दर्शयिष्यामि ते शक्रं देवं वृत्रनिषूदनं ॥ क्षिप्रमन्वेहि
भद्रं ते द्रक्ष्यसे सुरसत्तमं ॥ ततस्तां प्रस्थितां देवीमिंद्राणी सा समन्वगात् ॥ देवारण्यान्यतिक्रम्य पर्वतांश्च बहूंस्ततः ॥ हिमवंत
मतिक्रम्य उत्तरं पार्श्वमागमत् ॥ समुद्रं च समासाद्य बहुयोजनविस्तृतं ॥ आससाद महाद्वीपं नानाद्रुमलतावृतं ॥ तत्रापश्य
त्सरो दिव्यं नानाशकुनिभिर्वृतं ॥ शतयोजनविस्तीर्णं तावदेवायतं शुभं ॥ तत्र दिव्यानि पद्मानि पंचवर्णानि भारत ॥ षट्पदैरु
पगीतानि प्रफुल्लानि सहस्रशः ॥ पद्मस्य भित्त्वा नालं च विवेश सहिता तया ॥ बिसतंतुप्रविष्टं च तत्रापश्यच्छतक्रतुं ॥ तं दृष्ट्वा च सु १७

रेंद्रसा

विश्रुतैः ख्यातैः ॥

रूपेणावस्थितं प्रभुं ॥ सूक्ष्मरूपधरा देवी बभूवोपश्रुतिश्च सा ॥ इंद्रं तुष्टाव चेंद्राणी विश्रुतैः पूर्वकर्मभिः ॥ स्तूयमानस्ततो दे
वः शचीमाह पुरंदरः ॥ किमर्थमसि संप्राप्ता विज्ञातश्च कथं त्वहं ॥ ततः सा कथयामास नहुषस्य विचेष्टितं ॥ इंद्रत्वं त्रिषु लो
केषु प्राप्य वीर्यसमन्वितः ॥ दर्पाविष्टश्च दुष्टात्मा मामुवाच शतक्रतो ॥ उपतिष्ठ इति मां क्रूरः कालं च कृतवान्मम ॥ यदि न त्रास्यसि वि
भो करिष्यति स मां वशे ॥ एतेन चाहं संप्राप्ता द्रुतं शक्र तवांतिकं ॥ जहि रौद्रं महाबाहो नहुषं पापनिश्चयं ॥ प्रकाशयात्मना
त्मानं दैत्यदानवसूदन ॥ तेजः समाप्नुहि विभो देवराज्यं प्रशाधि च ॥ ॥इत्युद्योगपर्वणि इंद्रविजये ॥ शल्य उवाच ॥ एवमु
क्तः स भगवाञ्छच्या पुनरेवाब्रवीत् ॥ विक्रमस्य न कालोयं नहुषो बलवत्तरः ॥ विवर्धितश्च ऋषिभिर्हव्यकव्यैश्च भाविनि ॥
नीतिमत्र विधास्यामि देवि तां कर्तुमर्हसि ॥ गुह्यं चैतत्त्वया कार्यं नाख्यातव्यं शुभे क्वचित् ॥ गत्वा नहुषमेकांते ब्रवीहि च सु
मध्यमे ॥ ऋषियानेन दिव्येन मामुपैहि जगत्पते ॥ एवं तव वशे प्रीता भविष्यामीति तं वद ॥ इत्युक्ता देवराजेन पत्नी सा क
मलेक्षणा ॥ एवमस्त्वित्यथोक्त्वा तु जगाम नहुषं प्रति ॥ नहुषस्तां ततो दृष्ट्वा सस्मितो वाक्यमब्रवीत् ॥ स्वागतं ते वरारोहे किं
करोमि शुचिस्मिते ॥ भक्तं मां भज कल्याणि किमिच्छसि मनस्विनि ॥ तव कल्याणि यत्कार्यं तत्करिष्ये सुमध्यमे ॥ न च व्रीडा
त्वया कार्या सुश्रोणि मयि विश्वस ॥ सत्येन वै शपे देवि कर्तास्म्येतद्वचस्तव ॥ ॥इंद्राण्युवाच ॥ यो मे कृतस्त्वया ॥

१ मयि ॥ पे१

कालक्रमाकांक्षी ह्युगत्यात्। न तस्त्वामवन्त्रामि न विघ्नामि सुराधिप। कार्य्यं च हृदि मे यत्तद्देवराजावधारय। वक्ष्यामि य
दि मे राजंस्त्रिवामनकरिष्यसि। वाक्यं प्रणयसंयुक्तं ततः स्याम्वचगा तव। इंद्रस्य वाजिनो वाहा हस्तिनोऽथ रथास्तथा। इ
च्छाम्यहमथापूर्वं वाहनं ते सुराधिप। यन्न विष्णोर्न रुद्रस्य नासुराणां न रक्षसां। वहंतु त्वां महाभाग ऋषयः संगता विभो
। सर्वे शिबिकया राजन्नेतद्धि मम रोचते। नासुरेषु न देवेषु तुल्यो भवितुमर्हसि। सर्वेषां तेज आदत्स्व स्वेन वीर्य्ये
ण दर्शनात्। न ते प्रमुखतः स्थातुं कश्चिच्छक्तोऽति वीर्य्यवान्॥ शल्य उवाच॥ एवमुक्तस्तु नहुषः प्राहृष्यत त
दा किल। उवाच वचनं चापि सुरेंद्रस्तामनिंदितां॥ नहुष उवाच॥ ॥अपूर्वं वाहनमिदं त्वयोक्तं वरवर्णिनि। दृढम्मे रुचि
तो देवि त्वद्वशोऽस्मि वरानने। न ह्यल्पवीर्यो भवति यो वाहान्कुरुते मुनीन्। अहं तपस्वी बलवान्भूतभव्यभवत्प्रभुः॥
मयि क्रुद्धे जगन्नस्यान्मयि सर्वं प्रतिष्ठितं। देवदानवगंधर्वाः किंनरोरगराक्षसाः। न मे क्रुद्धस्य पर्य्याप्ताः सर्वे लो
काः शुचिस्मिते। चक्षुषा यं प्रपश्यामि तस्य तेजो हराम्यहं। तस्मात्ते वचनं देवि करिष्यामि न संशयः। सप्तर्ष
यो मां वक्ष्यंति सर्वे ब्रह्मर्षयस्तथा। पश्य माहात्म्यमस्माकमृद्धिं च वरवर्णिनि॥ शल्य उवाच॥ एवमुक्त्वा तु
तां देवीं विसृज्य च वराननां। विमाने योजयित्वा स ऋषीन्नियममास्थितान्। अब्रह्मण्यो बलोपेतो मत्तो वरमदेन च॥
नेपेनमत्तो



शक्रं मृगायपि च। स्वयं दृष्टेऽपि शक्रेति तच्छविस्मकाश्यपमितवचनात्तु राधेनमंत्रसंवरणार्थं शच्योक्तमिति मंतव्यं॥

कामवृत्तः स दुष्टात्मा वाहयामास तानृषीन्। नहुषेण विसृष्टा च बृहस्पतिमथाब्रवीत्। समयोऽल्पावशेषो मे नहु
षेणेह यः कृतः। शक्रं मृगय शीघ्रं त्वं भक्तायाः कुरु मे दयां। बाढमित्येव भगवान्बृहस्पतिरुवाच तां। न भेतव्यं त्व
या देवि नहुषाद्दुष्टचेतसः। न ह्येष स्थास्यति चिरं गत एष नराधमः। अधर्मज्ञो महर्षीणां वाहनाद्धतः शुभे। इष्टिं
चाहं करिष्यामि विनाशायास्य दुर्मतेः। शक्रं चाधिगमिष्यामि मा भैस्त्वं भद्रमस्तु ते। ततः प्रज्वाल्य विधिवज्जुहाव पर
महविः। बृहस्पतिर्महाराज देवराजोपलब्धये। तस्माच्च भगवान्देवः स्वयमेव हुताशनः। स्त्रीवेषमद्भुतं कृत्वा तत्रैवांतरधी
यत। स दिशः प्रदिशश्चैव पर्वतांश्च वनानि च। पृथिवीं चांतरिक्षं च विचित्यातिमनोगतिः। निमेषांतरमात्रेण बृहस्पतिमु
पागमत्॥ अग्निरुवाच॥ बृहस्पते न पश्यामि देवराजमिह क्वचित्। आपः शेषाः सदा चापः प्रवेष्टुं नाहमुत्सहे। न मे
तत्र गतिर्ब्रह्मन्किमन्यत्करवाणि ते। तमब्रवीद्देवगुरुरपो विश महाद्युते॥ ॥अग्निरुवाच॥ ॥नापः प्रवेष्टुं शक्ष्यामि
क्षयो मेऽत्र भविष्यति। शरणं त्वां प्रपन्नोऽस्मि स्वस्ति तेऽस्तु महाद्युते। अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं। तेषां
सर्वत्रगं तेजः स्वासु योनिषु शाम्यति॥ ॥इत्युद्योगपर्वणि इंद्रविजये॥ बृहस्पतिरुवाच॥ त्वमग्ने सर्वदेवानां
मुखं त्वमसि हव्यवाट्। त्वमंतः सर्वभूतानां गूढश्चरसि साक्षिवत्॥

त्वामाश्रकं अभिवात्। एकमात्मस्वरूपेणाव। त्रिविधं गार्हपत्याहवनीयदक्षिणाग्निभेदेन। प्रतिष्ठाजयस्थानं। हायनाः श्रुतय

उद्योग त्वामाहुरेकं कवयस्त्वामाहुस्त्रिविधं पुनः। त्वया त्यक्तं जगच्चेदं सद्यो नश्येद्धुताशन। कृत्वा तुभ्यं नमो विप्राः स्वकर्मविजितां
गतिं। गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीं। त्वामग्ने हव्यवाहं त्वामेव परमं हविः। यजन्ति सत्रैर्विविधैर्यज्ञैश्च परमाध्
तेइववतासाशांकांनिराच।ष्टाञ्च स्मि छि ध्येयापदिहिंसायाना धर्म इति वर्तमानस्थितमस्मि तु यथावद्धात्रे कानाकं। अन्य
थाऽन्यस्यापी वच्छन्यच विषायउक्ताव। बाविभिन्नरूपा मतया ब्राह्मणानां रूपाणां न वस्मिन्नर्थे पिकस्मिंस्तु नःतायुत्पादः। क

५.२६:पाव: यस्मिन्नष्टे धृतराष्ट्रः सपुत्रः कस्माद्देषां कलहो नात्र स्त्वेत्। नत्वं धर्मं विच स्मसंजय रमतेस्म ज्ञाना। मि युधिष्ठिराद्धात्वयोक
स्मात्संजय पांडवस्यपुत्रमाहितःपार यितुःस्वकर्म। यथाख्यातमावस्यतःकुटंवपुराकल्यामातुविलापमाचन्नास्मिविधेव
र्तमानयथावकुवावचामतया ब्राह्मणानां। कर्मणाकुः सिद्धिमके परत्र हित्वा कर्म विद्यया सिद्धिमके। नात्तज्ञानान्न द्यते
जृस्यहत्पापहितानन पाढविदितं ब्राह्मणानां॥

मीमाकृरिति। कर्म्म सहित ज्ञानेन एको योगमार्ग प्रणेतारः। विद्ययात ज्ञानेन
सिद्धिमेके सांख्याः। नतु यदिकर्म्महानेनापि परत्र परत्र परलोकस्मिद्धिर्भवतिनक्किमितियुधिष्ठिरापिकर्महित्वावनंनयातीत्यत्रापि
कर्म ज्ञानेनापि परत्र परत्र स्मसिद्धिरितिपक्षायुक्तं इतिदर्शयति। नन्ति ध्यमनुतिःसोहित्वाप्याऽनःपृष्ठं तापपत्रिः। विज्ञानात्मतत्वज्ञो ३७
पपत्तुजातानन्नपश्यतीति विद्यामात्र साधनंवादिनां ब्राह्मणानां रूपाणां यदिदितं त्रानात्माजनात्र्यमपप्यवसपकर्म कार्य्यमिति। सर्वपाकर्म
त्यागाऽशक्यः नरश्यतिगीतासुतल्लिकश्चित्सणमपीति॥ ॥

स्वमतिस्फुटयति। याविविद्याप्यात्मतत्वज्ञानानि कर्म्म साधयंतिकर्म्मसिद्धिंनष्टनीतंधेति। छतिंवंधकत्वात्किमतामां
फलंमोस्करूपतेनराणांकर्मविरोधिनीनां तत्वज्ञानमात्रसाधनवादायेक्षया कर्म्मसाधनवादेदृष्टानुरोधं दर्शयति।
तत्रैवइहलोकेदृष्टफलं न ज्ञानमात्रेणतःपीत्वोकंदिशामप्यतितुर्खीनवतितृप्तायातेः। उपसंहरति। योयंविधीयतइति

यावेविद्याःसाधयंतिहकर्म्मतासांफलंविद्यतेनेनराणां। नत्रेदृष्टविदृष्टफलंतुकर्म्मफीत्वोदकंरूपामतितृप्तयादाः। योयं
विधिर्विहितःकर्म्मणोवतह्नीतमंजयतत्रकर्म्म। तत्रयोन्यत्कर्म्मणःसाधुमन्येमोघंतस्यलपितंदुर्बलस्य। कर्मणामीनांनि
देवाःपरत्र कर्म्मणावद्दन्तवतेमातरिश्वा। अहोरात्रे विदधत्कर्म्मणावज्ञं तंद्रितःशास्तुद्देतिसूर्यः। मासासर्द्धमासानथ
नक्षत्रयोगानतंद्रितश्चंद्रमाश्चाप्युपेति। अतंद्रितोदहते जातवेदाः समिध्यमानःकर्मकुर्वन्प्रजाभ्यः। अतंद्रितानां
रमिमंमहांतंबिभर्तिदेवीपृथिवीबलेन। अतंद्रिताःशीघ्रमापोवहंतिसंतर्पयंत्यःसर्वभूतानिनद्यः। अतंद्रितोवर्ष
तिन्तरितेजाः मरुद्भिरंतरिक्षं दिवंच। अतंद्रितो ब्रह्मचर्यं चचार श्रेष्ठत्वमिच्छन्बलभिद्देवतानां। हित्वा सुखंमनस
श्चप्रियाणि देवःशक्रःकर्मणा ज्यैष्ठ्यमाप। सत्यंधर्मं पालयन्नप्रमत्तोदमंतितिक्षांसमतांप्रियंच। एतानिसर्वाण्यु
पसेवमानःसदेवराज्यंमघवान्प्राप मुख्यं॥

विधिः। देवकोर्थः सकर्म्मणोवसराहर्षेर्दैवीयाकर्मसहितएवविहि
नःतत्तस्मात्तनेविधौकर्मापिवर्तते। कर्तव्यत्वेनासिःअस्यकर्म्मणःकर्मणोन्यदेवदुर्बलस्यकर्मरुपवलहीनस्य

स्थानां द्रविणस्य गोरक्षं कृषिं समगमत् ।त्यायस्वासत एवमीमवमि ।कोरवाणां वक्तुं आम्नायं स्तुवेदात्स्या मत्तुमं स्या ।गत द्यो
ग एतेनाहं धर्मो द्रोणादर्शितः ।संवृत्तस्तस्यादिना ।शस्त्रास्यास ।।तादृशमर्मिकनयानहिंसायां कारोति ।क्षत्रियत्वात्तत्र्यात्र नहं

उद्योग

बृहस्पतिर्ब्रह्मचर्यं चचारसमाहितः संशितात्मा यथावत् ।हित्वा सुखं प्रतिरुध्येंद्रियाणि तेन देवानामगमद्गौरवं सः ।तथा न
क्षत्राणि कर्मणा मुत्र भांति रुद्रादित्या वसवोथापि विश्वे ।यमो राजा वैश्रवणः कुवेरो गंधर्वयक्षाप्सरसश्च शुभ्राः ।ब्रह्मविद्या
मं ब्रह्मचर्यं क्रियां च निषेवमाणा ऋषयोमुत्र भांति ।जानन्निमं सर्वलोकस्य धर्मं ब्राह्मणानां क्षत्रियाणां विशां च ।।स कस्माच्च
जानतां ज्ञानवान् सन् व्यायच्छसे संजय कौरवार्थे ।आम्नायेषु नित्यसंयोगमस्य तथाश्वमेधे राजसूये च विद्धि ।संयु
ज्यते धनुषा वर्मणा च हस्त्यश्वरथैः शस्त्रैश्च भूयः ।।ते चेदिमां कौरवाणामुपायमवगच्छेयुरवधेनैव पार्थाः ।धर्मत्राणं पु
ण्यमेषां कृतं स्यादार्ये वृत्ते भीमसेनं निगृह्य ।।ते चेत्पित्र्ये कर्मणि वर्तमाना आपद्येरन् दिष्टवशेन मृत्युं ।यथाशक्त्या पूर
यन्तः स्वकर्म तदप्येषां निधनं स्यात्प्रशस्तं ।।उताहो त्वं मन्यसे सर्वमेव राज्ञां युद्धं वर्तते धर्मतन्त्रं ।अयुद्धे वा वर्तते धर्मतन्त्रं ।त
थैव ते वाचमिमां शृणोमि ।।

त्यावतिस्त्रविधि ।कोरवाणां अवधेन तत्पर्थाः ।उपायात् जीवनस्य साधनानीति यावत् ।ह्नामस्र ३८
वं तत्कारणं प्रवृत्तं निवृत्तं निगृह्य स्थापयित्वा आर्ये वृत्ते अहिंसायां ।।तपायाः पित्र्ये पित्राचरिते युद्धे ।तथा तत्वा च भूषणेनमि
तलापि तिष्ठित्यद्धा मास्यर्थः ।।

स्वमसाधारणं कर्म ब्राह्मणानां ब्राह्मणादिवर्णानां ।प्रतिषिद्धोस्य यज्ञेनयज्ञाद्भूयादित्यर्थः ।।आत्यां तस्मात् युधिष्ठिरात् इति कश्चिद्धि हि
ग्यता अनिन्द्या ता अनिन्द्याः ।स्यापि तं वित् स्थ्येत् परधनमभिलाषेत् ।।न च तस्मिन्नहमस्मि नार्हः साधु पापमस्तीति शापः ।।स एवतंत्र

चातुर्वर्ण्यस्य प्रथमं विभागमवेक्ष्य त्वं संजय स्वं च कर्म ।निशम्याथो पांडवानां स्वकर्म प्रशंस वा निंद्य या या मतिस्ते ।अधी
यीत ब्राह्मणोथो यजेत दद्यादियात्तीर्थमुख्यानि चैव ।अध्यापयेद्याजयेद्वापि याज्यान् प्रतिग्रहं वा विहितं प्रतीच्छेत् ।तथा
राजन्यो रक्षणं वै प्रजानां कुर्याद्धर्मेणाप्रमादोथ दद्यात् ।यजेत् विद्यां सर्ववेदानधीत्य दारान् कृत्वा पुण्यकृदावसेद्गृहान् ।वैश्यो
धीत्य कृषिगोरक्षपण्यैर्वित्तं चिन्वन् पालयन्नप्रमत्तः ।प्रियं कुर्वन् ब्राह्मणक्षत्रियाणां धर्मशीलः पुण्यकृदावसेद्गृहान् ।।परि
चर्यां वंदनं ब्राह्मणानां नाधीयीत प्रतिषिद्धोस्य यज्ञः ।।नित्योत्थितो भूतयेतंद्रितः स्यादेष स्मृतः शूद्रधर्मः पुराणः ।।एतान्राजा
पालयन्नप्रमत्तो नियोजयन्सर्ववर्णान् स्वधर्मे ।अकामात्मा समवृत्तिः प्रजानां नाधार्मिकाननुरुध्येत कामात् ।।श्रेयांस्तस्मा
द्यदि विद्येत कश्चिदभिज्ञातः सर्वधर्मोपपन्नः ।।स तं दुष्टमनुशिष्यात्प्रजानन्न वै गृध्येदिति तस्मिन्न साधु ।।यदा गृध्येत्पर
२ विधि भूमौ नृशंसो विधिप्रकोपाद्बलमाददानः ।।ततो राज्ञां भविता युद्धमेतत्तत्र जातं वर्म शस्त्रं धनुश्च ।।

धिष्ठिरं इहुमं च धर्ममन्तः शिष्यात् शिक्षयेत् प्रजानां मध्ये ।यदा गृध्येत् दुर्योधन तातः तस्य दशां साधयदास्य धनं गृध्येत् स्वस्य ।वि
लपेत ।विधिः ईश्वरः तस्य कोपात् विप्रख्यातं बलं सामर्थ्यं अल्पावित्ता ना अजानन् अस्मिन् बलवन्मारापेत्यर्थः ।अनवद्यं हं सुव
र्णं ।।अस्य उपमत्र धर्मशास्त्रं मम वधत्वं जीत ।न च धर्म इत्युः ।।

उद्योग

परेण नितरां वेन – येणाधनं तु गृहस्थैवकार्यत्वात्। दस्युवधाय चोरवधाय एतत्कर्म युक्तं अत एव इंद्रेणापि कृतं त्वाहं धर्ममावे
तन्। दुर्योधनस्तु चोर एवेत्यर्थः। तदेव दर्शयति। स्तेन इति। उभौ गर्ह्यौ निंद्यौ। स तु प्रसह्य परोक्षे हरतीति न चोर इत्यर्थः। किं पृथक्
। को भेदो दृष्टचौराददृष्टचोर एव स इत्यर्थः। धर्ममिच्छति दुर्योधनः। पांडवानां भागहरणरूपं। अस्मिन्पदे राज्ये पदे लक्षणेन तु पश्

स्तेनो हरेद्यत्र धनं ह्यदृष्टः प्रसह्य वा यत्र हरेत दृष्टः। उभौ गर्ह्यौ भवतः संजयैतौ किं वै पृथक्त्वं धृतराष्ट्रस्य पुत्रे। सोऽयं
लोभान्मन्यते धर्ममेतं यमिच्छति क्रोधवशानुगामी। भागः पुनः पांडवानां निविष्टस्तं नोऽकस्मादाददीरन्परे वै। अ
स्मिन्पदे युध्यतां नो वधोऽपि श्लाघ्यः पित्र्यं परराज्याद्विशिष्टं। एतान्धर्मान्कौरवाणां पुराणानाचक्षीथाः संजय राजमध्ये
ये ते मंदा मृत्युवशाभिपन्नाः समानीता धार्तराष्ट्रेण मूढाः। इदं पुनः कर्म पापीय एव सभामध्ये पश्य वृत्तं कुरूणां। प्रियां
भार्यां द्रौपदीं पांडवानां यशस्विनीं शीलवृत्तोपपन्नां। यदुपेक्षंत कुरवो भीष्ममुख्याः कामानुगेनोपरुद्धां रुदंतीं। तां चे
त्तदा ते सकुमारवृद्धा अवारयिष्यन्कुरवः समेताः। मम प्रियं धृतराष्ट्रोऽकरिष्यत्पुत्राणां च कृतमस्याभविष्यत्। दुःशासन
ः प्रातिलोम्यान्निनाय सभामध्ये श्वशुराणां च कृष्णां॥

राज्यं लक्षीकृत्य पतदुक्तं पित्र्यं राज्यं परराज्याद्विशिष्टं परराज्यादाने परस्परद्रोहात्। ये समानीतास्ते धार्तराष्ट्रं मध्ये इति ३७
समानीतास्तराजमध्ये एकदेशेन तत्र। कामानुगेन कामिना दुःशासनेनोपरुद्धां धृतां। पुत्राणां च कृतं कार्यं प्रातिलोम्या
त्प्रातिकूल्यात्बलादिति यावत्॥ श्वशुराणां मध्य इति संबंधः॥

कार्पण्यादेव तत्र लोभात्। प्रत्युवाचेत्यात्कारूयामाह। धर्ममेतं मयोक्तं अनुक्त्वा त्वं दुर्योधनं पांडवस्योपदेष्टुमिच्छसि वा
नूनार्थं हारितवानिति। बीभत्सोरिति स्थितो हृदये फाल्गुनस्य वाक्शरः प्रतिष्ठित आसीत्। तमब्रवीत्सूतपुत्र इति पूर्वेणान्वय

सात्र नीता करुणान्यवेक्षमाणा नान्यं क्षत्तुर्नाथमवाप किंचित्। कार्पण्यादेव सहितास्तत्र राज्ञो नाशक्नुवन्प्रतिवक्तुं सभा
यां। एकः क्षत्ता धर्म्यमर्थं ब्रुवाणो धर्म्यं बुद्ध्वा प्रत्युवाचाल्पबुद्धिं। अनुक्त्वा त्वं धर्ममेतं सभायामथेच्छसे पांडवस्योपदेष्टुं।
कृष्णा त्वेतत्कर्म चकार शुद्धं सुदुष्करं तद्धि सभां समेत्य। येन कृच्छ्रात्पांडवानुज्जहार तथात्मानं नौरिव सागरौघात्। यत्राब्र
वीत्सूतपुत्रः सभायां कृष्णां स्थितां श्वशुराणां समीपे। न ते गतिर्विद्यते याज्ञसेनि प्रपद्येदासी धार्तराष्ट्रस्य वेश्म। पराजितास्ते
पतयो न संति पतिं चान्यं भामिनि त्वं वृणीष्व। यो बीभत्सोर्हृदये प्रौढ आसीदस्थिच्छिन्मर्मघाती सुघोरः। कर्णाच्छरो वाङ्म
यस्तिग्मतेजाः प्रतिष्ठितो हृदये फाल्गुनस्य। कृष्णाजिनानि परिधित्समानान्दुःशासनः कटुकान्यभ्यभाषत। एते सर्वे
षंढतिला विनष्टाः क्षयं गता नरकं दीर्घकालं। गांधारराजः शकुनिर्निकृत्या यदब्रवीद्द्यूतकाले स पार्थान्। पराजितो नकुलः
म
ः किं तवास्ति कृष्णया त्वं दीव्य वै याज्ञसेन्या। जानासि त्वं संजय सर्वमेतद्द्यूते वाक्यं गर्ह्यमेवं यथोक्तं। स्वयं त्वहं प्रार्थये तत्र
गंतुं समाधातुं कार्यमेतद्विपन्नं। अहापयित्वा यदि पांडवार्थं शमं कुरूणामपि चेच्चरेयं। पुण्यं च मे स्याच्चरितं महोदयं मु

ः। कच्चिदीमक्षाविनिपातः। तत्र फाल्गुनस्य नियोगिका विनाशयर्थायान्येमरुतं।

कार्व्यास्तुकनीत्यनुगतो। एशमिकान्परान्हित्वान्द्रौशत्तनयदाः कुक्रुः कर्कशाः। अत्सवेदाः। माव्याख्यानीनस्तुर्व्यघ्रीयथा

उद्योग चेरंश्ने कुरवोमृत्युयाशान्त। अपिमेवाचंनाममाणस्य काव्यांधर्मारामामर्थवतीमहिस्त्रां। अवेक्षस्व धार्तराष्ट्राः समंत्रं मा
चश्रासंकुरवः प्रज्ञयेयुः। अतोन्यथारथिनाफाल्गुनेन भीमेनचैवाहवदंशितेन। एशमिकान्धार्तराष्ट्रां श्चविहिश्वहस्य
मानान्कर्मणाश्चेनयायान्। एशजितान्पाडवेयाश्च वावेरीशरुक्रानामते धार्तराष्ट्राः गदाहस्तोभीमसेनोयमनोड
योधंतस्मारथिनाहिकाले। दुर्योधनोमन्युमयोमहाद्रुमः स्कंधः कर्णःशकुनिस्तस्यशाखा। दुःशासनः पुष्पफलेसमृ
द्धेमूलंराजाधृतराष्ट्रोऽमनीषी। युधिष्ठिरोधर्ममयोमहाद्रुमः स्कंधोर्जुनोभीमसेनोस्यशाखा। माद्रीपुत्रौपुष्पफलेसमृ
द्धेमूलंत्वहंब्रह्मचब्राह्मणाश्च। वनंराजाधृतराष्ट्रः सपुत्रोव्याघ्रास्तेविसंजयपांडुपुत्राः। मावनंछिंधिसव्याघ्रंमाव्याघ्रा
नीनशन्वनात्। निर्वनोवध्यतेव्याघ्रोनिर्व्याघ्रंछेद्यतेवनं। तस्माद्व्याघ्रोवनंरक्षेद्वनंव्याघ्रंचपालयेत्। लताधर्माधार्तरा
ष्ट्राः शालाः संजयपांडवाः। नलताचर्धतेजातुमहाद्रुममनाश्रिता। स्थिताः शुश्रूषितुंपार्थाः स्थितायोद्धुमरिंदमाः। य
त्कृत्यंधृतराष्ट्रस्यतत्करोतुनराधिपः। स्थिताः शमेमहात्मानः पांडवाधर्मचारिणः। योधाः समर्थास्तद्विद्वनाचरेथायथा
तथं॥ ॥इत्युद्योगपर्वणिसंजययानेवासुदेववाक्यं॥ ॥संजयउवाच॥ ॥आमंत्रयेत्वांनरदेवदेवगच्छाम्यहंपांड ५८
वस्वस्तितेस्तु॥

नहानतनवंतितथाकुर्विन्त्यर्थः॥ ॥इतिवासुदेववाक्यं॥

---

छिस्तुतिःस्वान्ति। अच्छिषंगात्। रागात्। वाक्यंशुद्धात्मानंसर्वथाउदयस्थं। उपश्रुतिंकटुकांश्रुतिमात्रकटुकां। सततानामह्रस्वांतिनिंदावि

कच्चिन्नवाचावृजिनंहिकिंचिदुच्चारितंममनसोभिषंगात्। जनार्दनंभीमसेनार्जुनौचमाद्रीसुतौसात्यकिंचेकितानं। आमं
त्र्यगच्छामिशिवंसुखंवः सौम्येनमांपश्यतचक्षुषानृपाः॥ युधिष्ठिरउवाच॥ अनुज्ञातः संजयस्वस्तिगच्छनोकार्षीरप्रियं
जातुविद्वन्। विद्मश्चत्वांतेचवयंचसर्वेशुद्धात्मानंमध्यगतंसभास्थं। आप्तोदूतः संजयसुप्रियोसिकल्याणवाक्शीलवान्दृ
ष्टिमांश्च। नमुह्येस्त्वंसंजयजातुमत्यानचक्रुध्येरुच्यमानोपितथ्यं। नमर्मगांजातुवक्तासिरूक्षांनोपश्रुतिंकटुकांनोतशु
क्तां। धर्मारामामर्थवतीमहिंस्रामेतांवाचंतवजानामिसूत। त्वमेवनःप्रियतमोसिदूतइहागच्छेद्विदुरोवाद्वितीयः। अभीक्ष्णदृष्टो
सिपुराहिनस्त्वंधनंजयस्यात्मसमःसखासि। इतोगत्वासंजयक्षिप्रमेवउपातिष्ठेथाब्राह्मणानामतदर्हाः। विशुद्धवीर्यांश्चरणोप
पन्नान्कुलेजातान्सर्वधर्मोपपन्नान्। स्वाध्यायिनोब्राह्मणाभिक्षवश्चतपस्विनोयेचनित्यावनेषु। अभिवाद्यावैमद्वचनेनवृ
द्धास्तथेतरेषांकुशलंवदेथाः। पुरोहितंधृतराष्ट्रस्यराज्ञस्तथाचार्याऋत्विजोयेचतस्य। तैश्चत्वंतातसहितैर्यथार्हंसंग
च्छेथाःकुशलेनैवसूत। अश्रोत्रियायेचवसंतिवृद्धामनस्विनःशीलबलोपपन्नाः। आशंसंतोस्माकमनुस्मरंतोयथाशक्ति
धर्ममात्रांचरंतः। श्लाघमानान्कुशलिनंस्मतात्पास्यनामय

नित्यावत्। शुक्तां। अश्लीलां। अश्रोत्रियाः कुब्राह्मणाः। इत्यादयः धनादिना। धर्ममात्रांमत्प्यांधर्म॥

नयपन्यासक्रियाविशेषणंचेन्नत्। यव्यवहारेणावाप्रियेःअःयेपालयंनायामाधर्म्मस्मानपिउघत्यंगच्छेरित्यर्थः। मंत्रउपवा

उ॰ योग नातःस्वैकंधन्योयेनावेतिव्यवहारेणराज्ञेयेपालयंतानिवसंनिराहे॥ आचार्यइष्टोनपगाविधेयोवेदानीप्सन्ब्रह्मचर्यं
चचार। योस्त्रंचतुष्पात्पुनरेवचक्रेद्रोणःप्रसन्नोभिवाद्यस्तथासौ॥ अधीतविद्यश्चरणोपपन्नोयोस्त्रंचतुष्पात्पुनरेवच
क्रे। गंधर्वपुत्रप्रतिमंतरस्विनंतमश्वत्थामानंकुशलंस्मपृच्छेः॥ शारद्वतस्यावसथंस्मगत्वामहारथस्यात्मविदांवरस्य। त्वं
मामभीक्ष्णंपरिकीर्त्तयन्वैकृपस्यपादौसंजयपाणिनास्पृशेः॥ यस्मिन्शौर्यमानृशंस्यंतपश्चप्रज्ञाशीलंश्रुतिसत्वेधृति
श्च। पादौगृहीत्वाकुरुसत्तमस्यभीष्मस्यमांतत्रनिवेदयेथाः॥ प्रज्ञाचक्षुर्यःप्रणेताकुरूणांबहुश्रुतोवृद्धसेवीमनीषी। त
स्मैराज्ञेस्थविरायाभिवाद्यआचक्षीथाःसंजयमामरोगं। ज्येष्ठःपुत्रोधृतराष्ट्रस्यमंदोमूर्खःशठःसंजयपापशीलः॥ प्रशास्ता
वैपृथिवीयेनसर्वासुयोधनंकुशलंतातपृच्छेः॥ भ्राताकनीयानपितस्यमंदस्तथाशीलःसंजयसोपिशश्वत्। महेष्वासःशू
रतमःकुरूणांदुःशासनंकुशलंतातवाच्यः॥ हेदारकंकविमर्थेष्विष्टंमहाप्राज्ञंसर्वधर्मोपपन्नं। नतस्ययुद्धंरोचतेवैकदा
चित्वैश्यापुत्रंकुशलंतातपृच्छेः॥ निकर्त्तनादेवनयोद्वितीयश्छन्नोपधःसाधुदेवीमताक्षः॥

रामात्संप्रदारःरूपेणादयोवापादाश्चचतुष्पाद्स्त्रमाययादिवुनर्वेदाध्ययनानंतरं। गंधर्वपुत्रोपवितंगातद्धांहंदार ४१
कंश्येश्च। आर्घुबुकायमेषु। निकर्त्तनेशाध्येछेदोपधोयमतुना॥

कामोनीष्टः। स्नेहाद्धर्त्तराष्ट्रेषुअमर्षमस्मकेच्छाजनितं। अर्थेषुनियुक्तान्नियुक्तान्भांडारिकान्॥

योदुर्ज्ञेयोदेवितत्वेनसंख्येसविभ्रमेनसंख्येःकुशलंतातवाच्यः॥ यस्यकामोवर्त्ततेनित्यमेवनान्यःशमाद्भारतानामिति
स्म। सबाह्लिकानामृषभोमनीषीत्वयाभिवाद्यःसंजयसाधुशीलः॥ गुणैरनेकैःप्रवरैश्चयुक्तोविज्ञानवान्नैवचनिष्ठुरो
यः। स्नेहादमर्षंसहतेसदैवसःसोमदत्तःपूजनीयोमतोमे॥ अर्हत्तमःकुरुषुसौमदत्तिःसनोभ्रातासंजयमत्सखाचम
हेष्वासोरथिनामुत्तमार्हःसहामात्यःकुशलंतस्यपृच्छेः॥ येचैवान्येकुरुमुख्यायुवानःपुत्राःपौत्राभ्रातरश्चैवयेनः। यंय
मेषाममन्यमेयेनयोग्यंतेनस्तोच्यानामयंमत्तनवाच्याः॥ येराजानःपांडवायोधनायसमानीताधार्त्तराष्ट्रेणकेचित्। वसा
तयःशाल्वकाःकेकयाश्चतथांबष्ठायेत्रिगर्त्ताश्चमुख्याः॥ प्राच्योदीच्यादाक्षिणात्याश्चशूरास्तथाप्रतीच्याःपार्वतीया
श्चसर्वे। अनृशंसाःशीलवृत्तोपपन्नास्तेषांसर्वेषांकुशलंस्मपृच्छेः॥ हस्त्यारोहारथिनःसादिनश्चपदातयश्चार्यसंघा
महांतः। आख्यायमांकुशलिनंस्मनित्यमनामयंपरिपृच्छेःसमग्रान्॥ तथाराज्ञोह्यर्थयुक्तानमात्यान्दौवारिकान्येचसेना
नयंति। आयव्ययंयेगणयंतिनित्यमर्थांश्चयेमहतश्चिंतयंति॥ गांधारराजःशकुनिःपार्वतीयोनिकर्त्तनेयोद्वितीयो
क्षदेवी। मानंकुर्वन्धार्त्तराष्ट्रस्यसूतमिथ्याबुद्धेःकुशलंतातपृच्छेः॥ यःपांडवानेकरथेनवीरःसमुत्सहत्यप्रधृष्यान्वि
जेतुं। योमुह्यतांमोहयिताद्वितीयोवैकर्त्तनंकुशलंतस्यपृच्छेः॥ सएवनकःसगुरुःसमनर्त्तासावपितासचमातासुहृच्चाग

यानोनाय्यीः न इति माधिं चेन ज्ञातीनामात्मसाम्यमभिप्रेत्य तु संगुप्ताऽस्त्यादि कुशलप्रश्नप्रकारकथनं स्नुषाः स्वार्थपूर्वता



५ बहुचिद्विदुरो दीर्घदर्शी मनोमंत्री कुशलं तस्य पृच्छेः । ह रंगां यां रीमसुपेत्य संजय कृत्वाद्वितीयामतिवाद्य पूर्वैः । हरः स्त्रियो
याश्चगुणोपपन्ना ज्ञायंते नः संजय मातरस्ताः । ताभिः सर्वाभिः सहिताभिः समेत्य स्त्रीभिर्वृद्धाभिरभिवादं वदेथाः ॥ कच्चित्पुत्रा
जीवपुत्राः सुसम्यग्वर्तन्ते वो वृत्तिमनृशंसरूपाः । इति स्मोक्त्वा संजय ब्रूहि पश्चादजातशत्रुः कुशली सपुत्रः ॥ या नो भार्याः
संजय वेत्थ तत्र तासां सर्वासां कुशलं तात पृच्छेः । सुसंगुप्ताः सुरभयो नवद्याः कच्चिद्गृहानावसथ भद्राः ॥ कल्याणीर्वचो धर्म्य
शं सरूपाः ॥ यथा च वः स्वशुरेषु वर्तध्वं तथा वृत्तिमात्मनः स्थापयध्वं या नः स्नुषाः संजय वेत्थ तत्र प्राप्ताः कुलेभ्यश्च गुणो
पपन्नाः ॥ प्रजावत्यो ब्रूहि समेत्य ताश्च युधिष्ठिरोऽभ्यवदत्प्रसन्नः ॥ कन्याः स्वजेथाः सदनेषु संजय अनामयं मद्वचनेन पृ
ष्ट्वा ॥ कल्याणा वः संतु पतयोऽनुकूला यूयं पतीनां भवतानुकूलाः ॥ अलंकृता वस्त्रवत्यः सुगंधा अबीभत्साः सुखिता भोग
वत्यः ॥ लघु यासां दर्शनं वाक्च लघ्वी वेशस्त्रियः कुशलं तात पृच्छेः ॥ दासीपुत्रा ये च दासाः कुरूणां तदाश्रया बहवः कुब्जखं
जाः ॥ आख्याय मां कुशलिनं स्म तेभ्यो अनामयं परिपृच्छेर्जघन्यं । कच्चिद्वृत्तिं वर्तते वै पुराणीं कच्चिद्भोगान्धार्तराष्ट्रो ददाति
॥ अंगहीनाः कृपणा वामना वा यानानृशंस्याद्धृतराष्ट्रो बिभर्ति ॥ अंधाश्च सर्वान्स्थविरांस्तथैव हस्ताजीवा बहवो ये च संति ॥ 

र्यीः ॥ प्रजावत्यो भाद्रजायाः । लघु निर्देषं । हस्ताजीवा हस्तेन भारमार्थ्य याचमानाः कुब्जादयः ॥

जघन्यमंते । हृत्स्विदुपचारपद्धतिः । शत्रून्धार्तराष्ट्रान्नरिष्यपोऽस्मि । इति ब्रूयाऽइति शेषः । ब्राह्मणेभ्योऽग्रे कृतानि वृत्तिवस्त्रदे
यानि निश्चितानि तानि दानावर्तयं तेन वर्त्तितममास विधानात् । तानि मा वीनि आवयथा ब्राह्मणाः हतानि राज्ये लब्धा दास्यामि इ
ति वदन्त्यसौ त्वर्थः । ये पर्वं बुद्धिविषयीकृताः तान्वदानाय पुरुकृत्पारं गौरवं न पश्यामि तेनाम वसिद्धिं निश्चयं मम पुरुषं तरा
इत्थावायथा । एतत्कृत्वायदिकर्यचित्तमापादानानितद्दयंतम्या दद्यादितितात्पर्यं । आत्मान्यवसिमिनिश्चयतेत आत्मपोषण

आख्याय मां कुशलिनं च तेषां अनामयं परिपृच्छेर्जघन्यं । मा भैष्ट दुःखेन कुजीवितेन नूनं परलोकेषु पापं निहद्य श
त्रून्सुहृदानुगृह्य वासोभिरन्नेन च वो भरिष्ये । संत्येव मे ब्राह्मणेभ्यः कृतानि भावीन्यथो नो बत वर्तयंति पश्यामि
दयुक्तरूपांस्तथैव तामेव सिद्धिं श्रावयेथा नृपं तं ॥ ये चानाथा दुर्बलाः सर्वकालमात्मन्येव प्रयतंते च मूढाः । तांश्चा
पि त्वं कृपणान्सर्वथैव अस्मद्वाक्यात्कुशलं तात पृच्छेः ॥ ये चाप्यन्ये संश्रिता धार्तराष्ट्रान्नानादिग्भ्योऽभ्यागताः सूतपुत्र ॥
दृष्ट्वा तांश्चैवार्हतश्चापि सर्वान्संपृच्छेथाः कुशलं चाव्ययं च । एवं सर्वानागतानागतांश्च राज्ञो दूतान्सर्वदिग्भ्योऽभ्युपेतान्
। पृष्ट्वा सर्वं कुशलं तांश्च सूत पश्चादहं कुशली तेषु वाच्यः ॥ न हीदृशाः संति परे पृथिव्यां ये योधका धार्तराष्ट्रेण लब्धाः । धर्म
स्तु नित्यो मम धर्म एव महाबलः शत्रुनिबर्हणाय । एवं ह्यूर्ध्वं वचनं धार्तराष्ट्रं सुयोधनं संजय श्रावयेथाः ॥

मात्रार्थप्रवचनैः । अध्ययमनपचयं । आगतानत वेदागरपस्थितान् अभ्यागतानां गतागतान् पिंगमिश्रतः । नहीदृशा इति ईदृशा भा
नाम्ना ना हशा योधा इह पृथिव्यामन्ये संति यान्ताना ना । मम तु धर्म एव शत्रुनिबर्हणाय महाबलः बलवान्सहायः कथम किनातन
नावतशत्रुमारणमनेककधर्मस्तु नित्यो विना फलदानं अनाशाया धर्मस्तु अकृत्वापि फलं न वृत्ये त्यावत्पर्थः ॥ मदीयं

उद्योग

त्वच्छरीरस्थितं हृदयं मनस्तेनात्मानं लक्षयति तं जानाति सम्पत्रचात् । मानतनालक्षबात । एकं कारणं । शोकपरस्येडपश्य ॥ ॥इति युधि
ष्ठिरसंदेशः ॥ ॥तस्मात्सर्वं दिशि स्तुक सिवातं दितिः सुकमिति कश्चिद्भावः । न च सम्यक्त्वेन गोत्रात्तस्मादेवेनोवा चितश्चादि
त्युक्तानि । उङ्घरन्तु रुङ्घ्रय याने निश्चिरा यशास्त्रयायां न तु दुःखं विदित्वा तस्मात्सुकस्य दितिश्च तान्यथा देवा बाधस्य देवा वा

य त्वच्छरीर हृदयं डालाति कामः कुरून् सम्यक् शिष्यां । न विद्धो नेयुक्तिरन्तस्य कश्चिन्नेवं विधाः स्याम यथा प्रियं न । इदमस्य
वाक्यं कडरं ममेवं तु धर्मस्य वा नारतस्तु रक्ष्यवाः ॥ इत्युद्योगपर्वणि संजययाने ॥ युधिष्ठिर उवाच ॥ उत संसद सम्यं तेन चवनालेख्या
रेव संजय । उताबलं बलीयांसं धर्मात्मा कुरुते वशे । उत बालाय पाण्डित्यं पण्डिता यान्न बालता । ददाति सर्वं मा शानवः । तुस्मात्सुक
सुदुरं । बलं जिज्ञासमानस्य आचक्षीथाः यथातथं । अथ मंत्रं मंत्रयित्वा याथातथ्येन धृष्टवत् । गावल्गणे कुरून् गत्वा धृतराष्ट्रं म
हाबलं । अभिवाद्योपसंगृह्य ततः पृच्छेरनामयं । ब्रूयाश्चैनं त्वमासीनं कुरुभिः परिवारितं । तवैव राजन्वीर्येण सुखं जीवंति पांडवाः
तव प्रसादाद्बालास्ते प्राप्ता राज्यमरिंदम । राज्ये तान् स्थापयित्वाग्रे नोपेक्षस्व विनश्यतः । सर्वमप्येतत्सर्वमप्येतदेकस्य नालं संजय
कस्यचित्

धविज्ञं निततेन पितांकालात कुरुषु समवर्द्धयानवेनादयन्त्यतिकालः प्रवनिवृत्ता निइ निश्च तात लेनमाजयाशांड
ये धन कुरुवलि तापिकाले न वशीकरणादिति तात्पर्यं । निष्ठायाजनं विज्ञापनं शावाक्यैः । आत्मनाय यथानयं कुन्त्या मावद्दा
घा । यदुक्तं निसुरमपि अतोन्येन मंत्रयित्वा विडराविति । सदृश्यदनि ध्रुवत् अग्नि सुखं धर्म वरं वितायनानि हितमिति ४३
यावत् । तदप्याचक्षीथा इत्यन्वयः ॥

तात धृतराष्ट्र । मध्येऽन्यसंबंधेनेपि संजयनिपदं ब्रूया इत्यनेनान्वितं बोद्धव्यं । द्विषतां कामक्रोधवादानां ॥

म तात संहृत्य जीवामो द्विषतां मा वशं गमः । तथा भीष्मं शांतनवं भरतानां पितामहं । शिरसाभिवदेथास्त्वं मम नामप्रकीर्त्य
यन् । अभिवाद्य च वक्तव्यस्ततोऽस्माकं पितामहः । भवता शांतनोर्वंशो निमग्नः पुनरुद्धृतः । मंत्र कुरुत घा तानस्त्व मतेन पितामह
ह । यथा जीवंति ते पौत्राः प्रीतिमंतः परस्परं । तथैव विदुरं ब्रूयाः कुरूणां मंत्रधारिणं । अयुद्धं सौम्य भाषस्व हितकामा
युधिष्ठिरे ॥ अथ दुर्योधनं ब्रूया राजपुत्रममर्षणं । मध्ये कुरूणामासीनमनुनीय पुनः पुनः । अपापां यदुपेक्षेत कृष्णा सम
नामनागतां । तदुःखमतितिक्षाम मा वधिष्म कुरूनिति । एवं पूर्वापरान्क्लेशानतितिक्षंत पांडवाः । बलीयांसोपि संतो
यत्तत्सर्वं कौरवो विदुः । यन्नः प्राव्राजयः सौम्य अजिनैः प्रतिवासितान् । तत्तितिक्षाम दुःखं च मावधिष्म कुरूनिति । यत्तः
कुंतीमतिक्रम्य कृष्णा केशेष्वधर्षयत् । दुःशासनस्ते तद्वास्माभिरुपेक्षितं । यथोचितं स्वकं भागं लभेमहि परं
तप । निवर्तय परद्रव्याद्बुद्धिं गृद्धां नरर्षभ । शांतिरेवं भवेद्राजन्प्रीतिश्चैव परस्परं । राज्यैकदेशमपि नः प्रयच्छ शममि
च्छतां । कुशस्थलं वृकस्थलं माकंदी वारणावतं । अवसानं च वै देव चकं चिदेकं च पंचमं । भ्रातृणां देहि पंचानां पंच ग्रामान्सु
योधन । शांतिर्नोऽस्तु महाप्राज्ञ ज्ञातिभिः सह संजय । भ्राता भ्रातरमन्वेतु पिता पुत्रेण युज्यतां । स्मयमानाः समायांतु प
चालाः कुरुभिः सह । अक्षतान्कुरुपांचालान्पश्येम इति कामये । सर्वे सुमनसस्तात शाम्याम भरतर्षभ ॥

इति युधिष्ठिरसंवादः ॥ ॥कल्पं सजं त्रकाल्पोऽत्र समकः ॥ स्वार्थेन सक्तो निवारितः ॥

७ द्योग अलामवशामार्यस्मित थापूर्वायसंजय । धर्मार्थयो बलंवादं सुदृढं वेदारुणायच ॥ ॥इत्युद्योगपर्वणि संजययाने
॥ वैशंपायन उवाच ॥ ॥अनुज्ञातः पांडवेन ययौ संजयस्तदा । शासनं धृतराष्ट्रस्य सर्वं कृत्वा महात्मनः । संप्रा
प्य हास्तिनपुरं शीघ्रं प्रविवेश च । अंतःपुरमुपस्थाय द्वास्स्थं वचनमब्रवीत् । आचक्ष्व धृतराष्ट्राय द्वामां समुपाग ६.
तं । सकाशात्पांडुपुत्राणां संजयं मा चिरं कृथाः । जगतीव दनिवादस्तु द्वि दास्स्थ प्रविशेयं । विदितोऽस्मि नृपस्य । निवे
द्यमवाप्य यि क्त द्विमस्ति दास्थो यस्तु वाः स्वपतिं जगाद ॥ ॥द्वास्स्थ उवाच ॥ ॥संजयोऽयं भूमिपते नमस्ते दिद
त.स्था क्षया द्वारमुपागतस्ते । प्राप्तो दूतः पांडवानां सकाशात् प्रशाधि राजन् किमयं करोतु ॥ धृतराष्ट्र उवाच ॥ आचक्ष्व मां कुश
लिनं कल्यमस्मै प्रवेश्यतां स्वागतं संजयाय । न चाहमेतस्य न वाभ्यकाल्यः स मे कस्माद्द्वारि तिष्ठेत सक्तः ॥ ॥
वैशंपायन उवाच ॥ ततः प्रविश्यानुमते तु वेश्म महद्धि प्राज्ञः शूरार्यगुप्तं । सिंहासनस्थं पार्थिवमाससाद वैचित्र
वीर्यं प्रांजलिः सूतपुत्रः ॥ ॥संजय उवाच ॥ संजयोऽहं भूमिपते नमस्ते प्राप्तोऽस्मि गत्वा नरदेव पांडवान् । अभि
वाद्य त्वां पांडुपुत्रो मनस्वी युधिष्ठिरः कुशलं चान्वपृच्छत् । स ते पुत्रान्पृच्छति प्रीयमाणः कच्चित्पुत्रैः प्रीयसे नप्तृभिश्च ॥ त ४४
था सुहृद्भिः सचिवैश्च राजन् ये चापि त्वामुपजीवंति तैश्च ॥ धृतराष्ट्र उवाच ॥

अजातशत्रुमभ्येत्याभिनंद्याहं वांवदामि । यत्त्वं शमेतत्तवशास्य सर्वं मनोव्हृतं कुरुषु पाणेनेषानुमिच्छति । धर्मादिपिपरमधि
कमाढ्यं शास्त्रं ऋद्धिमा धर्ममपि त्यक्त्वा अर्थकामस्य मित्रतां प्रयः । वित्तचर्या हि नार्थ्य कर्माचरणात् धर्मार्थ परास्य मतं न धर्म्म
हानेकिं त्वधर्म एवानानुरुध्यात । नावतः स्वमावनः । अन्यो हि पुरुषः पारणादे विनश्यु सुक्तः प्रहितः । विचिंत्य तन्धर्ममनुरुध्य

अतिनंद्य त्वां तात वदामि संजय अजातशत्रुं च सुखेन पार्थं । कच्चित्स राजा कुशली सपुत्रः सहामात्यः सानुजः कौ
रवाणां ॥ ॥संजय उवाच ॥ ॥सहामात्यः कुशली पांडुपुत्रो बुभूषते यच्च तेऽग्रे मनोऽभूत् । निर्णिक्तधर्मार्थ
करोमनस्वी बहुश्रुतो दृष्टिमांश्शीलवांश्च । परं धर्मात्पांडवस्याऽनृशंस्यं धर्मः परो वित्तचयान्मतोऽस्य । सुखप्रिय
॥विक्षिपाद्यः धर्मर्हीने न पापानुरुध्यात नावतस्यास्य बुद्धिः । परप्रयुक्तः पुरुषो विचेष्टते सूत्रप्रोता दारुमयीव योषा । इमं दृष्ट्वा
नियमं पांडवस्य मन्ये परं कर्म दैवं मनुष्यात् । इमं दृष्ट्वा नियमं पांडवस्य मन्ये परं कर्मा दैवं मनुष्यात् । इमं च दृष्ट्वा तव
कर्मदोषं पापोदर्कं घोरमवर्णरूपं यावत्परः कामयतेऽतिकालं तावन्नरोऽयं लभते प्रशंसां । अजातशत्रुस्तु विहाय पापं जीर्णां
त्वचं सर्प इवासमर्थां । विरोचतेऽहार्यवृत्तेन धीरो युधिष्ठिरस्त्वयि पापं विसृज्य ॥

य

न्त । नियमं प्राश्यकं । दैवं कर्मप्राप्नवायं क
र्मसंदृष्ट्वा । एतज्जन्मस्वरूपकारात् । एवंशास्त्रंनयो रक्षालनेदा दिप्रयः । कर्मदोषं दोषवक मर्थ्यवर्ण रूपं अवर्णनाय रूपं अ
वाच्यं नकामयत्तनमलिनयतिश्रुतिकालं सर्वदा कर्मेत्युवद्वत्तिः । तथा युधिष्ठिरस्त्वयि पापमकार्षीत् विसृज्यं स्वानकदा विश्रा

उद्योग०

उपकारं निंदां प्रस्तुत परलोके नो वा न किं पापं प्रसज्येदं धात॥ अपि तु प्रसक्तो दैवस्पर्थः। अधर्मे ज्ञाशोकार्त्तिः प्रसममेव युक्तं॥
एवं धर्माणि नाहं ज्ञा धर्मान्निवर्त्तितुं सर्वनापदः संतितीर्षतः संतारस्तस्याच्छिकस्त्वं समःमर। कुलेजातः स्यादि विशापणावानचेसम
कथामवेदशंसं कर्म्म वेकुर्तं कर्यादित्येवम। यदि तामं वलितो विनर्ति। न च धर्म्म एव अनाय म्यंत्र तन्याधीनं। कुलंदयाय

दंता स्मन्नकर्म्मीति बोधराजत्वधर्मार्थ युक्तादार्य्यहत्तादपेतं। उपकोत्रां व्रहगता सिरानहन्नयःपापं प्रसजेद्युत्त। मत्रम
र्थं संज्ञायितं विनातेरा शंमतत्तवरत्रात्त गोह्याः। अधर्म शङ्कां महारदृष्टियां। निदं कर्म्म चेत्रमनेनारतायां। दानप्रजोरिरक्षुल्ल
याइज्ञां मादीघोवेरात्त्व विद्यास्वधीरः। एवं धर्मानापदः संश्रयपुर्दी नावीर्य्यमस्त्र नवेदशिष्टः। कुलेजाताधनवान्याय
शस्वी बहुश्रुतः सुखजीवी जितात्मा। धर्माधर्माय विस्तो यावितनि सद्यस्यदिष्टस्य वशाद्रपैति। कथं हि मंत्राय्य धाराम
नीषी धर्मार्थ योरापदि संप्रणेता। एवं युक्तः सर्वधार्म्मैरदीनो नरो नृशंसं कर्म्म कथ्यादिरत्त। न वह्यमामं चविदः सामत्यसमा
॥निरयंच पापिपाव: सः तेकर्म्म खनित्य युक्ताः। तथामयं बलवान्निश्चयश्च कुरुत्ताया निवम्मनो दैपादि। अकालिकं कुरवो नानविप्यर पापेन च
त्यापमजातशत्रु॥ इत्युक्ता उत्तरपिपापं विसृज्य निंदा वयेतवला। कः न विप्यत्त॥

नप्नि मित्तं निरयः क्लेशः पांडवानांव्यपा
दिविशापोत्पादित। अकालिकमामवकालिकं न चकुशा त कुरवो नाम विप्यत्र पापे नापकारणा। वसापं अपकारकर्तृत्वेपि पा ४५
र्थेशव्रत। तदाचतस्व विपापं विसृज्य निधाया पकारं कुर्वा तवाप्ययं निंदा मात्रस्पैवान विप्यदित्यवयः॥

किमत्र विषयाऽभाव रादैश्वराणां देवानामयमर्थो देवगाचरण। यत्रपार्थः परलोकं दृष्टुमत्यतिक्रमेत। अतिक्रांत
वारगत इत्यर्थः। तथाऽऽदृदानां संमतः वस्ययावियषयो स्तुदानादोस्यात् अवृत्त। तस्मात् न मंशायोयस्यादाव प्रुमत्रुष्य
कारः पुरुषकारो नास्ति न तदिच्छया तेषां कल्याणं किंतु देवगाचरणो वा तेषां कल्याणमित्यर्थः। एतादृशमिदृतमात्रत्य
तव्यपदेशश्च सिहारुधियादि च गणाऽज्ञतत्र कर्म्म कृतावृद्धः नावाना वो वर्त्तमानावनित्यौ मावान्हृतिः पुरुषकाराधीनं दहि

किमन्यत्र विषयादीश्वराणां यत्र पार्थः परलोकं ददर्श। अत्यक्रामस्त तथा सम्मतः स्यात्र मंशायो नास्ति मनुष्यकारः। एतादृशणाट
कर्म्मगुणानवेदश्च नावा मावोवर्त्तमानावनित्यौ। बलिर्हि राजा पारमविंदमानो नान्यकालात्कारणं तत्र मेन। चेतः मावनामि
का व्रकतिका जानस्येतान्यायतनानि जंतोः। तानिषीतान्यवहसादयां ततानयव्यथोऽस्यदानः प्रणुद्यात्। न ह्येवमान्यपुरु
षस्य कर्म्म संवर्त्ततस्तुखवद्वक्षंयघावत्॥

पुरुषस्य नावा वावानित्यः स्यात्। नापि तत्त्वतोरतावस्यानित्यत्वं स्यात्। पारंकारणांतरनिष्ठयत्तद्रूपं। कालादीश्वरात्। कर्म्मात्तु
रूपफलदायिनः। आयतनानि साधनानि तदिते पामायत्तमिति। तानि ङः स्यानि ङः स्वसाधनत्वात्। न प्रीत्याऽप्रमाकृतनतुः
स्वसाधनानसदृसंयाजायते। अपि तु प्रणुद्यात्। अपनयेदविषयस्यः। अव्यथो विषयजः स्वरहितः। पुरुषकार
नो वपि देवाकावनमिद्धिरादात्। न ह्येवमन्यइति। कर्म्मयथावत्फलानुरूपं न संवर्त्तेतेनप्रवर्त्तेत। किंतु दैवमेव॥

उद्योग नयादि। अनिषक्तेनोनवजातामात्यपितृकर्मणास्वचेष्टाव्यतिरेकातिरेके पितोऽजेनेनत्वारपानेन संरक्षितविविधवद्धिधिष्ठव।
तद्रूपेण। प्रियाप्रियइति सुखोऽयमितिहृष्टाधीतिप्रशंसः। दुःखव्ययमितिदृष्टाः प्रियंतिदे। नमज्ञातत्व विदोधाति। पर
स्तुअतश्वविदित्वेऽपराधेद्रुरूपकारद्दानागदंयात तेचसाधु द्दतेप्रशंसात मादंचां देवप्रवर्तितमपिगर्हितारत्नानविरो
धदंतोनविते त्यतावन्माचरण। वस्तुनस्तुदैवबशज्ञानतवारगर्हइत्यर्थः। यदिदैवमवकारणं तदातमत्यपि किंमा

मात्रः पितृः कर्माणिविद्यस्तसंवर्धितविविधवञ्चोजानना। प्रियाप्रियसुखदुःखचराजन्निंदाप्रशंसाचन जंतवेणरस्त्र
नंगर्दयेतेपराधेप्रशंसातसाधुव्रत्ते तामवप्रवागदिनारतानाविराधदंतादृतं नविनायप्रजानां नाचेदिदंनवकर्मपराधस्त्र
कृतद्वाहकृत्स्नं। नविकल्पाद्यमावको जातु पुत्रस्यराजसर्वंगंतासर्वलोकेनरिडकामात्मनात्माघनाद्दतकालतागाःश्रा
मेपल्लपविपाकमस्य। अनामानांघयद्दावेनरंइतथामानां। निघ्नपदाबदराजन्यः। भूमिस्पर्शो नाडुर्बलत्वादनंतामगावकृस्त्रर
स्त्रितोकोरवेया॥
गर्द्दयसीत्याह। नोचेन्न। यदिदंकर्मपांडवनिस्सारणरूपंतदापराधस्त्वप्रमादान्मावत्। मदाकृत्स्नंदाहितकथ
मिति शाषः। संमावितत्विचारणामपिकर्मप्रमादोऽनुपदमाणो देवस्यसत्कारिणाविनतवानपराधतीति। उरूपकारमद्दायापेक्षिलेदस्य
तदनावः प्रहतिरित्याशयः। अजातश्चत्रुश्चजातस्य श्चत्रुवशमध्यनवं। गंतागमनशीलः। कामात्मनोऽत्रपाणानान्यत।। श्रा ४६
माङपत्तामादस्य विपाकफलं प्रवप।।

थ्निप्रवेश्यगमामि। गृहय्यागव॥ ॥श्रीनारायणसर्वज्ञव्याख्यानविशारदा कृता॥ संतमसंजयवाक्यानां सुगमाः पदपंक्तयः॥ य

श्चवज्ञातारथवेगावधूतश्चांतो निपद्योशयनं त्रसिंहः। प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्वचनं समेताः॥ धृतरा
ष्ट्रउवाच॥ अनुज्ञातोऽस्म्यावसथं परेहि प्रपद्यशयनं सूतपुत्रं। प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्वचनं
समेताः॥ ॥इत्युद्योगेपर्वणि संजययाने॥ ॥वैशंपायन उवाच॥ द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः॥
विदुरं द्रष्टुमिच्छामि तमिहानय माचिरं। प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत्। ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति
॥ एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनं। अब्रवीद्धृतराष्ट्राय द्वाःस्थ मां प्रतिवेदय॥ द्वाःस्थ उवाच॥ विदुरोऽयमनुप्राप्तो रा
जेंद्र तव शासनात्। द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि मां॥ धृतराष्ट्र उवाच॥ प्रवेशय महाप्राज्ञं विदुरं दीर्घदर्शिनं। अ
हं हि विदुरस्यास्य नाकल्यो जातु दर्शने॥ द्वाःस्थ उवाच॥ प्रविशांतःपुरं क्षत्तर्महाराजस्य धीमतः। नहि ते दर्शनेऽकल्यो जा द्वतिरा
ब्रवीति मां॥ वैशंपायन उवाच॥ ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनं। अब्रवीत्प्रांजलिर्वाक्यं चिंतयानं नराधिपं॥ वि
दुरोऽहं महाप्राज्ञ संप्राप्तस्तव शासनात्। यदि किंचन कर्तव्यमयमस्मि प्रशाधि मां॥ धृतराष्ट्र उवाच॥ संजयो विदुर प्राप्तो ग
र्हयित्वा च मां गतः। अजातशत्रोः श्वो वाक्यं सभामध्ये स वक्ष्यति। तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया। तन्मे दहति गात्रा
णि तदकार्षीत्प्रजागरं। जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि।

दर्पः परावज्ञानं। अमात्यत्वं तन्निमानं विषमानिता निमानो मंमा रिणी प्रमारिणा कामा कामापि स्त्रासाधारणं चेत्त्। तनध

उद्योग णेन दक्षार्थी लाक्षागारे। जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि। तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि। यतः पापसत्त्वं जयः पां
डवेभ्यो न मे यथा स्वमनः प्रशान्तिः। सर्वेन्द्रियाणि प्रकृतिं गतानि किंवक्ष्यतीत्येव हि मे प्रचिंता॥ विदुर उवाच॥ अभियु
क्तं बलवता दुर्बलं हीनसाधनं। हृतस्वं कामिनं चोरमाविशंति प्रजागराः। कच्चिदेतैर्महादोषैर्न स्पृष्टोसि नराधिप। क
च्चिन्न परवित्तेषु गृध्यन् परितप्यसे॥ धृतराष्ट्र उवाच॥ ॥श्रोतुमिच्छामि ते धर्म्यं परं नैःश्रेयसं वचः। अस्मिन् राजर्षिवं
शे हि त्वमेकः प्राज्ञसंमतः॥ विदुर उवाच॥ ॥निषेवते प्रशस्तानि निंदितानि न सेवते। अनास्तिकः श्रद्दधान एतत्पंडि
तलक्षणं। क्रोधो हर्षश्च दर्पश्च ह्रीस्तंभो मान्यमानिता। यमर्थान्नापकर्षंति स वै पंडित उच्यते। यस्य कृत्यं न जानंति मं
त्रं वा मंत्रितं परे। कृतमेवास्य जानंति स वै पंडित उच्यते। यस्य कृत्यं न विघ्नंति शीतमुष्णं भयं रतिः। समृद्धिरस
मृद्धिर्वा स वै पंडित उच्यते। यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते। कामादर्थं वृणीते यः स वै पंडित उच्यते। यथा
शक्ति चिकीर्षंति यथाशक्ति च कुर्वते। न किंचिदवमन्यंते नराः पंडितबुद्धयः। क्षिप्रं विजानाति चिरं शृणोति विज्ञाय
चार्थं भजते न कामात्॥ ४७
स्वल्पमप्यल्पमपि। चिरं शृणोति। शंका निरासावधि। अर्थं फलं। न कामात् इच्छामात्रात्॥

असंपृष्टो यथा वदन्तः। उपयुंक्ते वाक्यमभावान्न परार्थे विषमे। प्रज्ञानं चिन्हं। निश्चित्य उपायं ज्ञात्वा प्रक्रारिणां तर्वसति कर्मणः।
आरभ्य न विरमति। अवंध्यकालः सर्वदा प्रयोजनवत्। कर्मकारित्वात्। भूतानां पृथिव्यादीनां तत्त्वं विनाशित्वादि। योगो युक्ति
रौचित्यं मनुष्याणां मनुष्यकर्तव्योपायज्ञः। प्रवृत्तवागकुंठवचनः। चित्रकथोऽद्भुतकथाभिज्ञः। ऊहस्तर्कः प्रतिभानं प्रतिभा

नासंपृष्टो ह्युपयुंक्ते परार्थे तत्प्रज्ञानं प्रथमं पंडितस्य। नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुं। आपत्सु च न मुह्यंति नराः
पंडितबुद्धयः। निश्चित्य यः प्रक्रमते नांतर्वसति कर्मणः। अवंध्यकालो वश्यात्मा स वै पंडित उच्यते। आर्यकर्मणि र
ज्यंते भूतिकर्माणि कुर्वते। हितं च नाभ्यसूयंति पंडिता भरतर्षभ। न हृष्यत्यात्मसंमाने नावमानेन तप्यते। गांगो ह्रद इवा
क्षोभ्यो यः स पंडित उच्यते। तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणां। उपायज्ञो मनुष्याणां नरः पंडित उच्यते। प्रवृत्त
वाक् चित्रकथ ऊहवान् प्रतिभानवान्। आशु ग्रंथस्य वक्ता च यः स पंडित उच्यते। श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रु
तानुगा। असंभिन्नार्यमर्यादः पंडिताख्यां लभेत सः। अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः। अर्थांश्चाकर्मणा प्रेप्सुर्मूढ
इत्युच्यते बुधैः। स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति। मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते। अकामान् कामयति यः
कामयानान् परित्यजेत्। बलवंतं च यो द्वेष्टि तमाहुर्मूढचेतसं। अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च। कर्म चार

नकालस्फूर्तिः। श्रुतमित्यन्योन्यानुरूपश्रुतप्रज्ञ इत्यर्थः। समुन्नद्धः प्रगल्भः। महामना दानप्रवृत्त इत्यर्थः। स्वकर्मणादेवमात्रे
णास्वकं मत्वा ममपित्यक्त्वा परार्थपदार्थमित्याचरति मिथ्या निधानं न मित्रं प्रतारयति॥



संसारयति लोके प्रसारयति। क्षिप्रार्थे क्षिप्रसाध्ये। अल्पं धर्मार्थवर्जितं॥ सचलं। नैष्कर्म्यात्। पुरुषकारं विना। शून्यं निरुत्पत्ति-
स्थानं। कदर्यं कृपणं। एकः पापानीत्यादि तस्मात् भृत्यार्थं पापं कुर्वन्नपि दण्ड्यस्त्वया न तु भृत्या इत्यर्थः॥ एकया बुद्ध्या। हि कार्या का-

न ते ऽश्नतमाकृष्टचेतसं। संसारयति कृत्यानि सर्वत्र विचिकित्सते। चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ॥ श्राद्धं पितृभ्यो
न ददाति दैवतानि नार्चति। सुहृन्मित्रं न लभते तमाहुर्मूढचेतसं। अनाहूतः प्रविशति अपृष्टो बहु भाषते। अविश्वस्ते
विश्वसिति मूढचेता नराधमः॥ परं क्षिपति दोषेण वर्तमानः स्वयं तथा। यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः॥ आत्मनो बलम-
ज्ञाय धर्मार्थपरिवर्जितः। अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते॥ अशिष्यं शास्ति यो राजन्यश्च शून्यमुपासते। कदर्यं
भजते यस्तु तमाहुर्मूढचेतसं। अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा। विचरत्यसमुन्नद्धो यः स पण्डित उच्यते। एकः संपन्न-
मश्नाति वस्ते वासश्च शोभनं। यो ऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः। एकः पापानि कुरुते फलं भुङ्क्ते महाजनः। भोक्तारो
विप्रमुच्यन्ते कर्ता दोषेण लिप्यते। एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता। बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकं। ए-
कया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु। पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव॥

र्थ्यौ विनिश्चित्य त्रीन् शत्रुमित्रोदासीनान् चतुर्भिः सामादिभिः पञ्च इन्द्रियाणि षट् संधिविग्रहादीनि। सप्त व्यसनानि स्त्रियो द्यूतं ४८
मृगया पानं वाक्पारुष्यं च पञ्चमं। महच्च दण्डपारुष्यमर्थदूषणमेव चेति॥

मन्त्रविस्रवो मन्त्रस्य प्रसरणं। न भुञ्जीत। नार्थान्न चिन्तयेत्। एको न गच्छेदध्वानं। प्रत्यवायभयात्। नैको जागृयात्। रात्रौ चेत्ता दि-
दर्शीत नत्वायत्ती कारा संभवात्। सत्यं धर्मं एतद्बोधयिष्यति। एतदेवापदर्शयिष्यति। एको धर्मः परं श्रेय इति। स्वर्गस्य सुखस्य पारा

एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते। सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविस्रवः। एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत्। एको न ग-
च्छेदध्वानं नैकः सुप्तेषु जागृयात्। एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे। सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव। एकः क्षमा-
वतां दोषो द्वितीयो नोपपद्यते। यदेनं क्षमया युक्तमशक्तं मन्यते जनः। सो ऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलं। अक्षमावान्
परान्दोषैरात्मानं चैव योजयेत्। एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा। विद्यैका परमा तृप्तिरहिंसैका सुखावहा। द्वाविमौ
ग्रसते भूमिः सर्पो बिलशयानिव। राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनं। द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते। अब्रु-
वन्परुषं किंचिदसतो नार्थयंस्तथा। द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ। स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः। द्वा-
विमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषिणौ। यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः। द्वाविमौ पुरुषौ राजन्स्वर्गस्योप-
रि तिष्ठतः। प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान्॥

चगमनस्य। ग्रसमानानि तिपरमारणं। हिंसकस्य हिंसा दोषः। परस्य द्रष्टुरिति दोषः। अपरयोः। विरोधात्तद्योतनात्। परस्याच्छ-
या। प्रत्ययः संप्रत्ययः। स्वेन कर्माणि कुर्वीत इति। शरीरं शरीरं तत्परिशोषिणौ॥ ॥

अतिक्रमात्‌ अध्यापनतस्य हानिः॥ त्रयोन्यायाम् आरित्रं॥ कनीयान्‌ स्यः श्रेष्ठो ऽतिशयितः॥ नराः॥ इति हृत्‌ न विदुः इति॥ नकं भोगं च मन्त
मानं तत्कालात वास्मीतिवादिनं॥ न द्रुह्यन्‌ तः शरणं स्वस्थानं॥ दीर्घसूत्रे चिरकालिनि॥ रन्तसि हर्षेतरलिप्सायां द्रष्टा दिनामेव ने

उद्योग

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ॥ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं॥ त्रयोन्यायाम् अनुष्याणां शूर्यंतमरतर्ष
भ॥ कनीयान्मध्यमः श्रेष्ठ इति विद्वि विदो विदुः॥ त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः॥ नियोजयेद्यथान्यायं त्रिविधेष्वेव
कर्म्मसु॥ त्रय एवाधना राजन्‌ भार्या दासस्तथा सुतः॥ यत्ते समधिगच्छंति यस्य ते तस्य तद्धनं॥ हरणं च परस्वानां परदारा
भिमर्शनं॥ सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः॥ कामः क्रोधस्तथा लोभ
स्तस्मादेतत्त्रयं त्यजेत्‌॥ त्रिकं च भक्तमानं च तवास्मीति च वादिनं॥ त्रीनेतान्‌ शरणं प्राप्तान्‌ विषमेपि न संत्यजेत्‌॥ वरप्रदानं
राज्यं च पुत्रजन्म च भारत॥ शत्रोश्च मोक्षणं कृच्छ्रात्‌ त्रीणि चैकं च तत्समं॥ चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पंडि
वारणे अपद तस्तानि विद्यात्‌॥ अल्पप्रज्ञैः सह मंत्रं न कुर्यान्न दीर्घसूत्रै रभसैश्चारणैश्च॥ चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्ट
स्य गृहस्थधर्म्मे॥ वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या॥

दक्षसंगात्‌ चारणैः परस्तुतिमात्रजीविभिः॥ तेषां स्तुत्यर्थं मिथ्याभिधायित्वात्‌ नैरंतर्येण रिति कवित्वावः॥ वृद्धो ज्ञातिः वृद्धः शि ४८
थिलकुलधर्म्मोपदेशकत्वात्‌ अवसन्नः क्षीणः॥ कुलीनः अतिथित्वेन॥ सखा दरिद्रः साहाय्य॥ एवं भगिन्यामपि॥ ॥

सद्यस्कानि सद्यःफलानि॥ संकल्पो मिलापः अनुभावः प्रभावः॥ विनाशं विनाशनं॥ विनाशयितुं सद्यःफलं मनुष्याणां शीघ्र॥ विद्यम
संहृतं अप्रत्यानं तेऽहरति तुष्टिपिश्चा प्रकृष्टज्ञानं॥ हुतस्य मध्य॥ जलपात्रस्य पारामानात्‌॥ तद्‌ज्ञात्वा तापि मनसः॥ प्रमानता
मयोत्सवा विदवृद्धिः॥ आलस्य ग्रहणं विर्वैमुख्यं॥ दीर्घसूत्रता अप्रतिबंध प्रतिबंधबुध्या विरेका॥ रिचो॥ अन्वयबकारं रंदस्यस्य

च वार्या महाराज सद्यस्कानि हृद्रस्य निः॥ छेन्नतिश्चशैं आयतनानामानितिबोधमि॥ देवतानां च संकल्पमनुभावं च धी
मतां॥ विनयं कृतविद्यानां विनाशं पापकर्म्मणां॥ पंचाग्नयो मनुष्येण परिचर्याः प्रयत्नतः॥ पिता माताग्निरात्मा च गुरुश्च
भरतर्षभ॥ पंचैव पूजयंल्लोके यशः प्राप्नोति केवलं॥ देवान्‌ पितॄन्मनुष्यांश्च भिक्षूनतिथिपंचमान्‌॥ पंच त्वानुगमिष्यंति य
त्र यत्र गमिष्यसि॥ मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः॥ पंचेंद्रियस्य मर्त्यस्य छिद्रं चेदेकमिंद्रियं॥ ततोस्य स्र
वति प्रज्ञा दृतेः पादादिवोदकं॥ षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता॥ निद्रा तंद्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥ षडिमा
न्पुरुषो जह्याद्भिन्नां नावमिवार्णवे॥ अप्रवक्तारमाचार्यमनधीयानमृत्विजं॥ अरक्षितारं राजानं भार्यां चाप्रियवादिनीं॥ ग्रा
॥ मकामं च गोपालं वनकामं च ना पितं॥

अनधीयानं॥ अध्ययनस्य मुख्यत्वात्‌॥ ग्रामकामं ग्रामवासकामं॥ वने ग्रामसंज्ञावनगो
रक्षास्य वनवाससाध्यत्वात्‌॥ एवं वनकामं नत्र वासंगं॥ तत्कार्यस्य ग्राम एव संभवात्‌॥ ॥७॥

यस्मात् स्त्रियो गौः स्त्रैवं वशीवश्यात्मनिग्राहीरक्षिता नानित्यंसतां किंचित्कापि विश्वास्यायात्। सम्पुद्वायापएस्यानि

उद्यो०

षड्चतुगुणाः सुंसानदानवाः कथं वनासत्यं दानमनालस्यमनस्यासमाप्तिः अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च। वश्यश्च पुत्रोऽर्थकरी च विद्या षड्जीवलोकस्य सुखानि राजन्॥ वश्यात्मनि नित्यानामे स्त्रुंस्यो धिगच्छति॥ नसपापः कृतानर्थैः युज्यते क्वचित्। षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते॥ चोराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः। प्रमदाः कामयानेषु यजमानेषु याजकाः। राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः। षडिमानि विनश्यन्ति मुहूर्तमनवेक्षणात्। गावः सेवा कृषिर्भार्या विद्या वृषलसंहतिः। षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम्। आचार्यं शिक्षिताः शिष्याः कृतदाराश्च मातरम्। नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकम्। नावं निस्तीर्णकान्तारा आतुराश्च चिकित्सकम्। आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह संप्रयोगः। स्वप्रत्यया वृत्तिरभीतिवासः षड्जीवलोकस्य सुखानि राजन्। ईर्ष्युर्घृणी न संतुष्टः क्रोधनो नित्यशङ्कितः। परभाग्योपजीवी च षडेते नित्यदुःखिताः। सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः। प्रायशो यैर्विनश्यन्ति कृतमूलाश्च पार्थिवाः। स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम्। महच्च दण्डपारुष्यमर्थदूषणमेव च। अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः॥

स्वयं। पापैः कल्मषैः। कृतानर्थैः कृतनडः खेः स्वप्रत्यया स्वनिष्ठ यद्विंकाश्च निर्गतात्रगतिकाया। अर्थदूषणमर्थस्य हापातादनं नाशनमिति यावत्॥

दीपे

कृतानर्थैः नर्थैः।

५०

द्वेष्टि होषयात्रं करोति। विरुद्धानिवाक्यानि करोति। कृत्येषु अनुदयः कृत्येषु। अस्मत् यति सम इमे वदृष्यति। हर्षस्थानानि वर्तमानानि। इदानीमपि सुखसुखानि सुखोदर्कानि सम येह र्षादिमयो। प्रियस्य प्रशंसा हि रूपस्यालापः। मनुचंति

ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते। ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति। रमते निन्दया चैषां प्रशंसां नाभिनन्दति। नैनान्स्मरति कृत्येषु याचितश्चाभ्यसूयति। एतान्दोषान्नरः प्राज्ञो बुद्ध्या बुद्ध्वा विवर्जयेत्। अष्टाविमानि हर्षस्य नवनीतानि भारत। वर्तमानानि दृश्यन्ते तान्येव सुसुखान्यपि। समागमश्च सखिभिर्महांश्चैव धनागमः। पुत्रेण च परिष्वङ्गः संनिपातश्च मैथुने। समये च प्रियालापः स्वयूथ्येषु समुन्नतिः। अभिप्रेतस्य लाभश्च पूजा च जनसंसदि। अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च। पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च। एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य। राजा यदा सत्कुरुते मनुष्यं सर्वान्गुणानेष गुणोऽतिभाति। नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकम्। क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः। दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः॥ त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश। तस्मादेतेषु सर्वेषु न प्रसज्जेत पण्डितः॥ अत्रैवो

उक्तमिति। अक्षिणी श्रवणे नासिके आस्यं पायूपस्थानि। नवद्वाराणि वेश्मान्तः प्रवेशोऽत्रयः सत्त्वादयो गुणास्त एव स्थूणाः धारणदेतुत्वात्। भूमिः स्थूलीभावं च निर्मीतरस्य निर्मितानि पञ्चसाक्षिकं क्षेत्रज्ञाधिष्ठितं तत्त्वाधीनं यो वेद समनः सुरया। प्रमत्तो विषयैः। स्तगमस्र

पुत्रार्थेऽत्रत्सुद्दिश्य।अन्यैवधर्मज्ञानविषयएवामात्यो।आश्रयस्थयत्नो।युक्तःउपकारेयुक्तः।प्रधानगुणोनाम।अश्रमवतःकार्य्यां
न्तरामकः।धुरंधरःकार्य्यधुराणामत्यागी।संरंभेणपरसंरंभदर्शनेनक्रोधमात्रे।आकारितःआहूतः।अमात्र्योमात्रार्थेअल्पा

दाहरंतीममितिहासंपुरातनं।पुत्रार्थमसुरेंद्रेणगीतंचैवसुधन्वना॥यःकाममन्यूप्रजहातिराजापात्रेप्रतिष्ठापय
तिधनंच।विशेषविच्छ्रुतवान्क्षिप्रकारीतंसर्वलोकःकुरुतेप्रमाणं।जानातिविश्वासयितुंमनुष्यान्विज्ञातदोषेषुदधाति
दंडं।जानातिमात्रांचतथाक्षमांचतंतादृशंश्रीर्जुषतेसमग्रा॥सुदुर्बलंनावजानातिकिंचिद्युक्तोरिपुंसेवतेबुद्धिपू
र्वं।नविग्रहंरोचयतेबलस्थैःकालेनयोविक्रमतेसधीरः॥प्राप्यापदंनव्यथतेकदाचिदुद्योगमन्विच्छतिचाप्रमत्तः।दुःखंच
कालेसहतेमहात्माधुरंधरस्तस्यजिताःसपत्नाः॥अनर्थकंविप्रवासंगृहेभ्यःपापैःसंधिंपरदाराभिमर्षं।दंभंस्तैन्यंपैशु
न्यंमद्यपानंनसेवतेयःससुखीसदैव॥नसंरंभेणारभतेत्रिवर्गमाकारितःशंसतितत्त्वमेव।नमित्रार्थेरोचयतेविवादं
नापूजितःकुप्यतिचाप्यमूढः॥नयोभ्यसूयत्यनुकंपतेचनदुर्बलःप्रातिभाव्यंकरोति।नात्याहकिंचित्क्षमतेविवा
दंसर्वत्रतादृग्लभतेप्रशंसां॥योनोद्धतंकुरुतेजातुवेषंनपौरुषेणापिविकत्थतेन्यान्॥

ष्ठी।नाभ्यसूयतिगुणिनं।अथवानुकंपतेदीनं।दुर्बलोदरिद्रः।नात्याहकंचिदतिक्रम्यनाहानयोपतीतियावत्।क्षमते
विवादं।निरुद्धवादंपरस्य।अन्यानुल्लंघीकृत्य॥

भा॰टी॰अ॰ ३३

५४

मूर्छितःतंद्विनोवहानात्समेतिनात्मानंगोपायति।करोतिमन्युंशोकं।समयान्पूर्वशतिज्ञाननियमान्।बुभूषतेकर्तु
मिच्छति।परावरज्ञःउत्तमाधमविवेकवान्।दंभंपरवंचनायैवधर्मानुष्ठानं।मोहमनात्मन्यात्मबुद्धिं।

नमूर्छितःकटुकान्याहकिंचित्प्रियंसदातंकुरुतेजनोहि॥नवैरमुद्दीपयतिप्रशांतंनदर्पमारोहतिनास्तमेति।नदुर्गतो
स्मीतिकरोत्यकार्यंतमार्यशीलंपरमाहुरार्याः॥नस्वेसुखेवैकुरुतेप्रहर्षंनान्यस्यदुःखेभवतिप्रहृष्टः।दत्त्वानप
श्चात्कुरुतेनुतापंसकथ्यतेसत्पुरुषार्यशीलः॥देशाचारान्समयान्जातिधर्मान्बुभूषतेयःसपरावरज्ञः।सयत्रत
त्राभिगतःसदैवमहाजनस्याधिपत्यंकरोति॥दंभंमोहंमत्सरंपापकृत्यंराजद्विष्टंपैशुनंपूगवैरं।मत्तोन्मत्तैर्दुर्जनैश्चा
पिवादंयःप्रज्ञावान्वर्जयेत्सप्रधानः॥दानंहोमंदैवतंमंगलानिप्रायश्चित्तान्विविधान्लोकवादान्।एतानियःकुरुते
नित्यकानितस्योत्थानंदेवताराधयंति॥समैर्विवाहंकुरुतेनहीनैःसमैःसख्यंव्यवहारंकथांच।गुणैर्विशिष्टांश्चपुरोद
धातिविपश्चितस्तस्यनयाःसुनीताः॥मितंभुंक्तेसंविभज्याश्रितेभ्योमितंस्वपित्यमितंकर्मकृत्वा।ददात्यमित्रेष्वपियाचितः
संस्तमात्मवंतंप्रजहत्यनर्थाः॥चिकीर्षितंविप्रकृतंचयस्यनान्येजनाःकर्मजानंतिकिंचित्।मंत्रेगुप्तेसम्यगनुष्ठितेचना
ल्पोप्यस्यच्यवतेकश्चिदर्थः॥यःसर्वभूतप्रशमेनिविष्टःसत्योमृदुर्दानकृच्छुद्धभावः॥

मत्सरंद्वेषं।पापकृत्यंपापक्रियां।
पूगवैरंसबहुवैरं।दैवतंदेवतार्चकर्म।लोकवादान्लोकव्यवहारसिद्धान्धर्मान्।उत्थानंबुद्धिं।राधयंतिसाधयंति।व्यवहारं

[illegible]

संज्ञायते सम्यक् साधते। आत्मना पचयते। आत्मनानुक्तेपि सर्वलौकिकं स्वयं ज्ञात्वा लक्षते॥ ॥ अजातशत्रोः पथ्यं श्रेयस्क
रं कुरुत। पापशंकी पापमात्मनो दुःखं नेपश्यन्। तान्यवस्तुनि। मिथ्योपेतानि मिथ्यावचनानि। अभिचाराणि। अनुपायम

अतीव संज्ञातेस्तानि मध्ये महामणिः काच इव पश्यन्तः॥ य आत्मना पत्रपते भृशं नरः सर्वलोकस्य गुरुर्भवित्युत। अनंततेजाः
सुमनाः समाहितः स तेजसा सूर्य इवावभासते॥ वने जाताः शापदग्धस्य राज्ञः पाण्डोः पुत्राः पंच पंचेन्द्रकल्पाः। त्वयैव
बाला वर्धिताः शिक्षिताश्च तवादेशं पालयंत्याम्बिकेय। प्रदायैषामुचितं तात राज्यं सुखी पुत्रैः सहितो मोदमानः। न दे
वानां नापि च मानुषाणां भविष्यसि त्वं तर्कणीयो नरेंद्र॥ ॥इत्युद्योगपर्वणि विदुरप्रजागरे ३३॥ ॥धृतराष्ट्र उवाच॥
जाग्रतो दह्यमानस्य यत्कार्यमनुपश्यसि। तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि। त्वं मां यथावद्विदुर प्रशाधि प्रज्ञा
पूर्वं सर्वमजातशत्रोः। यन्मन्यसे पथ्यमदीनसत्व श्रेयस्करं ब्रूहि तद्वै कुरूणां। पापाशंकी पापमेवानुपश्यन् पृच्छामि
त्वां व्याकुलेनात्मनाहं। कवे तन्मे ब्रूहि सर्वं यथावन्मनीषितं सर्वमजातशत्रोः॥ ॥विदुर उवाच॥ ॥शुभं वा यदि
वा पापं द्वेष्यं वा यदि वा प्रियं। अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवं। तस्माद्वक्ष्यामि ते राजन्भवमिष्टं कुरूणां
वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे। मिथ्योपेतानि कर्माणि सिद्ध्येयुर्यानि भारत। अनुपाययुक्तानि मा स्म तेषु म५२
नः कृथाः। तथैव योगविहितं यत्तु कर्म न
विरोधिनो पायाः तैः प्रयुक्तानि। विनाशांतानि दुःखोदर्काणीति यावत्। योगो युक्तिस्तद्विहितं।\ सिध्यति

उपायो दृष्टोपायस्तस्याद्दृष्टप्रतिबंधेनाशक्यत्वात् तत्र मनो न ग्लपयेत्। अनुबंधान् प्रतिबंधान्। विपाकान् फलानि।
उत्थानं उद्यमं योग्यता। प्रमाणं कारणं। कोषादिषु त्रिषु स्थानादयस्त्रयः प्रत्येकं। दंडो। तत्र स्वधने। युक्त उद्युक्तः। रूपानि

उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः। अनुबंधानपेक्षेत सानुबंधेषु कर्मसु। संप्रधार्य च कुर्वीत न वेगेन समाचरेत्।
अनुबंधं च संप्रेक्ष्य विपाकं चैव कर्मणां। उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा। यः प्रमाणं न जानाति स्थाने वृद्धौ त
था क्षये। कोषे जनपदे दंडे न स राज्येवतिष्ठति। यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति। युक्तो धर्मार्थयोर्ज्ञाने स
राज्यमधिगच्छति। न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतं। श्रियं ह्यविनयो हंति जरा रूपमिवोत्तमं। भक्ष्योत्तमप्रतिच्छन्नं
मत्स्यो बडिशमायसं। लोभाभिपाती ग्रसते नानुबंधमपेक्षते। यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत्। हितं च परिणामे
यत्तदाद्यं भूतिमिच्छता। वनस्पतेरपक्वानि फलानि प्रचिनोति यः। स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति। यस्तु प
क्वमुपादत्ते काले परिणतं फलं। फलाद्रसं स लभते बीजाच्चैव फलं पुनः। यथा मधु समादत्ते रक्षन्पुष्पाणि षट्पदः। त
द्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया। पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्। मालाकार इवारामे न यथांगारकार
कः॥ किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः। इति कर्माणि संचिंत्य कुर्याद्वा पुरुषो न वा॥

पातित्वकृदशानिरूपमात्रेणापचनात्। अनुबंधं पश्चाद्बंधनं। प्रमाणं न जानातीत्यस्यैव निर्वचनं। कुर्याद्वा पुरुषो न वेति न
घाज्ञात्वा पुनर्विशेषः। दोषाणां रूहत्वादित्यर्थः॥

निःस्वं त्यागगताः अगता अपापाः केनचित्स्वर्णयातनादयः। कस्यचित्को धार्तिर्थिकः। अनुपिबन्नात्मनोऽन्तः कुर्वन्निवाच

उद्योग न चार्थस्याप्रवंल्पर्थाः केचित्त्यागेन यथागताः। कृतः पुरुषकारो हि भवेद्येषु निरर्थकः। न तं भर्तारमिच्छंति षंढं पतिमिव स्त्रियः कं। छिद्रदर्शी नरः प्राज्ञो लघुमूलान्महाफलान्। क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान्। ऋजुः पश्यति यः सर्वं चक्षुषानुपिबन्निव। आसीनमपि तूष्णीकमनुरज्यन्ति तं प्रजाः। सुपुष्पितः स्यादफलः फलितः स्याद्दुरारुहः। आमः पक्वसंकाशो न च शीर्येत कर्हिचित्। चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं। प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति। यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव। सागरान्तामपि महीं लब्ध्वा स परिहीयते। पितृपैतामहं राज्यं प्राप्तवान्स्वेन तेजसा। वायुरभ्रमिवासाद्य भ्रंशयत्यनयस्थितः। धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः। वसुधा वसुसंपूर्णा वर्द्धते भूतिवर्द्धनी। अथ संत्यजतो धर्ममधर्मं चानुतिष्ठतः। प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा। य एव यत्नः क्रियते परराष्ट्रविमर्दने। स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने। धर्मेण राज्यं विंदेत धर्मेण परिपालयेत्। धर्ममूलां श्रियं प्राप्य न जहाति न हीयते। अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः। सर्वतः सारमादद्यादश्मभ्य इव कांचनं॥ ५३

तु विविधमिति क्रियाविशेषणं। अनयस्थितो अनीत्या स्थितः। उक्तिनः। अतिसंवेष्टते संकोचयति। य एवि ति योग्यावात्मनत्वाच्छपरीमर्ष्यतः सर्वतोधावतोऽस्थिरस्य॥ परिमपि यितदनिवापाव॥

संचिन्वन्नात्मनि समुच्चयीकुर्वन् शिलाहारी कणिशाहारः शिलाकणिशं। कचित्तालवादिपावः। शिलश्चास्य तालवादेश्य दर्शनात्। तद्यामिति। यतेन सुशीलः स्यादित्युक्तं। इदं इति अबलायेक्ष्यावलीयानो बद्धः अनन्तनष्टा तिर्निलापवायमिंत मंडलं स्त्रातं बंधवास्ते तपः कर्तव्यत्वात्। योगेनाभ्यासेन। मृजया उद्वर्तनेन। मानेन प्रस्थादिना। अमितस्याचारेनपि

सुव्याहृतानि सूक्तानि सुकृतानि ततस्ततः। संचिन्वन्धीर आसीत शिलाहारी शिलं यथा। गंधेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः। चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः। भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा। अथ या सुदुहा राजन्नैव तां वितुदंत्यपि। यदतप्तं प्रणमति न तत्संतापयन्त्यपि। यच्च स्वयं नतं दारु न तत्संनामयन्त्यपि। एतयोपमया धीरः संनमेत बलीयसे। इंद्राय स प्रणमते नमते यो बलीयसे। पर्जन्यनाथाः पशवो राजानो मंत्रिबांधवाः। पतयो बांधवाः स्त्रीणां ब्राह्मणा वेदबांधवाः। सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते। मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते। धान्यमश्वान्रक्षत्यनुक्रमः। सुयत्नैर्रक्षते
अभीक्ष्णदर्शनं गावः। स्त्रियो रक्ष्याः कुचेलतः। न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः। अंत्येष्वपि हि जातानां वृत्तमेव विशिष्यते। य ईर्ष्युः परवित्तेषु रूपे वीर्ये कुलान्वये। सुखसौभाग्यसत्कारे तस्य व्याधिरनंतकः। अकार्यकरणाद्भीतः कार्याणां च विवर्जनात्। अकाले मंत्रभेदाच्च येन माद्येन्न तत्पिबेत्। विद्यामदो धनमदस्तृतीयोऽभिजनो मदः। मदा एतेऽवलिप्तानामेत एव सतां दमाः। असंतोऽभ्यर्थिताः सद्भिः किंचित्कार्यं कदाचन। मन्यंते संतमात्मानमसंतमपि विश्रुतं॥

न संतवात। अनुक्रमणं माक्रमणं नीराजनादि। अभीक्ष्णदर्शनं गाः। मध्ये ग्रामा धूलानेना असंसवाव। कुचेलता। नदाहवहिर्निगवति। प्रमाणं कारणं धर्मस्य विशिष्यते धर्महेतुत्वेन। ईर्ष्युरसहनः। अकार्यकरणादिद्वयं स्वयमर्थं॥

येनमह्येनमाह्येतत्तन्नाधिवेत्। अकाले फलनिष्पत्तेः आकाङ्क्षमनं चिन्तुंसंमे। क्षेत्रयावत्स्यात्। आत्मवतां चेतनमात्राणां। संपन्नतरं स्वादुतरं। अहृत्तिर्निर्वृत्तिः लाभः। ऐश्वर्यमदः पापिष्ठो निंदितनमोऽये मोमदेत्यः। शोहेशादित्यादिति॥ आक्रमणमात्रेनाघनं॥ पंचव

उद्योग

गतिरात्मवतां संतः संत एव सतां गतिः॥ असतां च गतिः संतो न त्वसंतः सतां गतिः॥ जिता सभा वस्त्रवता मिष्टाशा गोमता जिता। अध्वा जितो यानवता सर्वं शीलवता जितं। शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति। न तस्य जीवितेनार्थो न धनेन न बंधुभिः॥ आढ्यानां मांसपरमं मध्यानां गोरसोत्तरं। तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ। संपन्नतरमेवान्नं दरिद्रा भुंजते सदा। क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा॥ प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते। जीर्यंत्यपि हि काष्ठानि दरिद्राणां महीपते॥ अवृत्तिर्भयमंत्यानां मध्यानां मरणाद्भयं। उत्तमानां तु मर्त्यानामवमानात्परं भयं॥ ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः॥ ऐश्वर्यमदमत्तो हि नापतित्वा विबुध्यते॥ इंद्रियैरिंद्रियार्थेषु वर्तमानैरनिग्रहैः॥ तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव॥ यो जितः पंचवर्गेण सहजेनात्मकर्शिना। आपदस्तस्य वर्धंते शुक्लपक्ष इवोडुराट्। अविजित्य य आत्मानममात्यान्विजिगीषते। अमित्रान्वाजितामात्यः सोऽवशः परिहीयते॥ ५४

र्गेणावाह्यविषयेः। सहजेन शरीरसहोत्पन्नेन। आत्मानमविजित्य इंद्रियनियममकृत्वा अजितामात्यो अमात्यान्विजि त्वा मित्रजये परिहीयते॥

स्यात्रूपेण देशोऽदेहस्तद्रूपेण कर्मणा। एवं कृत्वा। अमात्यान्यद्विजिगायते। नतन्मोघं। विकारिणां विरुद्धकारिणां शत्रूणां। अर्थतो अर्थं सुखं दुःखं तन्मध्ये अर्थं विजानतीयावत्। एवमनर्थं तत्स्वत्र। पश्यता तन्मत्ता॥ अचिन्निखिदुः। दुःखाद्दिण अले

आत्मानमेव प्रथमं देशरूपेण यो जयेत्। ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते। वश्येंद्रियं जितात्मानं धृतदंडं विकारिषु। परीक्ष्यकारिणं धीरमत्यंतं श्रीर्निषेवते॥ रथः शरीरं पुरुषस्य राजन्नात्मा नियंतेंद्रियाण्यस्य चाश्वाः। तैरप्रमत्तः कुशली सदश्वैर्दांतैः सुखं याति रथीव धीरः। एतान्यनिगृहीतानि व्यापादयितुमप्यलं। अविधेया इवादांता हयाः पथि कुसारथिं॥ अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः। इंद्रियैरजितैर्बालः सुदुःखं मन्यते सुखं॥ धर्मार्थौ यः परित्यज्य स्यादिंद्रियवशानुगः॥ श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते॥ अर्थानामीश्वरो यः स्यादिंद्रियाणामनीश्वरः। इंद्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः। आत्मनात्मानमन्विच्छेन्मनोबुद्धींद्रियैर्यतैः। आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः॥ बंधुरात्मात्मनस्तस्य येनैवात्मात्मना जितः। स एव नियतो बंधुः स एव नियतो रिपुः॥ क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ। कामश्च राजन्क्रोधश्च तौ प्रज्ञानं विलुंपतः॥ समवेक्ष्येह धर्मार्थौ संभारान्योऽधिगच्छति। स वै संभृतसंभारः सततं सुखमेधते। यः पंचाभ्यंतरान्शत्रूनविजित्य मतान्नरान्। जिगीषति रिपूनन्यान्रिपवोऽभिभवंति तं। दृश्यंते हि दुरात्मानो ॥मतः क्षयात्र पादः॥ ॥मद्दा॥

निवंद्रियेः। एतेनाउपलक्षणं स्वक्रं। उक्तं सर्वतो। संभारान् साधनानि। मतः क्षयात् मनसः आश्रयात्॥

उद्योग

वत्सलता। उत्पत्त्यनंतरं पंचज्ञानेंद्रियाणि। पंचकर्मेंद्रियाणि। पंचविषयास्तान्पंचभूतानि। प्रियाजनानियच्छति॥ अनायास
तानां सर्वभूतेश्वरेण मे। आहारो विहितो धात्रा किमर्थं वार्यते त्वया। वृतश्चैष मया नागः स्थापितः समयश्च मे॥
अनेन च मया देव भर्तव्यः प्रसवो महान्। एतस्मिंस्तु तथाभूते नान्यं हिंसितुमुत्सहे। क्रीडसे कामकारेण देवराज यथेच्छके
सोऽहं प्राणान्विमोक्ष्यामि तथा परिजनो मम। ये च भृत्या मम गृहे प्रीतिमान्भव वासव। एतच्चैवाहमर्हामि भूयश्च बलवृत्र
हन्॥
त्रैलोक्यस्येश्वरो योऽहं परभृत्यत्वमागतः। तथा परिजनश्चैव भर्तव्यः॥

आदित्यायइतिमाहात्म्यादादोविष्णुःसंबोध्यः। उदर्ककारणं उदर्कफलकहुकं। एवंवदतइंद्रंप्रतिकृष्णवान्॥

उद्योग त्रिलोकस्यस्वाराज्यादेपरमृत्युमागतः। त्वयिनिहतिदवेशानविष्णुःकारणंमम। त्रैलोक्यराजराज्येहिचत्रिदिवा
सवशास्तुते। ममापिरक्षस्यसुताजननीकश्यपःपिता। अहमप्सुसहलोकानमंनोबाहुभेऊमा। अमर्त्यमवेत्तानाम
मापिविशुत्वंबलं। मयापिसुमहत्कर्म्मकृतंदितिविग्रहे। सुतस्त्रीःसुतामतस्त्रिविश्वामावनाप्तस्वैः। अनुतःकालका
रवान्डमयापिदितिजादत्ताः। यत्तुअहंस्यानगतायत्रास्यरिवगम्यहं। वदामिचेवाउतंतातनमामवमन्यास। कोन्योना
द्रो स्मंद्योस्तिकोन्योस्तिबलवत्तरः। मयायाहंविशिष्टसत्वदहामीमसबाधवं। अवज्ञायत्तुयद्दिद्रसात्रनाप्यवरापितः। तत
मगोरवंतत्वश्यास्माडवामवा। आदित्यायइमत्रातावलिविक्रमशालिनः। वामपोकिलसर्दिषांवलनबलवत्तरः॥
सोहंपत्तिकादर्शेनवशामिद्यागमत्कर्म। विश्वाव्रगानस्मातकोचनबलवानिति॥ ॥कश्यपउवाच॥ ॥मतस्यवच
नेसुवाखगस्योदर्ककारणं। अशोन्यस्तानपंकाह्सुवाचरथचकश्यत। गरुत्मन्यासत्मानंबलवंतंसुदुर्बलं। अल
मस्मसमद्यांतस्तोतुमात्मानमंडज। त्रिलोक्यामपिमेकृत्स्नमसकंदेहधारणे। अहमेवात्मनात्मानंवहामिचांवधारयत
इदंतावन्ममैकंवेबाहुंसव्येतरंवह। याद्यतेधारयास्यकंसफलंतेविकत्थितं। ततःसततगवांसस्यस्कंधेबाहुंसमा
सजत। निपपातसभारातेविह्वलोनष्टचेतनः। यावान्हिभारःकृत्स्नायाः॥ २०१

बलदाहोदयोष्मातेनविदग्धस्याव्याप्तस्या एतेदेवाः। एतान्दवान्॥

पृथिव्याःसहपर्वतैः। एकस्यादेहशाखायास्तावद्भारमसन्यतो। नत्वेनपीडयामासबलेनबलवत्तरः। ततोहिजीवितंतस्यतस्य
नीतराह्यच्युतः। व्याप्तास्यःस्रस्तकायश्चविचेताविक्लवःखगः। मुमोचपत्राणितदागुरुभारप्रपीडितः। सविष्णुंशिरसा
प्रणम्यविनतासुतः। विचेताविह्वलोदीनःकिंचिद्वचनमब्रवीत्। भगवन्लोकसारस्यसदृशेनवपुष्मता। भुजेन
स्वैरमुक्तेननिष्पिष्टोस्मिमहीतले। क्षंतुमर्हसिमेदेवविक्लवस्याल्पचेतसः। बलदाहविदग्धस्यपक्षिणोध्वजवासिनः। ते
नमत्वामहेवीर्यमास्तोतेनममप्रभो। ततःसभगवान्प्रसादंवैगरुत्मतो। मैवंभूयइतिस्नेहात्तदाचैनमुवाचह॥ ॥
कण्वउवाच॥ ॥तथात्वमपिगांधारेयावत्पांडुसुतान्रणे। नासादयसितान्वीरांस्तावज्जीवसिपुत्रक। भीमःप्रहरतांश्रे
वायुपुत्रोमहाबलः। धनंजयश्चेंद्रसुतोनहन्यातांतुकंरणे। विष्णुर्वायुश्चशक्रश्चधर्मस्तौचाश्विनावुभौ। एतेदेवास्त्वया
केनहेतुनावीक्षितुंक्षमाः। तदलंतेविरोधेनशमंगच्छनृपात्मज। वासुदेवेनतीर्थेनकुलंरक्षितुमर्हसि। प्रत्यक्षदर्शी धर्मसा
सर्वस्यनारदोयंमहातपाः। माहात्म्यंयत्तदाविष्णोःसोयंचक्रगदाधरः॥ ॥वैशंपायनउवाच॥ ॥दुर्योधनस्तुतच्छ्रुत्वानि
श्वसन्भृकुटीमुखः। राधेयमभिसंप्रेक्ष्यजहासस्वनवत्तदा। कदर्थीकृत्यतद्वाक्यमृषेःकण्वस्यदुर्मतिः। ऊरुंगजक
राकारंताडयन्निदमब्रवीत्। यथैवेश्वरसृष्टोस्मियद्भावीयाचमेगतिः। तथामहर्षेवर्तामिकिंप्रलापःकरिष्यति॥ ॥

मातलिं वराच्छ्रेष्ठं समाहितं॥ ॥भगवानृषिः पितामहो भीष्मः। उक्तं भीष्मेण तु नरव्वदर्शिना। भगवता विष्णुना मुकृतं मित्रं तिष्ठ

त्वद्योगे मातलिं वरान्वेषणे समाहितं॥ ॥जनमेजय उवाच॥ ॥अनर्थे जातनिर्बंधं परार्थे लोभमोहितं। अनार्यकेष्वभि
रतं मरणे कृतनिश्चयं। ज्ञातीनां दुःखकर्तारं बंधूनां शोकवर्धनं। कथं नैनं विमार्गस्थं वारयंतीह बांधवाः। सौहृदा वा सुहृत्स्नि
ग्धो भगवान्वा पितामहः॥ ॥वैशंपायन उवाच॥ ॥उक्तं भगवता वाक्यमुक्तं भीष्मेण यत्क्षमं। उक्तं बहुविधं चैव नारदे
नापि तच्छृणु॥ ॥नारद उवाच॥ ॥दुर्लभो वै सुहृच्छ्रोता दुर्लभश्च हितः सुहृत्। तिष्ठते हि सुहृद्यत्र न बंधुस्तत्र तिष्ठ
ते। श्रोतव्यमपि पश्यामि सुहृदां कुरुनंदन। न कर्तव्यश्च निर्बंधो निर्बंधो हि सुदारुणः। अत्राप्युदाहरंतीममितिहासं पुरातनं।
यथा निर्बंधतः प्राप्तो गालवेन पराजयः॥ विश्वामित्रं तपस्यंतं धर्मो जिज्ञासया पुरा। अभ्यगच्छत्स्वयं भूत्वा वसिष्ठो भग
वानृषिः। सप्तर्षीणामन्यतमं वेषमास्थाय भारत। बुभुक्षुः क्षुधितो राजन्नाश्रमं कौशिकस्य तु। विश्वामित्रोथ संभ्रांत
ः श्रपयामास वै चरुं। परमान्नस्य यत्नेन न च तं प्रत्यपालयत। अन्नं तेन यदा भुक्तमन्यैर्दत्तं तपस्विभिः। अथ गृह्या
न्नमत्युष्णं विश्वामित्रोप्युपागमत्। भुक्तं मे तिष्ठ तावत्त्वमित्युक्त्वा भगवान्ययौ। विश्वामित्रस्ततो राजन्स्थित एव महा 

ते यत्र तद्देशविषये न तत्र बंधुस्तिष्ठति। ततोपि सुहृद्वचः श्रेय इत्यर्थः। अतो वासुदेवस्य सुहृदो वचनं कर्तव्यमित्यर्थः।
श्रोतव्यं श्रोतुमुक्तं वाक्यमिति शेषः। वसिष्ठस्तु स्वयं धर्मोभ्यागच्छत्। न प्रत्यपालयत्। न प्रतीक्षितवान्।
तेन वसिष्ठेन॥

त्युपागमदृषिसमीपं। मूर्ध्ना बाहुभ्यां च प्रगृह्य। अभ्याशे समीपे आश्रमस्य। गौरवात् गुरुत्वात्। बहुमानान्मान

द्युतिः॥ भक्तं प्रगृह्य मूर्ध्ना वै बाहुभ्यां संशितव्रतः। स्थितः स्थाणुरिवाभ्याशे निश्चेष्टो मारुताशनः। तस्य शुश्रूषणे य
त्नमकरोद्गालवो मुनिः। गौरवाद्बहुमानाच्च हार्देन प्रियकाम्यया। अथ वर्षशते पूर्णे धर्मः पुनरुपागमत्। वासिष्ठं वेष
मास्थाय कौशिकं भोजनेप्सया। स दृष्ट्वा शिरसा भक्तं ध्रियमाणं महर्षिणा। तिष्ठता वायुभक्षेण विश्वामित्रेण धीमता। प्रति
गृह्य ततो धर्मस्तथैवोष्णं तथा नवं। भुक्त्वा प्रीतोस्मि विप्रर्षे तमुक्त्वा स मुनिर्गतः। क्षत्रभावादपगतो ब्राह्मणत्वमुपाग
तः। धर्मस्य वचनात्प्रीतो विश्वामित्रस्तदाभवत्। विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः। शुश्रूषया च भक्त्या च प्रीति
मानित्युवाच ह। अनुज्ञातो मया वत्स यथेष्टं गच्छ गालव। इत्युक्तः प्रत्युवाचेदं गालवो मुनिसत्तमं। प्रीतो मधुरया वाचा वि
श्वामित्रं महाद्युतिं। दक्षिणाः काः प्रयच्छामि भवते गुरुकर्मणि। दक्षिणाभिरुपेतं हि कर्म सिध्यति मानद। दक्षिणानां हि दा
ता वै अपवर्गेण युज्यते। स्वर्गे क्रतुफलं तद्धि दक्षिणा शांतिरुच्यते। किमाहरामि गुर्वर्थं ब्रवीतु भगवानिति। स जानं
स्तेन भगवान्जितः शुश्रूषणेन वै। विश्वामित्रस्तमसकृद्गच्छ गच्छेत्यचोदयत्। असकृद्गच्छ गच्छेति विश्वामित्रेण भाषित

नार्हत्वात्। शुश्रूषया वचनबाधेन। भक्त्या आत्मसमर्पणेन। विप्रर्षे नाशास्मि विप्रर्षीणां निष्ठितानां। अपवर्गेण दानेन। तत
तस्मात्। दक्षिणा शांतिरुच्यते। सः जानन्मानी दक्षिणाकर्म समाप्तिरिति॥

द्यावो हरितः कर्णैकतःश्यामशोचिषां॥ ॥गालवचरिते॥ ॥धर्मयज्ञात् दुरादयितुरं॥ अनीहया अनुद्यमेन। कृत्वा प्रणयं स्नेहानुवर्तिं॥

किंदानीतिवकुर्वो गालवः। प्रत्युवाच ता। निर्धनः स कुर्वो गालवस्य तपस्विनः। किंचिदागतमर्थं नो विश्वामित्रो ब्रवीदिदं
उद्योग एकतःश्यामकर्णानां हयानां चन्द्रवर्चसां। अष्टौ शतानि मे देहि गच्छ गालव मा चिरं॥ ॥इत्युद्योगे भगवद्याने गालवचरिते
॥ ॥नारद उवाच॥ ॥एवमुक्तस्तदा तेन विश्वामित्रेण धीमता। नास्ते न शेते नाहारं कुरुते गालवस्तदा। त्वगस्थिभूतो हरिण
श्चिन्ताशोकपरायणः। शोचमानोतिमात्रं स दह्यमानश्च मन्युना। कुतः पुष्टानि मित्राणि कुतोर्थाः संचयः कुतः। हयानां चन्द्र
शुभ्राणां शतान्यष्टौ कुतो मम। कुतो मे भोजने श्रद्धा सुखश्रद्धा कुतश्च मे। श्रद्धा मे जीवितस्यापि छिन्ना किं जीवितेन मे। अहं
पारे समुद्रस्य पृथिव्या वा परं परात्। गत्वात्मानं विमुञ्चामि किं फलं जीवितेन मे। अधनस्याकृतार्थस्य त्यक्तस्य विवि
धैः फलैः। ऋणं धारयमाणस्य कुतः सुखमनीहया। सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितं। प्रतिकर्तुमशक्तस्य जी
वितान्मरणं वरं। प्रतिश्रुत्य करिष्येति कर्तव्यं तदकुर्वतः। मिथ्यावचनदग्धस्य इष्टापूर्तं प्रणश्यति। न रूपमनृतस्यास्ति नानृत
स्यास्ति संततिः। नानृतस्याधिपत्यं च कुत एव गतिः शुभा। कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखं। अश्रद्धेयः कृतघ्नो हि २०३
कृतघ्ने नास्ति निष्कृतिः। न जीवत्यधनः पापः कुतः पापस्य तन्त्रणं। पापो ध्रुवमवाप्नोति विनाशं नाशयन्कृतं। सोहं पापः कृत

तेन व्रणलक्ष्मा। ईप्सितं प्रतिकर्तुं प्रत्युपकारत्वेन कर्तुमशक्तस्य अनृतस्यानृतानि धायितः। तं त्रणं कर्तुं धारणं॥

कृत्वा यत्नं प्राणमोक्षाय प्रतिष्ठन्तो स्थिरी भवंति। तं गालवमात्मानं दर्शयामास। प्राह्वा। सुहृदामन्येषां मध्ये सुहृत्कृतः॥ मम च विभवो व
मवावरजो विष्णुरेव धनमेवात्वान्यापत्तिं संभवात्। पूर्वमुक्तस्त्वदर्थं मम सखेवा। लवायधीतो भवति याचितः सर्वकाम

घ्नश्च कृपणश्चानृतोपि च। गुरोर्यः कृतकार्यः सन्तत्करोमि न भाषितं। सोहं प्राणान्विमोक्ष्यामि कृत्वा यत्नमनुत्तमं। अर्थिना न
न मया काचित्कृतपूर्वा दिवौकसां। मानयंति च मां सर्वे त्रिदशा यज्ञसंस्तरे। अथ तु विबुधश्रेष्ठं देवं त्रिभुवनेश्वरं। विष्णुं ग
च्छाम्यहं कृष्णं गतिं गतिमतां वरं। भोगा यस्मात्प्रतिष्ठंति व्याप्य सर्वान्सुरासुरान्। प्रणतो द्रष्टुमिच्छामि कृष्णं योगिनमव्य
यं। एवमुक्ते सखा तस्य गरुडो विनतात्मजः। दर्शयामास तं प्राह संहृष्टः प्रियकाम्यया। सुहृद्भवान्मम मतः सुहृदां च मतः
सुहृत्। ईप्सितेनाभिलाषेण योक्तव्यो विभवे सति। विभवश्चास्ति मे विप्र वासवावरजो द्विज। पूर्वमुक्तस्त्वदर्थं च कृतकाम
श्च तेन मे। स भवानेतु गच्छाव नयिष्ये त्वां यथासुखं। देशं पारं पृथिव्या वा गच्छ गालव मा चिरं॥ इत्युद्योगे गालवचरिते
॥ ॥सुपर्ण उवाच॥ ॥अनुशिष्टोस्मि देवेन गालव ज्ञातयोनिना। ब्रूहि कामं तु कां यामि द्रष्टुं प्रथमतो दिशं। पूर्वां वा द
क्षिणां वाथ अथवा पश्चिमां दिशं। उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव॥ ॥गालव उवाच॥ ॥यस्मादुदयते पूर्वं सुपर्ण
सर्वलोकप्रभावनः। सविता यत्र संध्यायां साध्यानां वर्तते तपः। यस्यां पूर्वं मतिर्जाता यया व्याप्तमिदं जगत्। चक्षुषी यत्र धर्मस्य यत्र
धर्मः प्रतिष्ठितः॥

तेन मे कृतस्त्वयि प्रीतो भूदीप्सितार्थः। अतो यद्भवतोपेक्षितं मया तावत्कर्तुं निष्करिष्यामि तद्दिगामना दिकं यदिच्छ
नयामि त्वामित्याह। सगच्छावेत्यादि। अनुशिष्टः अनुज्ञातः ज्ञातयोनिना अनेन विष्णुना॥

पूर्वं प्रथमं मतिबुद्धिः निष्प्रज्ञानामस्य तद्धेतोः। पूर्वदिक्शब्दितं मे वंशाधीनत्वात्। अतएव च यज्ञाध्यक्षं व्याहृति प्रथमा वारः तदर्थं प्रवर्ति
ता। वस्तुषी धर्मे मस्तस्यां च इमसौ। उद्यात्यनुगन्तव्या धर्मस्य तस्यो अत्र प्रथमदर्शनात्। एष धर्मो भविशिष्टिः कार्यत
उद्योग या॥ ॥ एतद्वेदवर्शीत्यति। मूलमिति। यतो मुखं यन्मुखं होतृणां तन्मुखत्वेन देवैषित्तदुपचारात्। अथ नो रक्षे पितृलोके न

कुतो यतो मुखे वेदत्वं मध्ये ते सर्वतो दिशः। एतदारं हि जश्चैव त्रिदिवस्य तथा ध्रुतः। तत्र पूर्वं प्रवृत्ता विद्याकायराः प्रजाः त्रि
यः। अस्यां दिशि श्वेदशास्त्रकश्यपयथात्मसंततः। अत्रो मूलं सुरासां श्रीर्यत्र शक्रो ध्याधिष्ठितः। सुरराज्येनवि प्रशीदविश्वा
त्तत्र पश्चितं। एतस्मात्कारणात्सूनूपूर्वे त्येषा दिगुच्यते। यस्मात्पूर्वतरे काले पूर्वमेवावृता सुरैः। एत एव च पूर्वेषां पू
र्वमाशां प्रचक्षते। पूर्वकार्याणि कार्याणि देवानि सुखमीप्सता। अत्र वेदान्जगौ पूर्वं भगवान्लोकभावनः। अत्र वा
कामविवासीत्सावित्री ब्रह्मवादिषु। अत्र दत्तानि सूर्येण यजूंषि द्विजसत्तम। अत्र लब्धवरः सोमः सुरैः क्रतुषु पीयते।
अत्र तृप्ता हुतवहाः स्वां योनिमुपभुंजते। अत्र पातालमाश्रित्य वरुणः श्रियमाप च। अत्र पूर्वं वसिष्ठस्य पौराणस्य द्विज
र्षेः। सूतिश्चैव प्रतिष्ठा च निधनं च प्रकाशते। ओंकारस्यात्र जायन्ते सूतयो दश तीर्दश॥ २०४

वंकारणां स्त्रियो दाक्षायण्यो दिव्याः। प्रजाः लोकाश्चं योतिं जन्मं उपभुंजते। तेषां पूर्वं संबंधो धोक्षित त्वात्। पौराणस्य पु
राणस्य कालनवस्य निधनं वसिष्ठस्य। निमिशापात्। सूतयो जन्मादि प्रकारभेदात्। दशतीर्दशादमसहस्रं दशतीरिति वा ओं
कारमिति जगति पूर्वमवत्सि॥

हविर्दानैर्वेदाः सर्वं नागशालायां। ध्यमिता शक्रेणाप्रज्ञा थीमाश्च बाध्यसुराश्चाप्यकृत माः। आचादपनुदं तितमाशु अ
पयति। लोकस्य पातालप्रस्थनरिता णां विशाय। पविशाख्यो॥ ॥ मानवस्त्रियो॥ सुवर्णं वरुणयतइति स्वो को वि

पिबंति सुनयायत्र हवि दानेस्मसामपाः। वोसितायत्रवदवो वराहाद्याश्चगावेनाशाकस्य यत्र नागो। पदिवितिषप
कल्पिताः। स्वबाहितारूवणानासुमाश्च पाश्चसुराः स्थाय। उदयस्तो हि सर्वा वैक्राधामंतिदिमावसुः। एतद्वारं त्रिलोकस्य स्वर्ग
स्य च सुखस्य च। एष पूर्वो दिशो भागो विशावाः यदीक्षसि। प्रियकार्ये हि मे तस्य यस्य स्मि वचने स्थितः। ब्रूहि गालवयास्या
मि श्रृणु चाप्यपरां दिशं॥ ॥इत्युद्योगपर्वणि वावघ्यानगालवचरिते॥ ॥ प्रपूर्वभागवा॥ ॥ इयं विवस्वता पूर्वं स्रौतेन विधिना वि
धिनाक्लिलागुरवे दक्षिणाद्वा रक्षिता सुचात सहि क्लृप्ता च लोकत्रयस्यास्य पितृपक्षः प्रतिष्ठितः। अत्रा भ्ययानां देवानां वि
नाशः श्रूयते द्विज। अत्र विश्वे सदा देवाः पितृभिः सार्धमासते। इज्यमानाः स्म लोकेषु संप्राप्तास्तुल्यभागताम्। एतद्वितीयं धर्म
॥ प्राण॥ स्य द्वारमाचक्षते द्विज। त्रुटिशो लवशश्चात्र गण्यते कालनिश्चयः। अत्र देवर्षयो नित्यं पितृलोकर्षयस्तथा। तथा राजर्षयः
सर्वे निवसंति गतव्यथाः। अत्र धर्मश्च सत्यं च कर्म चात्र निगद्यते। गतिरेषा द्विजश्रेष्ठ कर्मणा त्मावसादिनां। एषा दिक्सा द्विज
श्रेष्ठ यां सर्वः प्रतिपद्यते। वृता त्वनवबोधेन सुखं तेन न गम्यते। नैर्ऋतानां सहस्राणि बहून्यत्र द्विजर्षभ। सृष्टानि प्रतिकू

धिर्यज्ञः गुरवे कल्पपापधाणं निश्चयः आयुर्निश्चयः। आत्मावसादिनः पापस्य धर्मस्य उद्भागवो कं तद्धारकं वेदतालवा। अ
वराधेनमाप्नुहि॥ ॥ \\ प्राणनिश्चय इति वा पाठः॥

उद्योग

मंदरकुंजेषु यो गंधर्वाः स्त्रावित्तेमानाश्चद्विवहंति।। अत्र याहशो गाथा गीयंते तादृशात्पवब्रह्मसदने सामानि गाथा गीतं च श्रूयद
तेचश्रूयवतः ककुभितानानका नि।। श्रुगान्यतिहृतानि। तावता कालेन वहु लोकदारादयो हताऽस्याग तानानपञ्चपञ्चवनंगतऽत्य
थेः मर्यादास्था। पितामातःप्रस्थाप्य पादक्षिणायां तन्यतिक्रमणीयमिति। द्यानना चारणां तपमाऽस्थेष्ठः। सर्वा सर्वैः सर्वों पां

तानि दृष्टव्यान्यकृतात्मभिः। अत्र मंदरकुंजेषु विप्रर्षिसदनेषु च। गायंति गाथा गंधर्वाश्चित्तबुद्धिहरा द्विज। अत्र सामानि
गाथाभिः श्रुत्वा गीतानि रैवतः। गतदारो गतामात्यो गतराज्यो वनं गतः। अत्र सावर्णिना चैव यवक्रीतात्मजेन च। मर्यादा
स्थापिता ब्रह्मन्यास्य योनातिवर्तते। अत्र राक्षसराजेन पौलस्त्येन महात्मना। रावणेन तपश्चीर्त्वा सुरेभ्योऽमरता वृता। अत्र व
त्तमवामिवः धामाश्च नर्गहाति पर्वधा। अत्र दुष्कृतकर्माणो नराः पच्यंति गालव। अत्र वैतरणी नाम नदी। वैतरणी हर्ता
। अत्र गत्वा सुखस्यान्तं दुःखस्यान्तं प्रपद्यते। अत्रावृत्तो दिनकरः सुरसं क्षरति पयः। काष्ठां वासाधानिष्ठां हिमसुत्सृज
तेपुनः। अत्राहं गालव पुरा क्षुधार्तः परिचिंतयन्। लब्धवान् युध्यमानौ द्वौ बृहन्तौ गजकच्छपौ। अत्र चक्रधनुर्नाम सूर्या
ज्जातो महानृषिः। विदुर्यं कपिलं देवं येनार्ताः सगरात्मजाः।।

प्राणानंतरमत्र प्रासाः। प्राणादिष्वदेनपंचधा सुन त्वंगर्न्नि गच्छंति। वैतरणी वैतरणी नरके गामिभिः प्राणिभिः सुखस्यांत
नारान्प्राणान्प्रतिपद्यंते। अत्रावृत्तो दक्षिणायनंताऽपयोऽजलं क्षरति। दक्षिणायानहष्टिं नवति धानिष्ठां काष्ठां धनिष्ठां मा २०५
गस्य काष्ठां मकरराशिस्थेऽस्य प्रष्ठः। अत्र युवाधनताधनिष्ठः। तस्य काष्ठां धनिष्ठां काष्ठां।।

निर्याणकाले मृत्युकाले। तमो ध कारं नरकेषु। एषो विमार्गतिस्य एव। परिवा यस्या दिक्षणस्य। प्रतिष्ठास्थितिरुर्मिः पथ्या
अत्र सिद्धाः शिवा नाम ब्राह्मणा वेदपारगाः। अधीत्य सखिलान्वेदानलभन्मोक्षमव्ययम्। अत्र भोगवती नाम पुरी वासुकि
पालिता। तक्षकेण च नागेन तथैवैरावतेन च। अत्र निर्याणकाले तु तमः संप्राप्यते महत्। अभेद्यं भास्करेणापि स्वयं वा
कृष्णवर्त्मना। एष तस्यापि ते मार्गः परिचार्यस्य गालव। ब्रूहि मे यदि गंतव्यं प्रतीचीं शृणु चापरां।। ।।इत्युद्योगे गालव
चरिते।। सुपर्ण उवाच।। इयं दिग्दयिता राज्ञो वरुणस्य तु गोपतेः। सदा सलिलराजस्य प्रतिष्ठा चादिरेव च। अत्र प
श्चादहः सूर्यो विसर्जयति गाः स्वयं। पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तम। यादसामत्र राज्येन सलिलस्य च गुप्तये।
कश्यपो भगवान्देवो वरुणं स्माभ्यषेचयत्। अत्र पीत्वा समस्तान्वै वरुणस्य रसांस्तु षट्। जायते तरुणः सोमः शुक्ल
स्यादौ तमिस्रहा। अत्र पश्चात्कृता दैत्या वायुना संयतास्तदा। निश्वसंतो महावातैरर्दिताः सुषुपुर्द्विज। अत्र सूर्यं प्रण
यिनं प्रतिगृह्णाति पर्वतः। अस्तो नाम यतः संध्या पश्चिमा प्रतिसर्पति। अतो
लोक रात्रिश्च निद्रा च निर्गता दिवसक्षये। जायते जीवलोकस्य हर्तुमर्धमिवायुषः। अत्र देवीं दितिं सुप्तामात्मप्रसवधारिणीम्। वि
गर्भामकरोच्छक्रो यत्र जाता मरुद्गणाः। अत्र मूलं हिमवतो मंदरं याति शाश्वतम्। अपि वर्षसहस्रेण न चास्यान्तोऽधिगम्यते

दद्योकः प्रच्याज्ञाग नानासाविसर्जयति। पश्चात्कृता वेगन हतः कृताः। अत्र समवागनं। हलं हलं त्विमसन्निकृदे
नागः संतानाश्च धः ससीमा।। ।।

कांचनं बुद्बुदं रस्योदधेरूर्ध्वस्थानमात्रस्यं तज्जनदीरूपस्य सुवर्णशिरसा सुवानः हरिमेधसा सुतः तिष्ठ तिष्ठेति सूर्य्यं
उद्योग। स्पशामनात् अत्रवायुरादिरत्रष्टयक्तरवस्य स्पर्शमेव विंदु चति तनयति। आह्निकमरः संबंधि कालः एवं तेशामितिसं

अत्र कांचनशैलस्य कांचनांबुद्बुदस्य च। उदधेस्तीरमासाद्य सुरनिः करातपयः॥ अत्र मध्ये मरुतस्य कबंधः प्रतिहृष्य
तो। स्वनानी ग्रस्य कल्पस्यासामस्तं। ज्योतिर्धामतः॥ सुवर्णशिरसाप्यत्र हरिशरुक्ः प्रगायतः॥ अत्र हरणस्याश्रमयस्यस्त्र
यात विष्णुलो ध्वनिः॥ अत्र ध्वजवतीनामेतु मारी हरिमेधसः। आकाशानिष्ट तिष्टेति सा स्तो सूर्यस्पशामनात्॥ अत्रवायुस्तथा त
वह्निरापः खंचापि गालव॥ आह्निकं चैवनैशं च हृतस्पर्शं विसृचति। अत्रः पञ्चति सूर्यस्येति योगा वर्त्तते गति॥ अत्र ज्यो
तींषि सर्वाणि विशंत्यादित्यमंडलं॥ अष्टाविंशतिरात्रं च चंक्रम्य सह भानुना। निष्पतंति पुनः सूर्यात् सोमसंयोगयोगतः॥ अत्र
नित्यं स्रवंतीनां प्रभवः सागरोदयः॥ अत्र लोकत्रयस्याप त्रिपष्टिविरुणालयं॥ अत्र पन्नगराजस्याप्यनंतस्य निवेशनं॥ अत्र
नादिनिधनस्यात्र विष्णोः स्थानमनुत्तमं॥ अत्रानलसखस्यापि पवनस्य निवेशनं॥ महर्षेः कश्यपस्यात्र मारीचस्य निवेश
प नं॥ एवं ते वृद्धिमोमार्गो दिग्द्वारेण प्रकीर्त्तितः॥ बृहि गालव गच्छावो बुद्धिः का द्विजसत्तम॥ इत्युद्योगे गालवचरिते॥

वैदेलयर्थी॥ ज्योतींष्यश्विन्यादि नक्षत्राणि॥ अष्टाविंशतिरा अष्टाविंशतितमे दिने निष्पतंत्युत्पकं दिनं। चंद्रेण युक्ता। नक्षत्राणि पुनरुं २०६
त। तद्वाद॥ सोमसंयोगयोगतः इति अमावास्यान्तरेचंद्र सोमसंयोगापि सूर्यगा विशुद्धः इति। दिशा॥ सागरस्याद्यवङ्ग
वः॥ ॥ गालवचरिते॥ ॥

उत्तरस्य चस्य परिवारस्य स्थानस्य मार्गो गामन दिक्षु पश्चिमपूर्वाभ्यां दिग्भ्यां पश्चिमपूर्वयोर्मध्यगो मध्यमः॥ शुक्रस्यात्रः
उ सुपर्ण उवाच॥ यस्मादुत्तार्य्यते पापाद्यस्मान्निःश्रेयसोऽश्नुते। यस्मादुत्तारणबलादुत्तरेत्युच्यते द्विज। मार्गः पश्चिम
पूर्वाभ्यां दिग्भ्यां वैमध्यमः स्मृतः॥ अस्यां दिशि वरिष्ठायामुत्तरायां द्विजर्षभ। नासौम्यो नाविधेयात्मा नाधर्म्यो विशाते ज
नः॥ अत्र नारायणः कृष्णो जिष्णुश्चैव नरोत्तमः। बदर्य्यामाश्रमपदे तथा ब्रह्मा च शाश्वतः॥ अत्र वै हिमवत्पृष्ठे नित्य
परिष्कृत मास्ते महेश्वरः॥ शक्रस्यात्र पुरुषः सार्द्धं युगान्तामिसमप्रभः॥ न स दृश्यो मुनिगणैस्तथा देवैः सवासवैः। गंधर्वयक्ष
याव॥ सिद्धैर्वा नरनारायणाहृते। अत्र विष्णुः सहस्राक्षः सहस्रचरणोऽव्ययः। सहस्रशिरसः श्रीमानेकः पश्यति मायया॥
अत्र राज्येन विप्राणां चंद्रमा व्यभ्यषिच्यत। अत्र गंगां महादेवः पतंतीं गगनाच्च्युतां। प्रतिगृह्य ददौ लोके मानुषे ब्र
ह्मवित्तम॥ अत्र देव्या तपस्तप्तं महेश्वरपरीप्सया। अत्र कामश्च रोषश्च शैलश्चोमा च संबभुः॥ अत्र राक्षसयक्षाणां ग
धर्वाणां च गालव। आधिपत्येन कैलासे धनदोप्यभिषेचितः॥ अत्र चैत्ररथं रम्यमत्र वैखानसाश्रमः॥ अत्र मंदाकिनी चै
व मंदरश्च द्विजर्षभ। अत्र सौगंधिकवनं नैरृतैरभिरक्ष्यते॥ शाद्वलं कदलीस्कंधं अत्र संतानका नगाः॥ अत्र संयमनि
त्यानां सिद्धानां स्वैरचारिणां। विमानान्यनुरूपाणि कामभोग्यानि गालव॥ अत्र ते ऋषयः सप्त देवी चारुंधती तथा॥ अत्र
तिष्ठति वै स्वातिरत्रास्या उदयः स्मृतः॥ अत्र यज्ञं समासाद्य ध्रुवं स्थाता पितामहः। ज्योतींषि चंद्रसूर्यौ च परिवर्त्तंति नित्य

तिरूपया। तमयामाद्दी। सुगांता। भिन्नाकृता। यत्र रूपेण परिष्कृतः अलंकृतः॥

गां॰ध्वर॰ उद्योग

गायंति कावेरकाख्य अनिलविशोषस्य वारं न कुर्वंति कमदाचारक्रिया। परिव्राजोऽस्मि गालवः॥ विलीयति तत्र यतिस्तु शरीरतो

ऽः॥ अवगायंति कावेरं ह्रदं निद्विजसत्तम। धर्ममानाममदात्मानो ऽनयमत्यपवादिनः॥ नतपांज्ञायतस्तु तिर्नकुतिर्न
तपश्चितं परिव्राजसदस्या गोकामान्नाप्याति गालवा यथा यथा प्रविशति तत्मात्परतरं नरः॥ तथा तथा द्विजश्रेष्ठ
अविलायति गालव॥ नितान्तं नविदंत्येनगानतर्द्वं द्विज। पंक्तं कान्तनारायणं देवं तत्र वातिस्मुमव्ययं॥ अत्र किं नाम
निस्तुकं स्थानमिलविलस्य तत्॥ अत्र विद्युत्स्नानामज्ञिरस्पारसादश॥ अत्र विष्णुपदं नाम कामता विष्णुनाक्र
तं॥ त्रिलोकविक्रमे ब्रह्मसुवरां दिशमाश्रितं॥ अत्र राज्ञा मरुंतेन यज्ञेनेष्टं द्विजोत्तम। उशीरबीजे विशाखयूपत्र
जांबूनदं सरः॥ जीमूतस्यात्र विप्रर्षेरुपतस्थे महात्मनः॥ साक्षाद्धिमवतः पुण्यो विमलः कनकाकरः॥ ब्राह्मणे
भ्यश्च कृत्स्नं स तं कृत्वा धनं महत्। ववे धनं महर्षिः स जैत्रं तत्र धनं ततः॥ अत्र नित्यं दिशां पालाः सायंप्रातर्द्विजर्षभ॥
कस्य कार्यं किमिति वै परिक्रोशंति गालव। एवमेषा द्विजश्रेष्ठ गुणैरन्यैर्दिगुत्तरा। उत्तरेति परिख्याता सर्वक
र्मसु चोत्तरा॥ एता विस्तरतस्तात तव संकीर्तिता दिशः॥ चतस्रः क्रमयोगेन कामाशां गंतुमिच्छसि। उद्यतोऽहं द्विज
श्रेष्ठ तव दर्शयितुं दिशः॥ पृथिवीं चाखिलां ब्रह्मन् तस्मादारोह मां द्विज॥ इत्युद्योगे भगवद्याने गालवचरिते

स्वाध्ययन जीमूतस्य उपसमीपे तस्थौ हिमवतः कनकाकरः॥ स्वं तं ज्ञात्वा न कसं दत्तमित्यर्थः॥ वद्धे ब्राह्मणेभ्यः २०३
॥मन्त्रामकामतदस्त्विति॥ ॥गालवचरित॥

आत्मनः शरीरस्य कारणं। जीवात्मानं। ब्रह्मवध्यामनुस्मरन्। शंकमानाम अत्र धेन। मोमिस्य ऽद्रुषा। तिर्वाप्य मंत्रोक्त्या शाम्य

गालव उवाच॥ ॥गरुत्मन् भुजगेंद्रारे सुपर्ण विनतात्मज। नय मां तार्क्ष्य पूर्वेण यत्र धर्मस्य चक्षुषी॥ पूर्वमेतां दिशं गच्छ या प्र
थे परिकीर्तिता। दैवतानां हि सा निध्यमत्र कीर्तितवानसि॥ अत्र सत्यं च धर्मश्च त्वया सम्यक् प्रकीर्तितः॥ इच्छेयं तु समा
गंतुं समस्तैर्हि दैवतैरहं॥ भूयश्च तान् सुरान् द्रष्टुमिच्छेयमरुणानुज॥ नारद उवाच॥ तमाह विनतासूनुर्विरो
हस्व तिवि द्विजं॥ आरुरोहाथ स मुनिर्गरुडं गालवस्तदा॥ गालव उवाच॥ क्रममाणस्य ते रूपं दृश्यते पन्नगाशन। भास्कर
स्येव सहस्रांशोर्विवस्वतः॥ पक्षवाताप्रणुन्नानां वृक्षाणामनुगामिनाम्। प्रस्थितानामिव समं पश्यामीह गतिं खग॥ ससागरवनामुर्वीं सशैलवनकाननां।
आकर्षन्निव चाभासि पक्षवातेन खेचर॥ समीननागनक्रं च खमिवारोप्यते जलं॥ वायुना चैव महता पक्षवातेन चानिशं॥
तुल्यरूपाननान्मत्स्यांस्तिमितिमिंगिलांस्तथा॥ नागांश्च नररूपाश्च पश्याम्युन्मथितानिव॥ महार्णवस्य च रवैः श्रो
त्रे मे बधिरीकृते॥ न शृणोमि न पश्यामि नात्मनो वेद्मि कारणं॥ शनैः सन्तु भवान् यातु ब्रह्मवध्यामनुस्मरन्॥ न दृश्यते रविस्ता
त न दिशो न च खं खग॥ तम एव तु पश्यामि शरीरं ते न लक्षये॥ मणी व जात्यौ पश्यामि चक्षुषी तेऽहमंडज॥ शरीरे तु न पश्यामि तव
चैवात्मनश्चाहं॥ पदे पदे तु पश्यामि सलिलादग्निमुत्थितं॥ स मामाशु निर्वाप्य महसा चक्षुषी शाम्यते पुनः॥ तन्निवर्त महाभाग गम
न विनतात्मज॥ न मे प्रयोजनं किंचिद्गमने पन्नगाशन॥ संनिवर्त महाभाग न वेगं विषहामि ते॥ गुरवे संश्रुतानीह शता

नि। निवाति हयोमार्गः सागरपन्नगः॥

रूपिणि मा ऽन्याधीनः कालो नाशकालः ॥ परमेश्वर एवं । तस्मान्न स्वेच्छया मरणमपि संभवतीत्यर्थः ॥ नाभिचोदितः गुरुर । स्त्रिया नि
न्यशेदिवा निशि नां । एकतः पश्यामकर्णानां शुभ्राणां चन्द्रवर्चसां ॥ तेषां चैवापवर्गाय मार्गं पश्यामि नाण्डज । ततो यं जी
वितस्या गृहस्थो मामाणीयमात्मनः ॥ निवमस्ति धनं किंचिन्न धनान्वितः सुहृत् । न चार्थेनापि महता शक्यमेतद्व्यपो
हितुं । एवं बहुविधं दीनं वदन्तं गालवं तदा । प्रत्युवाच वदतां श्रेष्ठः प्रहसन्विनतात्मजः ॥ नातिप्रज्ञोऽसि विप्रर्षे योऽत्मानं
त्यक्तुमर्हसि । न चापि कृत्रिमः कालः कालो हि परमेश्वरः ॥ किमहं पूर्वमेवेह भवता नाभिचोदितः ॥ उपायोऽत्र महान
स्ति येनैतदुपपद्यते । तदेष ऋषभो नाम पर्वतः सागरान्तिके । अत्र विश्रम्य भुक्त्वा च निवर्तिष्याव गालव ॥ ॥
इत्युद्योगे गालवचरिते ॥ नारद उवाच ॥ ॥ ऋषभस्य ततः शृङ्गे निपत्य स द्विजाण्डजौ । शाण्डिलीं ब्राह्मणीं तत्र ददृ
शाते तपोन्विताम् । अभिवाद्य सुपर्णस्तु गालवश्चाभिवाद्य तां । उवाच स्वागतं ताभ्यां विष्टरे संनिषीदतं ॥ सिद्धमन्नं
तयादत्तं बलिमन्त्रोपबृंहितं । भुक्त्वा तृप्तावुभौ भूमौ सुप्तौ तावन्नमोहितौ । मुहूर्तात्प्रतिबुद्धस्तु सुपर्णो गमनेप्सया
। अथ भ्रष्टतनूजाङ्गमात्मानं ददृशे खगः ॥ मांसपिण्डोपमोऽभूत्स मुखपादान्वितः खगः ॥ गालवस्तं तथा दृष्ट्वा विष
ण्णः पर्यपृच्छत । किमिदं भवता प्राप्तमिहागमनजं फलं । वासोऽयमिह कालं तु कियन्तं नौ भविष्यति । किं नु ते मन
सा ध्यातमशुभं धर्मदूषणं ॥

मित्रं । उपायो हितस्यात्र विवास्रि ॥ ॥ गालवचरित ॥ ॥



व्यभिचारो धर्मातिक्रमः ॥ अनयाहं तोषित्वात् । शोचता कथ्यामपायं वसतीति ॥
न ह्ययं भवतः स्वल्पो व्यभिचारो भविष्यति । सुपर्णोऽथाब्रवीद्वाक्यं प्रध्यातं वै मया द्विज । इमां सिद्धामितो नेतुं तत्र यत्र प्र
जापतिः ॥ यत्र देवो महादेवो यत्र विष्णुः सनातनः ॥ यत्र धर्मश्च यज्ञश्च तत्रेयं निवसेदिति । सोऽहं भगवतीं याचे प्रणतः प्रिय
काम्यया । मयैतन्नाम प्रध्यातं मनसा शोचता किल । तदेवं बहुमानात्ते मयेहानीप्सितं कृतं । सुकृतं दुष्कृतं वा त्वं माहात्म्यात्
क्षन्तुमर्हसि । सा तौ तदाब्रवीत्तुष्टा पतगेन्द्रद्विजर्षभौ । न भेतव्यं सुपर्णोऽसि सुपर्ण त्यज संभ्रमं । निन्दितास्मि त्वया वत्स
न च निन्दां क्षमाम्यहं । लोकेभ्यः स परिभ्रश्येद्यो मां निन्देत पापकृत् । हीनया लक्षणैः सर्वैस्तथानिन्दितया मया । आ
चारं प्रतिगृह्णन्त्या सिद्धिः प्राप्तेयमुत्तमा । आचारः फलते धर्ममाचारः फलते धनं । आचाराच्छ्रियमाप्नोति आचारो हन्त्यल
क्षणं । तदायुष्मन्खगपते यथेष्टं गम्यतामितः ॥ न च ते गर्हणीयापि गर्हितव्याः स्त्रियः क्वचित् । भवितासि यथापूर्वं बलवी
र्यसमन्वितः ॥ बभूवतुस्ततस्तस्य पक्षौ द्रविणवत्तरौ । अनुज्ञातश्च शाण्डिल्या यथागतमुपागमत् । न चैवासादयामास त
थारूपांस्तुरङ्गमान् । विश्वामित्रोऽथ तं दृष्ट्वा गालवं चाध्वनि स्थितं । उवाच वदतां श्रेष्ठो वैनतेयस्य संनिधौ । यस्त्वया स्वयमेवा
र्थः प्रतिज्ञातो मम द्विज । तस्य कालोऽपवर्गस्य यथा वा मन्यते भवान् । प्रतीक्षिष्याम्यहं कालमेतावन्तं तथा परं । यथा संसि
ध्यति विप्र स मार्गस्तु निशाम्यतां । सुपर्णोऽथाब्रवीद्दीनं गालवं भृशदुःखितं । प्रत्यक्षं खल्विदानीं मे विश्वामित्रो यदुक्तवान् ।

गालवचरित॥ ॥द्विर्बद्धिः षोडशैः क्रांकिंचिदकथाः इरनाशेना विनिगमदर्शनात् । रणोरमणीयायावास्यगतचाग्निना जनितं वा
सुनाच निवईयता वर्धितं तमिति तत्रन्मयत्वात् । मर्दयत मित्यग्निमनसंबंधः । हिरण्मयमित्युच्यात हिरण्यं च सर्वधनं । यस्त्वत्

तदागच्छ द्विजश्रेष्ठ मंत्रयिष्याव गालव । नादत्वा गुरवे शक्यं कृत्स्नमर्थं त्वयासितुं ॥ इत्युद्योग भगवद्याने गालवच
रिते ॥ ॥नारद उवाच ॥ अथाह गालवं दीनं सुपर्णः पततां वरः । निर्मितं वह्निना भूमौ वायुना वर्धितं तथा । यस्मा
द्धिरण्मयं सर्वं हिरण्यं तेन चोच्यते । धत्ते धारयते चेदमेतस्मात्कारणाद्धनं । तदेतत्त्रिषु लोकेषु धनं तिष्ठति शाश्वतं ॥
नित्यं प्रोष्ठपदाभ्यां च शुक्रे धनपतौ तथा । मनुष्येभ्यः समादत्ते शुक्रश्चित्ताज्जितं धनं । अजैकपादहिर्बुध्न्यैरक्ष्यते धनदेन च ।
एवं न शक्यते लब्धुमलब्धव्यं द्विजर्षभ । ऋते च धनमश्वानां नावाप्तिर्विद्यते तव । स त्वं याचात्र राजानं कंचिद्राजर्षिवंशजं ॥
अपीड्य यो राजा पौरान् हि यो नः कल्पयेत् कृतार्थिनः । अस्ति सोमान्वयो जातः कश्चिन्नृपः सखा । अभिगच्छाव हन्तं वै तस्या
स्ति वित्तं वा भुवि । ययातिर्नाम राजर्षिर्नाहुषः सत्यविक्रमः । स दास्यति मया चोक्तो भवता चार्थितः स्वयं । विभवश्चास्य सुम
हानासीद्धनपतेरिव । एवं स तु धनं विद्वान् दानेनैव व्यशोधयत् । तथा तौ कथयन्तौ च चिन्तयन्तौ च यत्क्षमं । प्रतिष्ठाने नरप
तिं ययातिमुपतिष्ठतां ॥ प्रतिगृह्य च सत्कारं अर्घ्यपाद्यादिकं वरं ।

यस्माद्धिपितस्यार्थस्यावाप्तानां तां धनं तु प्राप्ति धारयतजीवति पंचवाद्याग्निसक्कृत्रिषु लोकेषु धनं तिष्ठते वे प्रोष्ठपदयोर्नद्वयोः शुक्रे
धनपतौ कुबेरे चंति तयाऽपायाचितो महत्स्वर्ममध्यर्जकेन शुक्रेण एवादत्त । एवमतेकैरक्षितत्वात् । अलब्धव्यं कर्मणा गुरुणा कारणाद्वा चासियोग्य २०७

निकृतार्थिनां कृतार्थीकुयति । स्वादृशाश्च काश्यपात्मजस्य तः । निदर्शनं प्रमाणं तपसः । गालवस्य । अतकः कालं शुश्रूषासंततपः स

दृष्ट्वा गमनाय त्वं प्रोवाच विनतासुतः । अयं मनोऽनुष्ठस्ख गालवस्त्वयमानितेः । विश्वामित्रस्य शिष्यो मे हृद्यार्णपस्तु तत्राच्छप
।सोयं तेनाप्यनुज्ञातः उपकारस्मयाद्विजः । गतमाह भगवान्काले दानियुरुदक्षिणां । अप्यसकृत्तेन बाक्केन किंचिदागतमन्युना
अयमुक्तः प्रयच्छेति जानता विभवं लघु । एकतः श्यामकर्णानां शुभ्राणां शुद्धजन्मनां । अष्टौ शतानि मामादहि हयानां चंद्र
वर्चसां गुर्वर्थो दीयतामेष यदि गालव मन्यसे । इत्येवमाह सक्रोधो विश्वामित्रो महातपाः । सोयं शोकेन महता तप्यमा
नो द्विजर्षभः । अशक्तः प्रतिकर्तुं तद्भवंतं शरणं गतः । प्रतिगृह्य नरव्याघ्र त्वत्तो भिक्षां गतव्यथः । कृत्वापवर्गं गुरवे चरिष्यति महत् ना॰
तपः । तपसः संविभागेन भवंतमपि योक्ष्यते । स्वेन राजर्षितपसा पूर्णं त्वां पूरयिष्यति । यावंति रोमाणि हये भवंति हि नर
श्वर । तावतो वाजिनो लोकान्प्राप्नुवंति महीपते । शंखे क्षीरमिवासक्तं भवत्वेतत्तथोपमं ॥ ॥इत्युद्योग गालवचरिते
॥ ॥नारद उवाच ॥ ॥एवमुक्तः सुपर्णेन तथ्यं वचनमुत्तमं । विमृश्यावहितो राजा निश्चित्य च पुनः पुनः । यष्टा क्रतुसहस्र
वस्र स्य दाता दानपतिः प्रभुः । ययातिः सर्वकाशीशः इदं वचनमब्रवीत् । दृष्ट्वा प्रियसखं तार्क्ष्यं गालवं च द्विजर्षभं । निदर्शनं
च तपसो भिक्षां श्लाघ्यां च कीर्तितां । अतीत्य नृपतीन्सर्वान् आदित्यकुलसंभवान् । मत्सकाशमनुप्राप्तावेतौ बुद्धिमवेक्ष्य
च । अद्याहमनघो जन्म तारितं चाद्य मे कुलं । अद्यायं तारितो देशो मम तार्क्ष्य त्वयानघ । वक्तुमिच्छामि तु सखे यथा जा

सुहृदिमन्नमाप्यति॥

नाभिमां वरा। नतश्चा वित्तवानस्मि स्ताणं वित्तं हि मम सखा। न च शक्यो ऽस्मि तत्कर्तुं प्राप्तमागमनं खग। न चाशामस्य विप्रर्षेर्वितथां कर्तुमुत्सहे। नन्तु दास्यामि यत्कार्यमिदं संपादयिष्यति। अभिगम्य हताशो हि निवृत्तो दहते कुलं। नातःपरं विनतज किंचित्पापिष्टमुच्यते। यथाशानेशनाल्लोके देहि नास्तीति वावदः। हताशो ह्यकृतार्थःसन् हतः संभावितो नरः। हिनस्ति तस्य पुत्रांश्च पौत्रांश्चाकुर्वतो हितं। तस्माच्चतुर्णां वंशानां स्थापयित्री सुता मम। इयं सुरसुतप्रख्या वंशानां सर्वधर्मोपचायिनी। सदा देवमनुष्याणामसुराणां च गालव। कांक्षिता रूपतो बाला सुता मे प्रतिगृह्यतां। अस्या शुल्कं प्रदास्यंति नृपा राज्यमपि ध्रुवं। किं पुनः श्यामकर्णानां हयानां द्वे चतुःशते। स भवान्प्रतिगृह्णातु ममेमां माधवीं सुतां। अहं दौहित्रवान्स्यां वै वर एष मम प्रभो। प्रतिगृह्य च तां कन्यां गालवः सह पक्षिणा। पुनर्द्रक्ष्याव इत्युक्त्वा प्रतस्थे सह कन्यया। उपलब्धमिदं द्वारमश्वानामिति चांडजः॥ उक्त्वा गालवमापृच्छ्य जगाम भवनं स्वकं। गते पतगराजे तु गालवः सह कन्यया। चिंतयानः क्षमं दाने राज्ञां वै शुल्कतो गमत्॥

ददास्मि क्रोनं तरसास्मातिवचोददिनास्मि इति वचो यथाचाचानाशनानापापिष्टं वाकाशो ऽवधारणे। अथ्युल्पस्यास्य दानात्तथा स्माल्लतरुच्वतेः अल्पादाने हिनताह्यदोषं मनाविनमावायाविषयीक्रनो चतुर्णामिष्टधर्माणां। वंशानां स्थापयित्री तिदेवज्ञादिति रूक्कवाता। तिष्ठितं वणापद्कितातधर्मः। सर्वधर्माणां मपचायिनी वृद्धिका। मातृपां धर्माणां यागादिधर्मः। राज्ञां मध्ये दाने क्षमं चिंतयानः शुल्कतः शुल्कनिमित्तमागमत्॥ टीका अति ४ २२७

शाम्यं तं वहं तपउवमं प्रजार्थी बहुकर स्रवयोः कुवयो स्यात प्रत्वात्मसुमंबंधकइन्नता स्वनयानि नवयाश्च कुणो स्मृतिवा॥ समस्तु दूत्यकरणाहकरणायास्तु खे। काशाचतितिष्ठानां नीराना निरुदयं वास्तु। पंचसुरक्षाकरयास्य रणायास्थ तदा वक्तव्या

सा गत्वा नरपतिश्रेष्ठं हर्यश्वं राजसत्तमं। अयोध्यायां महावीर्यं चतुरंगबलान्वितं। कोशधान्यबलोपेतं प्रियपौरं द्विजप्रियं। प्रजाभिकामं शाम्यंतं कुर्वाणं तप उत्तमं। तमुपागम्य विप्रः स हर्यश्वं गालवोब्रवीत्। कन्येयं मम राजेंद्र प्रसवैः कुलवर्धिनी। इयं शुल्केन भार्यार्थं हर्यश्व प्रतिगृह्यतां। शुल्कं ते कीर्तयिष्यामि तच्छ्रुत्वा संप्रधार्यतां॥ ॥इति श्री उद्योगपर्वणि भगवद्याने गालवचरिते॥ नारद उवाच॥ ॥हर्यश्वस्त्वब्रवीद्राजा विचिंत्य बहुधा ततः। दीर्घमुष्णं च निःश्वस्य प्रजाहेतोर्नृपोत्तमः। उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु सप्तसु। गंभीरा त्रिषु गंभीरेष्वियं रक्ता तु पंचसु। बहुदेवासुरालोका बहुगंधर्वदर्शना। बहुलक्षणसंपन्ना बहुप्रसवधारिणी। समर्थेयं जनयितुं चक्रवर्तिनमात्मजं। ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम॥ गालव उवाच॥ ॥एकतः श्यामकर्णानां शतान्यष्टौ प्रयच्छ मे। हयानां चंद्रशुभ्राणां देशजानां वपुष्मतां। ततस्तव भवित्रीयं पुत्राणां जननी शुभा। अरणीव हुताशनानां योनिरायतलोचना॥ ॥नारद उवाच॥ स तच्छ्रुत्वा वचो राजा हर्यश्वः काममोहितः। उवाच गालवं दीनो राजर्षिरृषिसत्तमं। द्वे मे शते संनिहिते हयानां यद्विधास्तव। एष्टव्याः शतशस्त्वन्ये चरंति मम वाजिनः। सोहमेकमपत्यं वै जनयिष्यामि गालव। अस्यामेतं भवान्कामं संपादयतु मे वरं॥ मे

सुरारक्षा ईषदसमासो बहुवचनांदसवादप्रकृतिलिंगत। अरक्कं जालं। देवासुरप्रायजालं॥

पवस्तवरश्चापि वकुलनदशोत्यादोदकृशष्टएवा वसुरथिस्तथाय॥ यारेस्मै गतिमागयामीत्युवयः॥

उद्यो० ग एवमुक्तस्तु सा कन्या गालवं वाक्यमब्रवीत्॥ ॥कन्योवाच॥ ॥मम दत्तो वरः कश्चित्केनचिद्ब्रह्मवादिना॥ प्रसूत्यंते प्रसूत्यंते
कन्यैव त्वं भविष्यसि॥ स त्वं ददस्व मां राज्ञे प्रतिगृह्य हयोत्तमान्॥ नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि वै॥ भविष्यंति तथा पुत्रा
मम चत्वार एव च॥ क्रियतां मम संहारो गुर्वर्थं द्विजसत्तम॥ एषा तावन्मम प्रज्ञा यथा वा मन्यसे द्विज॥ एवमुक्तस्तु स मुनिः कन्यया गाल
वस्तदा॥ हर्यश्वं पृथिवीपालमिदं वचनमब्रवीत्॥ इयं कन्या नरश्रेष्ठ हर्यश्व प्रतिगृह्यतां॥ चतुर्भागेन शुल्कस्य जनयस्वैकमात्मजं॥
प्रतिगृह्य स तां कन्यां गालवं प्रतिनंद्य च॥ समये देशकाले च लब्धवान्सुतमीप्सितं॥ ततो वसुमना नाम वसुभ्यो वसुमत्तरः॥ व
सुप्रख्यो नरपतिः स बभूव वसुप्रदः॥ अथ काले पुनर्धीमान्गालवः प्रत्युपस्थितः॥ उपसंगम्य चोवाच हर्यश्वं प्रीतिमा
नसं॥ जातो नृप सुतस्तेयं बालो भास्करसंनिभः॥ कालो गंतुं नरश्रेष्ठ भिक्षार्थमपरं नृपं॥ हर्यश्वः सत्यवचने स्थि
तः स्थित्वा च पौरुषे॥ दुर्लभत्वाद्धयानां च प्रददौ माधवीं पुनः॥ माधवी च पुनर्दीप्तां परित्यज्य नृपश्रियं॥ कुमारी कामतो भू ज्य
त्वा गालवं पृष्ठतोऽन्वगात्॥ त्वय्येव तावत्तिष्ठंतु हया इत्युक्तवान्द्विजः॥ प्रययौ कन्यया सार्धं दिवोदासं प्रजेश्वरं॥ ॥इत्यु
घ। द्योगपर्वणि गालवचरिते॥ ॥गालव उवाच॥ ॥महावीर्यो महीपालः काशीनामीश्वरः प्रभुः॥ दिवोदास इति
ख्यातो भैमसेनिर्नराधिपः॥ तत्र गच्छाव २११

ग च

देवदेवातिरथमाश्रुत्य धार्मिकः सत्यमेशुकः सत्यि वि वनरेश्वरः॥ ॥नारद उवाच॥ ॥तमुपागम्य स मुनिर्न्यायतस्तेन स
त्कृतः॥ गालवः प्रसवस्यार्थे तं नृपं प्रत्यचोदयत्॥ ॥दिवोदास उवाच॥ ॥श्रुतमेतन्मया पूर्वं किमुक्त्वा विस्तरं द्विज॥ कांक्षि
तो हि मयैषोऽर्थः श्रुत्वैव द्विजसत्तम॥ एतच्च मे बहुमतं यदुत्सृज्य नराधिपान्॥ मामेवमुपयातोऽसि भावि चैतदसंशयं॥ स ए
व विभवोऽस्माकमश्वानामपि गालव॥ अहमप्येकमेवास्यां जनयिष्यामि पार्थिवं॥ तथेत्युक्त्वा द्विजश्रेष्ठः प्रादात्कन्यां महीपतेः॥
विधिपूर्वं च तां कन्यां गालवः प्रतिगृहीतवान्॥ रेमे तस्यां स राजर्षिः प्रभावत्यां यथा रविः॥ स्वाहायां च यथा वह्निर्यथा शच्यां च वास
वः॥ यथा चंद्रश्च रोहिण्यां यथा धूमोर्णया यमः॥ वरुणश्च यथा गौर्यां यथा चर्द्ध्यां धनेश्वरः॥ यथा नारायणो लक्ष्म्यां जाह्नव्यां च यथो
दधिः॥ यथा रुद्रश्च रुद्राण्यां यथा वेद्यां पितामहः॥ अदृश्यंत्यां च वासिष्ठो वसिष्ठश्चाक्षमालया॥ च्यवनश्च सुकन्यायां पुलस्त्य
ः संध्यया यथा॥ अगस्त्यश्चापि वैदर्भ्यां सावित्र्यां सत्यवान्यथा॥ यथा भृगुः पुलोमायामदित्यां कश्यपो यथा॥ रेणुकायां यथा
र्चीको हैमवत्यां च कौशिकः॥ बृहस्पतिश्च तारायां शुक्रश्च शतपर्वया॥ यथा भूम्यां भूमिपतिरुर्वश्यां च पुरूरवाः॥ ऋचीकः स
त्यवत्यां च सरस्वत्यां यथा मनुः॥ शाकुंतलायां दुष्यंतो धृत्यां धर्मश्च शाश्वतः॥ दमयंत्यां नलश्चैव सत्यवत्यां च नारदः॥ जर
त्कारुर्जरत्कार्वां पुलस्त्यश्च प्रतीच्यया॥ वासुकिः शतशीर्षायां यथा वाप्सु पतिर्क्रिया॥ मेनकायां यथोर्णायुस्तुंबुरुश्चैव रंभया
था॥

उद्योग

कुमार्यां विधनंजयः ॥ विदेह्यां च यथा रामो रुक्मिण्यां च जनार्दनः ॥ तथा तु रममाणस्य दिवोदासस्य भूपतेः ॥ माधवी जनया
मास पुत्रमेकं प्रतर्दनं ॥ अथाजगाम भगवान् दिवोदासं स गालवः ॥ समये समनुप्राप्ते वचनं चेदमब्रवीत् ॥ निर्यातयतु
मे कन्यां भवांस्तिष्ठंतु वाजिनः ॥ यावदन्यत्र गच्छामि शुल्कार्थं पृथिवीपते ॥ दिवोदासोऽथ धर्मात्मा समये गालवस्य तां
॥ कन्यां निर्यातयामास स्थितः सत्ये महीपतिः ॥ ॥ इत्युद्योगे गालवचरिते ॥ ॥ नारद उवाच ॥ ॥ तथैव तां श्रियं त्यक्त्वा
कन्या भूत्वा यशस्विनी ॥ माधवी गालवं विप्रमन्वयात्सत्यसंगरा ॥ गालवो विमृशन्नेव स्वकार्यगतमानसः ॥ जगाम
भोजनगरं द्रष्टुमौशीनरं नृपं ॥ तमुवाचाथ गत्वा स नृपतिं सत्यविक्रमं ॥ इमां कन्यां सुतौ द्वौ ते जनयिष्यति पार्थि
न वौ ॥ अस्यां भवानवाप्तार्थो भविता प्रेत्य चेह च ॥ सोमार्कप्रतिसंकाशौ जनयित्वा सुतौ नृप ॥ शुल्कं तु सर्वधर्मज्ञ हयानां चं
द्रवर्चसां ॥ एकतः श्यामकर्णानां देयं मह्यं चतुःशतं ॥ गुर्वर्थोऽयं समारंभो न हयैः कृत्यमस्ति मे ॥ यदि शक्यं महाराज
क्रियतामविचारितं ॥ अनपत्योऽसि राजर्षे पुत्रौ जनय पार्थिव ॥ पितॄन् पुत्रप्लवेन त्वमात्मानं चैव तारय ॥ न पुत्रफ २१२
लभोक्ता हि राजर्षे पात्यते दिवः ॥ न याति नरकं घोरं यथा गच्छंत्यनात्मजाः ॥ एतच्चान्यच्च विविधं श्रुत्वा गालवभाषितं ॥
उशीनरः प्रतिवचो ददौ तस्य नराधिपः ॥ श्रुतवानस्मि ते वाक्यं यथा वदसि गालव ॥ विधिस्तु बलवान् ब्रह्मन् प्रवणं

परैरन्यैर्गतं मार्गं यामीत्यब्रवीद्यः ॥ इमं वस्त्रमासं इति एवं प्रकारं ॥
न

हि मनो मम ॥ शाने द्वे तु मम स्थाने नामीदृशानां द्विजोत्तम ॥ इतरेषां सहस्राणि सुबहूनि चरंति मे ॥ सुतमेकमेवास्यां ज
नयिष्यामि गालव ॥ तवेह द्विजगतेर्मार्गं गमिष्यामि परैरहं ॥ मूल्येनापि समं कुर्यां तवाहं द्विजसत्तम ॥ पौरजानपदार्थं तु
ममार्थो नात्मभोगतः ॥ कामतो हि धनं राजा पारक्यं यः प्रयच्छति ॥ न स धर्मेण धर्मात्मा युज्यते यशसा न च ॥ सोऽहं प्रतिग्र
हीष्यामि ददात्वेतां भवान्मम ॥ कुमारीं देवगर्भाभामेकपुत्रभवाय मे ॥ तथा तु बहु कल्याणमुक्तवंतं नराधिपं ॥ उशी
नरं द्विजश्रेष्ठो गालवः प्रत्यपूजयत् ॥ उशीनरं प्रतिग्राह्य गालवः प्रययौ वनं ॥ रेमे स तां समासाद्य कृतपुण्य इव श्रियं ॥
कंदरेषु च शैलानां नदीनां निर्झरेषु च ॥ उद्यानेषु विचित्रेषु वनेषूपवनेषु च ॥ हर्म्येषु रमणीयेषु प्रासादशिख
रेषु च ॥ वातायनविमानेषु तथा गर्भगृहेषु च ॥ ततोऽस्य समये जज्ञे पुत्रो बालरविप्रभः ॥ शिबिर्नाम्नाभिविख्यातो यः स पा
र्थिवसत्तमः ॥ उपस्थाय स तं विप्रो गालवः प्रतिगृह्य तां ॥ कन्यां प्रयातस्तं राजन् दृष्टवान् विनतात्मजं ॥ ॥ इत्युद्योगे गा
लवचरिते ॥ ॥ नारद उवाच ॥ ॥ गालवं वैनतेयोऽथ प्रहसन्निदमब्रवीत् ॥ दिष्ट्या कृतार्थं पश्यामि भवंतमिति वै द्वि
जः ॥ गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितं ॥ चतुर्भागावशिष्टं तदाचख्यौ कार्यमस्य हि ॥ सुपर्णस्तमुवाचेदं गालवं
वदतां वरः ॥ प्रयत्नस्ते न कर्तव्यो नैष संपत्स्यते तव ॥ पुरा हि कान्यकुब्जे वै गाधेः सत्यवतीं सुतां ॥ भार्यार्थेऽवरयत्कन्या

उद्योग

ह्वीकस्तेन गाधिना॥ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां॥ तगच्छ्यतां महं सहस्रमिति गालव॥ ऋचीक
स्तु ततस्तेषां वरुणस्यालयं गतः॥ अश्वतीर्थे हयान्लब्ध्वा दत्तवान्पार्थिवाय वै॥ इष्ट्वा ते पुंडरीकेण दत्ता राज्ञा द्विजा
तिभ्युः॥ तेभ्यो द्वे द्वे शते क्रीत्वा प्राप्तास्तैः पार्थिवैस्तदा॥ अथाप्यन्यानि चत्वारि शतानि द्विजसत्तम। नीयमानानि संता
रे हृतान्यासन्वितस्तया॥ एवं न शक्यमप्राप्यं प्राप्तुं गालव कर्हिचित्॥ इमामश्वशतान्यां तस्मै निवेदय॥ विश्वा
मित्राय धर्मात्मन्षड्भिरश्वशतैः सह॥ ततो सिगतसंमोहः कृतकृत्यो द्विजोत्तम॥ गालवस्तं तथेत्युक्त्वा सुपर्णस
हितस्ततः॥ आदायाश्वाश्च कन्यां च विश्वामित्रमुपागमत्॥ अश्वानां कांक्षितार्थानां षड्डिमानि शतानि वै॥ शतद्व
येन कन्येयं भवता प्रतिगृह्यतां॥ अस्यां राजर्षिभिः पुत्रा जाता वै धार्मिकास्त्रयः॥ चतुर्थं जनयत्वेकं भवानपि नरो
त्तम॥ पूर्णान्येवं शतान्यष्टौ तुरगाणां भवंतु मे॥ भवतो ह्यनृणो भूत्वा तपः कुर्यां यथासुखं॥ विश्वामित्रस्तु तं दृष्ट्वा नं
गालवं सह पक्षिणा॥ कन्यां च तां वरारोहामिदमित्यब्रवीद्वचः॥ किमियं पूर्वमेवेह न दत्ता मम गालव॥ पुत्रा ममैव २१२
चत्वारो भवेयुः कुलभावनाः॥ प्रतिगृह्णामि ते कन्यामेकपुत्रफलाय वै॥ अश्वाश्चाश्रममासाद्य चरंतु मम
सर्वशः॥ स तया रममाणोथ विश्वामित्रो महाद्युतिः॥ आत्मजं जनयामास माधवीपुत्रमष्टकं॥ जातमात्रं सुतं तं च

आश्रमपदस्त्वपगम्य कर्तुकामो महदिति शेषः॥ शैलेति शिलाधिष्ठात्री देवतास्तत्र समागता इत्यर्थः॥ उत्क्रम्य परित्यज्य॥ लघुतांति व्याप्तता।
विश्वामित्रो महाद्युतिः॥ संयोज्यार्थैस्तथा धर्मैरष्टकेस्तैः समयोजयत्॥ अष्टकः पुरं प्रायात्तदा सोमपुरप्रभं॥ निर्यात्य क
न्यां शिष्याय कौशिकोपि वनं ययौ॥ गालवोपि सुपर्णेन सह निर्यात्य दक्षिणां॥ मनसाभिप्रतीतेन कन्यामिदमुवाच ह॥ जा
तो दानपतिः पुत्रस्त्वया शूरस्तथापरः॥ सत्यधर्मरतश्चान्यो यज्वा चापि तथा परः॥ तदागच्छ वरारोहे तारितास्ते पिता सुतैः
चत्वारश्चैव राजानस्तथाहं च सुमध्यमे॥ गालवस्त्वभ्यनुज्ञाय सुपर्णं पन्नगाशनं॥ पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव
ह॥ इत्युद्योगे गालवचरिते॥ नारद उवाच॥ स तु राजा पुनस्तस्याः कर्तुकामः स्वयंवरं॥ उपगम्याश्रमपदं गंगायमु
नसंगमे॥ गृहीतमाल्यदामां तामारोप्य माधवीं॥ पूरुर्यदुश्च भगिनीमाश्रमे पर्यधावतां॥ नागयक्षमनुष्याणां गंधर्व
मृगपक्षिणां॥ शैलद्रुमवनौकानामासीत्तत्र समागमः॥ नानापुरुषदेशानामीश्वरैश्च समाकुलं॥ ऋषिभिर्ब्रह्मकल्पै
श्च समंतादावृतं वनं॥ निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी॥ वरानुत्क्रम्य सर्वांस्तान्वनं वृतवती वरं॥ अवतीर्य रथात्क
न्या नमस्कृत्य च बंधुषु॥ उपगम्य वनं पुण्यं तपस्तेपे ययातिजा॥ उपवासैश्च विविधैर्दीक्षाभिर्नियमैस्तथा॥ आत्मनो
लघुतां कृत्वा बभूव मृगचारिणी॥ वैडूर्यांकुरकल्पानि मृदूनि हरितानि च॥ चरंती शष्पमुख्यानि तिक्तानि मधुराणि
च॥ स्रवंतीनां च पुण्यानां सुरसानि शुचीनि च॥ पिबंती वारिमुख्यानि शीतानि विमलानि च॥

मृगराजो व्याघ्रः सिंहो द्विपो विनायस्व॥
वानरो मृगराजस्तु सिंहो द्विपो विनतसुता दानवा पिशाचस्तु किंपुरुषान्सुरस्त्वमास्वादयन्तो हरिणः सार्द्धं मृगीव वनचा
रिणा॥ एवमादिविधुतं धर्म्मं ब्रह्मचर्य्यं च संवृता। यया निर्दिष्टं पूर्वं गालवेन मनुष्टितः॥ बहुवर्षसहस्राणि स्वर्गकालध
र्म्मिणा। सुकृतं कृत्वा नृपः वंश्या वर्द्धिमानो न तु गमो। नान्यः प्रतिष्ठित लोक परलोकं च नाकृपः॥ महीयते नरपति र्य
यातिः स्वर्गमास्थितः॥ महर्षिकल्पो नृपतिः स्वर्गाग्र्यफलभुक् स्थितः॥ बहुवर्षसहस्राख्ये काले बहुगुणे गते॥ रा
जर्षिषु निषण्णेषु महीयस्सु महर्षिषु॥ अवमानेन राज्ञां वै देवानां ऋषिगणां सर्वथा। ययातिर्हृदि विस्मयाविष्टचेतनः॥ बुभाच
ततस्तं बुबुधे देवः शक्रो बलनिषूदनः॥ ते च राजर्षयः सर्वे धिग्धिगित्येवमब्रुवन्॥ विचारश्च समुत्पन्नो निरीक्ष्य
नहुषात्मजं॥ को न्वयं कस्य वा राज्ञः कथं वा स्वर्गमागतः॥ कर्म्मणा केन सिद्धोयं क्व चानेन तपश्चितं॥ कथं वा ज्ञाय
ते स्वर्गे केन वा ज्ञायते त्वत। एवं विचारयन्तस्ते राजानं स्वर्गवासिनः॥ दृष्ट्वा पप्रच्छुरन्योन्यं ययातिं नृपतिं प्रति॥ विमानपाला
श्च शतशः स्वर्गद्वाराभिरक्षिणः॥ पृष्टा आसनपालाश्च न जानीमेत्यथाब्रुवन्॥ सर्वे ते ह्यावृतज्ञाना नान्यजानंत तं नृपं॥ स
मुहूर्तादथ नृपो हतौजाः समपद्यत॥ ॥इ॰ उद्योगा॰ गालवचरिते ययातिपतनं॥ नारद उवाच॥ अथ प्रचलि
तः स्थानादासनाच्च परिच्युतः॥ कंपितेनैव मनसा धर्षितः शोकवह्निना॥ म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटांगदः॥



पतितं भुवम्॥ ॥
विघूर्णन्स्रस्तसर्वांगः प्रभ्रष्टाभरणांबरः॥ अदृश्यमानस्तान्पश्यन्नपश्यंश्च पुनः पुनः॥ शून्यः शून्येन मनसा प्रपतिष्यन्महीत
लं॥ किं मया मनसा ध्यातमशुभं धर्मदूषणं॥ येनाहं चलितः स्थानादिति राजा व्यचिंतयत्॥ ते तु तत्रैव राजानः सिद्धाश्चाप्स
रसस्तथा॥ अपश्यंत निरालंबं तं ययातिं परिच्युतं॥ अथैत्य पुरुषः कश्चित्क्षीणपुण्यनिपातकः॥ ययातिमब्रवीद्राजन्दे
वराजस्य शासनात्॥ अतीव मदमत्तस्त्वं न कंचिन्नावमन्यसे॥ मानेन भ्रष्टः स्वर्गस्ते नार्हस्त्वं पार्थिवात्मज॥ न च प्रज्ञायसे
गच्छ पतस्वेति तमब्रवीत्॥ पतेयं सत्स्विति वचस्त्रिरुक्त्वा नहुषात्मजः॥ पतिष्यंश्चिंतयामास गतिं गतिमतां वरः॥ एतस्मिन्ने
व काले तु नैमिषे पार्थिवर्षभान्॥ चतुरोपश्यत नृपस्तेषां मध्ये पपात ह॥ प्रतर्दनो वसुमनाः शिबिरौशीनरोष्टकः॥ वाज
पेयेन यज्ञेन तर्पयंति सुरेश्वरं॥ तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितं॥ ययातिरुपजिघ्रन्वै निपपात महीं प्रति॥ धूमो स्व
र्गं च संबद्धो नदी धूममयी मिव। गंगां गामिव गच्छंती मालंब्य जगतीपतिः॥ श्रीमत्स्ववभृथाग्र्येषु चतुर्षु प्रतिबंधुषु॥ मध्ये
निपतितो राजा लोकपालोपमेषु स॥ चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु॥ पपात मध्ये राजर्षिर्ययातिः पुण्यसंक्षये॥ त
मा ऊचुः पार्थिवाः सर्वे दीप्यमानमिव श्रिया॥ को भवान्कस्य वा बंधुर्देशस्य नगरस्य वा॥ यक्षो वाप्यथवा देवो गंधर्वो राक्ष

उरातनेस्त्वद्यादिकाल।अष्टनागनाष्टमनागन॥

उद्योग सोपिवा।नहिमानुषरूपोसिकोवार्थःकोद्यपतत्वया॥ ययातिरुवाच॥ ययातिरस्मिराजर्षिःक्षीणपुण्यश्च्युतोदिवः॥प
सु तेयंसत्स्वितिध्यायन्नवंपतितस्ततः॥ राजानऊचुः॥ सत्यमेतद्भवतुनकांक्षितंतुस्पर्धिनः।माविषण्णःकृतफलंधर्मश्चप्र
तिद्यतां॥ ययातिरुवाच॥ नाहंप्रतिग्रहधनोब्राह्मणःक्षत्रियोह्यहं।नचमेप्रवणाबुद्धिःपरपुण्यविनाशने॥ नारद
उवाच॥ एतस्मिन्नेवकालेतुमृगचर्य्याक्रमागतां।माधवींप्राप्यराजानस्तेभिवाद्येदमब्रुवन्।किमागमनकृत्यंतेकिंकु
र्मःशासनंतव।आज्ञाप्याहिवयंसर्वेतवपुत्रास्तपोधन।तेषांतद्भाषितंश्रुत्वामाधवीपरयामुदा।पितरंसमुपागच्छ
द्ययातिंसाववंदच।स्पृष्ट्वाशिरस्तितान्पुत्रांस्तापसीवाक्यमब्रवीत्।दौहित्रास्तवराजेन्द्रममपुत्रानतेपराः।इमेत्वांतारयिष्यंति
दृष्टमेतत्पुरातनं।अहंतेदुहिताराजन्माधवीमृगचारिणी।मयाप्युपचितोधर्मस्ततोर्द्धंप्रतिगृह्यतां।यस्माद्राजन्नराःसर्वे
अपत्यफलभागिनः।तस्मादिच्छंतिदौहित्रान्यथात्वंवसुधाधिप।ततस्तेपार्थिवाःसर्वेशिरसाजननींतदा।अभिवाद्यनमस्कृ
ययाति सर्वफलभागिनः।तस्मादिच्छंतिदौहित्रांमातामहमथाब्रुवन्।उच्चैरनुपमैःस्निग्धैःस्वरैरापूर्य्यमेदिनीं।मातामहंनृपतयस्ता
रयंतोदिवश्च्युतं।अथतस्मादुपगतोगालवोप्याहपार्थिवं।तपसोप्यष्टभागेनस्वर्गमारोहतांभवान्॥ इत्युद्योगेगालवचरितेय २२५
ह्२ यातिपतनं॥

स्वहार्य्येषु विहारसविवस्वनिपातेषुपरणमारणेषु॥
नारदउवाच॥ ॥इत्यभिज्ञातमात्रोथसद्भिस्तैर्नरपुंगवः।ययातिर्दिव्यसंस्थानोबभूवविगतज्वरः।दिव्यमाल्यांबरधरो
दिव्याभरणभूषितः।दिव्यगंधगुणोपेतोनपृथ्वीमस्पृशत्पदा।ततोवसुमनाःपूर्वमुच्चैरुच्चारयन्वचः।ख्यातोदानपति
र्लोकेव्याजहारनृपंतदा।प्राप्तवानस्मियल्लोकेसर्ववर्णेष्वगर्हया।तदप्यथप्रदास्यामितेनसंयुज्यतांभवान्॥ ततः
प्रतर्दनोप्याहवाक्यंक्षत्रियपुंगवः।यथाधर्मरतिर्नित्यंनित्यंयुद्धपरायणः।प्राप्तवानस्मियल्लोकेक्षत्रवंशोद्भवयशः।वी
रशब्दफलंचैवतेनसंयुज्यतांभवान्॥शिबिरौशीनरोधीमानुवाचमधुरांगिरं।यथाबालेषुनारीषुवैहार्य्येषुतथैव
च।संगतेषुनिपातेषुतथापद्व्यसनेषुच।अनृतंनोक्तपूर्वंमेतेनसत्येनखंव्रज।यथाप्राणांश्चराज्यंचराजकर्मसुखानिच
।त्यजेयंनतुतःसत्यंतेनसत्येनखंव्रज।यथासत्येनमधुमायथासत्येनपावकः।धातःशतक्रतुस्तेषांतेनसत्येनखंव्रज।
अष्टकस्त्वथराजर्षिःकौशिकोमाधवीसुतः।अनेकशतयज्वानंवाक्यंप्राहधर्मवित्।शतशःपुंडरीकाःमयागोस
वाश्चरितामया।क्रतवोवाजपेयाश्चतेषांफलमवाप्नुहि।नमेरत्नानिनधनंनतथान्यपरिच्छदाः।क्रतुष्वनुपयुक्ता
नितेनसत्येनखंव्रज।यथायथाहिजल्पंतिदौहित्रास्तंनराधिपं।तथातथावसुमतींत्यक्त्वाराजादिवंययौ।
x यत्फलंदानशीलस्यक्षमाशीलस्ययत्फलं।यच्चमेफलमाधानेतेनसंयुज्यतांभवान्॥ x इलनतेलिर

चतुष्पादस्तपो ज्ञानं दान धर्मरूपवान्॥ लोकेनलोकहितेन। नमसामेहेन॥

उद्योग एवं संदिशमानस्य कोपान्नारः शुक्रतेनवरा। ययातिः स्वर्गतो नाम्न वतारयामास पुत्रकम्॥ सेदिवा। स्वधर्मप्रयतः दानकालवाचे। मेउ
ष्टेनेनवंशो मेहता। कृतवईमाः। मातामहं सर्वाः पदे दिवमारोपयंस्तदा। राजधर्मगुणोपेता सर्वधर्मगुणान्विताः॥ दौ
हित्रास्तव ये राजन्दिवमारोपयन्पार्थिव॥ ॥इत्युद्योगे गालवचरिते॥ ॥नारद उवाच॥ संकीर्तितो राजपितः स्वर्गमा
र्गं विरहितः॥ [illegible] सत्कारोवाच दिवि स्वर्गमारोपितः॥ अभिप्रे [illegible] स्तं सुगंधिना परिष्व
क्तः पुण्यगन्धेन वायुना। पुण्यगन्धिना। दिव्यं स्थानमासाद्य दिव्यफलनिर्जितः। कर्मभिः स्वैरुपचितः जज्वाल पर
या श्रिया। उपगीतोपनृत्तश्च गन्धर्वाप्सरसां गणैः। प्रीत्या प्रतिगृहीतश्च स्वर्गे दुन्दुभिनिस्वनैः। अभिष्टुतश्च विविधैर्देव
राजर्षिचारणैः। अर्चितश्चोत्तमार्घ्येण दैवतैरभिनन्दितः। प्राप्तः स्वर्गफलं चैव तमुवाच पितामहः। निर्वृतं शान्तमनसं वचो
भिस्तर्पयन्निव। चतुष्पादस्तु या धर्मस्त्वमेव लोकेष्वकर्मणा। अक्षयस्तव लोकोऽयं कीर्तिश्चैवाक्षया दिवि। पुनस्तवा
द्य राजर्षे सुकृतेन विघातितम्। आवृतं तमसा चेतः सर्वेषां स्वर्गवासिनाम्। येन त्वां नाभिजानन्ति ततो ज्ञातास्यभिपाति
तः। प्रीत्यैव चासि दौहित्रैस्तारितस्त्वमिहागतः। स्थानं च प्रतिपन्नोऽसि कर्मणा स्वेन निर्जितम्। अचलं शाश्वतं शुभं उ
त्तममैन्द्रमव्ययम्॥ ॥ययातिरुवाच॥ ॥भगवन्संशयो मेऽस्ति कश्चित्तं छेत्तुमर्हसि॥

उद्योग २१६ २ २१६

त्वत्तोऽन्यस्य न हि मया श्रोतव्यं लोकपितामह। बहुवर्षसहस्रान्तं प्रजापालनवर्धितम्। अनेकक्रतुदानौघैरर्जितं
मे महत्फलम्। तत्कथं न्वल्पकालेन क्षीणं येनास्मि पातितः। भगवन्वेत्थ लोकांश्च शाश्वतान्मम निर्जितान्। कथं नु
मम तत्सर्वं विप्रनष्टं महाद्युते॥ ॥पितामह उवाच॥ ॥बहुवर्षसहस्रान्तं प्रजापालनवर्धितम्। अनेकक्रतुदानौ
घैर्यत्त्वयोपार्जितं फलम्। तदनेनैव दोषेण क्षीणं येनासि पातितः। अभिमानेन राजेन्द्र धिक्कृतः स्वर्गवासिभिः॥
नाभिमानेन राजर्षे न बलेन न हिंसया। न शाठ्येन न मायाभिर्लोका भवन्ति शाश्वताः। नावमान्यास्त्वया राजन्नवमा
उत्कृष्टमध्यमाः। न हि मानप्रदग्धानां कश्चिदस्ति समः क्वचित्। पतनारोहणमिदं कथयिष्यन्ति ये नराः। विषमा
ण्यपि ते प्राप्तास्तरिष्यन्ति न संशयः॥ ॥नारद उवाच॥ ॥एष दोषोऽभिमानेन पुरा प्राप्तो ययातिना। निर्बन्धतश्चातिमा
त्रं गालवेन महीपते। श्रोतव्यं हितकामानां सुहृदां हितमिच्छताम्। न कर्तव्यो हि निर्बन्धो निर्बन्धो हि क्षयोदयः। तस्मा
त्त्वमपि गान्धारे मानं क्रोधं च वर्जय। संधत्स्व पाण्डवैर्वीर संरम्भं त्यज पार्थिव। ददाति यत्पार्थिव यत्करोति यद्वा तप
स्तप्यति यज्जुहोति। न तस्य नाशोऽस्ति न चापकर्षो नान्यस्तदश्नाति स एव कर्ता। इदं महाख्यानमनुत्तमं मतं बहुश्रु
तानां गतरोषरागिणाम्। समीक्ष्य लोके बहुधा प्रधाविता त्रिवर्गदृष्टिः पृथिवीमुपाश्नुते॥ ॥इति उद्योगे भगवद्याने
गालवचरितं समाप्तम्॥ ॥

नअन्यसहस्रहीमिपहं लोकयितामहाबकुवर्षमदस्तांतं भजायाल वर्दिनाअनेककृतदानौ॥



धृतराष्ट्र उवाच॥ ॥ भगवन्नेवमेवैतद्यथा वदसि नारद। इच्छामि चाहमेवैतन्न त्वीशो भगवन्नहो॥ ॥वैशंपायन
उवाच॥ ॥ एवमुक्त्वा ततः कृष्णमभ्यभाषत कौरवः। स्वर्ग्यं लोक्यं च मामात्थ धर्म्यं न्याय्यं च केशव। न त्वहं स्ववशस्ता
त क्रियमाणं न मे प्रियं। अंग दुर्योधनं कृष्ण मंदं शास्त्रातिगं मम। अनुनेतुं महाबाहो यतस्व पुरुषोत्तम। न शृणोति
महाबाहो वचनं साधु भाषितं। गांधार्याश्च हृषीकेश विदुरस्य च धीमतः। अन्येषां चैव सुहृदां भीष्मादीनां हिते
२।६ षिणां। स त्वं पापमतिं क्रूरं पापचित्तमचेतनं। अनुशाधि दुरात्मानं स्वयं दुर्योधनं नृपं। सुहृत्कार्यं तु सुमहत्कृतं ते
स्याज्जनार्दन। ततोऽभ्यावृत्य वार्ष्णेयो दुर्योधनममर्षणं। अब्रवीन्मधुरां वाचं सर्वधर्मार्थतत्त्ववित्। दुर्योधन निबोधे
दं मद्वाक्यं कुरुसत्तम। शमार्थं ते विशेषेण सानुबंधस्य भारत। महाप्राज्ञ कुले जातः साध्वेतत्कर्तुमर्हसि। श्रुतवृत्तो
पसंपन्नः सर्वैः समुदितो गुणैः। दौष्कुलेया दुरात्मानो नृशंसा निरपत्रपाः। त एतदीदृशं कुर्युर्यथा त्वं तात मन्य
से। धर्मार्थयुक्ता लोकेस्मिन् प्रवृत्तिर्लक्ष्यते सतां। असतां विपरीता तु लक्ष्यते भरतर्षभ। विपरीता त्वियं वृत्तिरसं २।१३
कृल्लक्ष्यते त्वयि। अधर्मश्चानुबंधोत्र घोरः प्राणहरो महान्। अनिष्टश्चानिमित्तश्च न च शक्यश्च भारत। तमनर्थं परि
हरन्नात्मश्रेयः करिष्यसि। भ्रातॄणामथ भृत्यानां मित्राणां च परंतप। अधर्म्याद्यशसश्चाद्य कर्मणस्त्वं प्रमोक्ष्यसे

गोः पृथिवी॥

स्य स्य

प्राज्ञैः शूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः। संधत्स्व पुरुषव्याघ्र पांडवैर्भरतर्षभ। तद्धितं च प्रियं चैव धृतराष्ट्रस्य धी
मतः। पितामहस्य द्रोणस्य विदुरस्य महामतेः। कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः। अश्वत्थाम्नो विकर्णस्य सं
जयस्य विविंशतेः। ज्ञातीनां चैव भूयिष्ठं मित्राणां च परंतप। शमे शर्म भवेत्तात सर्वस्य जगतस्तथा। ह्रीमानसि कु
ले जातः श्रुतवाननृशंसवान्। तिष्ठ तात पितुः शास्त्रे मातुश्च भरतर्षभ। एतच्छ्रेयो हि मन्यंते पिता यच्छास्ति भार
त। उत्तमापद्गतः सर्वः पितुः स्मरति शासनं। रोचते ते पितुस्तात पांडवैः सह संगमः। सामात्यस्य कुरुश्रेष्ठ तत्तुभ्यं
तात रोचतां। श्रुत्वा यः सुहृदां शास्त्रं मर्त्यो न प्रतिपद्यते। विपाकांते दहत्येनं किंपाकमिव भक्षितं। यस्तु निःश्रेयसं
वाक्यं मोहान्न प्रतिपद्यते। स दीर्घसूत्रो हीनार्थः पश्चात्तापेन युज्यते। यस्तु निःश्रेयसं श्रुत्वा प्राक्तदेवाभिपद्यते
। आत्मनो मतमुत्सृज्य स लोके सुखमेधते। योर्थकामस्य वचनं प्रातिकूल्यान्न मृष्यते। शृणोति प्रतिकूलानि द्वि
षतां वशमेति सः। सतां मतमतिक्रम्य योऽसतां वर्तते मते। शोचंते व्यसने तस्य सुहृदो नचिरादिव। मुख्यानमात्या
नुत्सृज्य यो निहीनान्निषेवते। स घोरामापदं प्राप्य नोत्तारमधिगच्छति। योऽसत्सेवी वृथाचारो न श्रोता सुहृदां सतां। परान्वृणी
ते स्वान्द्वेष्टि तं गौस्त्यजति भारत। स त्वं विरुध्य तैर्वीरैरन्येभ्यस्त्राणमिच्छसि। अशिष्टेभ्योऽसमर्थेभ्यो मूढेभ्यो भरतर्ष
भ॥

डुक्तेनात्मंगिनःपांडवैःसंगतंश्रेयःतेनवः॥

कोहिशक्रसमान्ज्ञातीनतिक्रम्यमहारथान्॥अन्येभ्यस्त्राणमाशंसेत्वदन्योभुविमानवः॥जन्मप्रभृतिकौंतेया
नित्यंविनिकृतास्त्वया॥नचतेजातुकुप्यंतिधर्मात्मानोहिपांडवाः॥त्वयिसम्यङ्महाबाहोप्रतिपन्नायशस्विनः॥त्वयापिप्र
तिपत्तव्यंतथैवभरतर्षभ॥स्वेषुबंधुषुमुख्येषुमामन्युवशमन्वगाः॥त्रिवर्गयुक्तःप्राज्ञानामारंभोभरतर्षभ॥धर्मा
र्थावनुरुध्यंतित्रिवर्गासंभवेनराः॥पृथक्चविनिविष्टानांधर्मंधीरोनुरुध्यते॥इंद्रियैःप्राकृतोलोभाद्धर्मंविप्रजहा
तियः॥कामार्थावनुपायेनलिप्समानोविनश्यति॥कामार्थौलिप्समानस्तुधर्ममेवादितश्चरेत्॥नहिधर्मादपैत्यर्
थः॥कामोवापिकदाचन॥उपायंधर्ममेवाहुस्त्रिवर्गस्यविशांपते॥लिप्समानोहितेनाशुकक्षेग्निरिववर्द्धते॥सत्वं
तातानुपायेनलिप्ससेभरतर्षभ॥आधिराज्यंमहद्दीप्तंप्रथितंसर्वराजसु॥आत्मानंतक्षतिह्येषवनंपरशुनायथा॥
यःसम्यग्वर्तमानेषुमिथ्याराजन्प्रवर्तते॥नतस्यहिमतिंछिंद्याद्यस्यनेच्छेत्पराभवं॥अविच्छिन्नस्यधीरस्यकल्याणेधीयते
मतिः॥आत्मवान्नावमन्येतत्रिषुलोकेषुभारत॥अप्यन्यंप्राकृतंकिंचित्किमुतान्पांडवर्षभान्॥अमर्षवशमापन्नोन
किंचिद्बुध्यतेनरः॥छिद्यतेह्याततंसर्वंप्रमाणंपश्यभारत॥श्रेयस्तेदुर्जनात्तातपांडवैःसहसंगतं॥तैर्हिसंप्रीयमाणस्त्वंस २१९
र्वकामानवाप्स्यसि॥पांडवैर्निर्जितांभूमिंभुंजानोराजसत्तम॥पांडवान्पृष्ठतःकृत्वात्राणमाशंससेन्यतः॥दुः

यस्मिन्यारेजितेपांडवैर्जितंनवतिसएकोदृश्यतांतातनिवसद्योस्मामंहत्यर्थे॥

दुःशासनेदुर्विषहेकर्णेचापिससौबले॥एतेष्वैश्वर्यमाधायभूतिमिच्छसिभारत॥नचैतेतवपर्याप्ताज्ञानेधर्मार्थयोस्तथा॥
विक्रमेचाप्यपर्याप्ताःपांडवान्प्रतिभारत॥नहीमेसर्वराजानःपर्याप्ताःसहितास्त्वया॥क्रुद्धस्यभीमसेनस्यप्रेक्षितुंमुखमाहवे॥इदं
संनिहितंतातसमग्रंपार्थिवंबलं॥अयंभीष्मस्तथाद्रोणःकर्णश्चायंतथाकृपः॥भूरिश्रवाःसौमदत्तिरश्वत्थामाजयद्रथः॥
अशक्ताःसर्वएवैतेप्रतियोद्धुंधनंजयं॥अजेयोह्यर्जुनःसंख्येसर्वैरपिसुरासुरैः॥मानुषैरपिगंधर्वैर्मायुद्धेचेतआधि
दाशार्हप्रमुखा नृपाः ॥ संगच्छ भ्रातृभिः सार्द्धं मानं संत्यज्य पार्थिव ॥ प्रशाधि पृथिवीं कृत्स्नां ततस्तं भ्रातृभिः सह ॥
समालिंग्य च हर्षेण नृपा यांतु परस्परं ॥ अलं युद्धेन राजेंद्र सुहृदां शृणु कारणं ॥ ध्रुवं विनाशो युद्धे हि क्षत्रियाणां 233
णां प्रदृश्यते ॥ ज्योतींषि प्रतिकूलानि दारुणा मृगपक्षिणः ॥ उत्पाता विविधा वीर दृश्यंते क्षत्रनाशनाः ॥ विशेषत इ

दासांस्याध्रुवितां ॥ व्यायामाभूदं ॥ ह्यसमख्यं विपरीतमकार्य्यं ॥

वास्माकं निमित्तानि निवेशने ॥ उल्काभिर्हि प्रदीप्ताभिर्बध्यते पृतना तव ॥ वाहनान्यप्रहृष्टानि रुदंतीव वि
शांपते ॥ गृध्रास्त्वपर्युपासंते सैन्यानि ते समंततः ॥ नगरं न यथापूर्वं तथा राजन्विराजते ॥ शिवाश्चाशिवनिर्घोषा
दीप्तां संश्रयंति दिशं ॥ कुरु वाक्यं पितुर्म्मातुरस्माकं च हितैषिणां ॥ त्वय्यायत्तो महाबाहो शमो व्यायाम एव
च ॥ न चेत्करिष्यसि वचः सुहृदामरिकर्षण ॥ तप्स्यसे वाहिनीं दृष्ट्वा पार्थबाणप्रपीडितां ॥ भीमस्य च महाना
दं नदतः शुष्मिणो रणे ॥ श्रुत्वा स्मर्त्तासि मे वाक्यं गांडीवस्य च निःस्वनं ॥ यद्येतदपसव्यं ते वचो मम भविष्यति
॥ इत्युद्योगे भगवद्याने ॥ ॥ वैशंपायन उवाच ॥ ॥ एवमुक्तस्तु विमनास्तिर्यग्दृष्टिरधोमुखः ॥ संहत्य च
भ्रुवोर्मध्यं न किंचिद्व्याजहार सः ॥ तं वै विमनसं दृष्ट्वा संप्रेक्ष्यान्योन्यमंतिकात् ॥ पुनरेवोत्तरं वाक्यमुक्तवंतौ नर
र्षभौ ॥ ॥ भीष्म उवाच ॥ ॥ शुश्रूषुमनसूयं च ब्रह्मण्यं सत्यवादिनं ॥ प्रतियोत्स्यामहे पार्थमतो दुःखतरं
नु किं ॥ ॥ द्रोण उवाच ॥ अश्वत्थाम्नि यथा पुत्रे भूयो मम धनंजये ॥ बहुमानः परो राजन्संनतिश्च कपि
ध्वजे ॥ तं चेत्पुत्रात्प्रियतमं प्रतियोत्स्ये धनंजयं ॥ क्षात्रधर्म्ममनुष्ठाय धिगस्तु क्षत्रजीविकां ॥ यस्य लोके समो नास्ति
कश्चिदन्यो धनुर्द्धरः ॥ मत्प्रसादात्स बीभत्सुः श्रेयानन्यैर्धनुर्द्धरैः ॥ मित्रध्रुग्दुष्टभावश्च नास्तिकोथानृजुः शठः ॥

नसस्मुलन्नातहज्ञां यथाभवान्। एतेभ्रातामानः॥ अवध्रियस्यत्वक्कुलनयाश्रिय। दोषादोषाद्दतवः। उमागतस्मातिगमन॥

नसस्मुलन्नातहज्जाय इहइखेद्विवागतः। वार्य्यमाणोपिपापेभ्यः पापात्मा पापमिच्छति। चोद्यमानोपिपापेनशुभात्मा
शुभमिच्छति। मिथ्योपचरिता ह्यातवर्त्तमानप्रत्ववध्रिय। अक्षितवायकल्प्यं तदोषानरतस्तमा। कुशुक्रः कुरूइहइनमयाच
विज्ञारणाच। वासुदेवकेशवतथा। आयानेवाग्निमन्यास। अग्निोमबलमित्यवसहमाचे। नित्ता ५ र्षासि। सयादृतक्र
मकरंगंगावेग। मिवोस्मागा। वासएवयुधात्मकं प्राहुरण्यालान। मत्यास। स्वजंत्मकामिव प्राप्यलोमायो विष्टिरी। श्रितेय
द्रौपदीसहितपार्थसायुधन्वाहित्निहितं। कस्त्वामिवराज्यस्थं पांडवंको विजेष्यति। निदधियस्यराजानः सार्वतिष्ठंति
किंकराः। तमिलविलमासाद्यधर्म्मराजाव्यराजतः। कावेरसहितंप्राप्यततोरत्नान्यवाप्यच। स्फीतमाक्रमतराष्ट्रं राज्य
मिदंनियांडवाः। स्वंकृतेमधीतंचब्राह्मणास्पर्षितधनैः। आवयोगेनमधिकृतकृतलौचविहितौ। वंदिवासुखंराज्य च
मित्राणि विधानानिच। द्रियादपांडवे। स्नवामहस्यसनमाप्यसि। द्रौपदीमस्य चाशास्ति। विजयसत्यवादिनी। नयोघोरवता
दृवाकथंजेष्यतिपांडवं। मंत्रीजनार्दनो यस्य भ्राता। यस्य धनंजयः। सर्वेशास्त्रश्रुतांश्रेष्ठः कथंजेष्यतिपांडवं
सहायाब्राह्मणायस्यद्युतिमंतोजितेंद्रियाः। तद्व्यत्ययसमवारंकथंजेष्यसिपांडवं। वर्षासुवासः स्वजोपरित्यक्तो २३८
प्राप्यऋद्धा त्वत्रवानोयथानयाङ्। योधिष्ठिरी श्रियंप्राप्यमन्मन्मसशीमंतमात्मानमित्यर्थात्। व्यराजततेजस्वीवेन्दृव॥ ॥

इतिभगवद्यानं॥ ॥श्लक्ष्णानिश्लक्ष्णाक्षराणि। मृदूनिमृदुत्वानि। कन्यायांयोजायातसकानीनः। सहोढश्चेतिद्विविधःअप्य
कृतनकृतंचवस्या भियकार्य्यंत्र्। तिमिचता। शुद्धदामकमानेषुसुक्ष्मसुव्यसनार्थोवे। अलंदुद्धेनेतिवीरे। शाम्यतिचंकुरुश्र
व्यः। मागमः सद्भुतामात्यः सबलस्त्वपराभव॥ ॥इत्युद्योगभगवद्यानेसमाप्तं॥ ॥धृतराष्ट्रउवाच॥ ॥राजपुत्रैःपरिवृ
तस्तथामात्यैश्चसंजय। उपारोप्यरथेकर्णंनिर्यातोमधुसूदनः। किमब्रवीद्रथोपस्थेराधेयंपरवीरहा। कानिसांत्वानि
गोविंदःसूतपुत्रेप्रयुक्तवान्। ओघमेघस्वनःकालेकृष्णःकर्णमथाब्रवीत्। मृदुवायदिवातीक्ष्णंतन्ममाचक्ष्वसंजय॥ संज
यउवाच॥ आनुपूर्व्येणवाक्यानिश्लक्ष्णानिचमृदूनिच। प्रियाणिधर्म्मयुक्तानिसत्यानिचहितानिच। हृदयग्रहणीयानिरा
धेयंमधुसूदनः। यान्यब्रवीदमेयात्मातानिमेशृणुभारत॥ वासुदेवउवाच॥ उपासितास्तेराधेयब्राह्मणावेदपारगाः
। तत्वार्थंपरिपृष्टाश्चनियतेनानसूयया। त्वमेवकर्णजानासिवेदवादान्सनातनान्। त्वमेवधर्म्मशास्त्रेषुसूक्ष्मेषुपरिनिष्ठि
तः। कानीनश्चसहोढश्चकन्यायांयश्चजायते। वोढारंपितरंतस्यप्राहुःशास्त्रविदोजनाः। सोसिकर्णतथाजातःपांडोःपुत्रो
सिधर्मतः। निग्रहाद्धर्मशास्त्राणामेहिराजाभविष्यसि। पितृपक्षेचतेपार्थामातृपक्षेचवृष्णयः। द्वौपक्षावभिजानीहित्वमेतौ
पुरुषर्षभ। मयासार्धमितोयातमद्यत्वांतातपांडवाः। अभिजानंतुकौंतेयंपूर्वजातंयुधिष्ठिरात्। पादानिवग्रहीष्यंतिभ्रातरःपं

ःकालेप्रसूतोन्योविवाहादनंतरमिति। वोढारंतकन्यापाणिग्राहंयस्येतिचकारःपारद्दरणो। धर्मशास्त्राणांनियमान्नियामकत्वात्॥
पांडोःपुत्रोसि॥

च पांडवाः॥द्रौपदेयास्तथा पंच सौभद्रश्चापराजितः॥राजानो राजपुत्राश्च पांडवार्थे समागताः॥पादौ तव ग्रहीष्यं
उद्योग ति मार्द्रवांधकवृष्णयः॥हिरण्मयांश्च ते कुंभान्राजतान्पार्थिवांस्तथा॥औषध्यः सर्वबीजानि सर्वरत्नानि वीरुधः॥राजन्या राजकन्याश्चा
प्यानयंत्वभिषेचनं॥षष्ठे च त्वां तथा काले द्रौपद्युपगमिष्यति॥अग्निं जुहोतु वै धौम्यः संशितात्मा द्विजोत्तमः॥अद्य त्वा
मभिषिंचंतु चातुर्वैद्या द्विजातयः॥पुरोहितः पांडवानां व्याघ्रचर्मण्यवस्थितं॥तथैव भ्रातरः पंच पांडवाः पुरुषर्षभाः॥द्रौ
पदेयास्तथा पंच पंचालाश्चेदयस्तथा॥अहं च त्वाभिषेक्ष्यामि राजानं पृथिवीपतिं॥युवराजोस्तु ते राजा धर्मपुत्रो युधि
ष्ठिरः॥गृहीत्वा व्यजनं श्वेतं धर्मात्मा संशितव्रतः॥उपान्वारोहतु रथं कुंतीपुत्रो युधिष्ठिरः॥छत्रं च ते महाश्वेतं भीमसेनो महा
बलः॥अभिषिक्तस्य कौंतेय धारयिष्यति मूर्द्धनि॥किंकिणीशतनिर्घोषं वैयाघ्रपरिवारणं॥रथं श्वेतहयैर्युक्तमर्जुनो
वाहयिष्यति॥अभिमन्युश्च ते नित्यं प्रत्यासन्नो भविष्यति॥नकुलः सहदेवश्च द्रौपदेयाश्च पंच ये॥पंचालास्त्वानुयास्यंति॥
शिखंडी च महारथः॥अहं च त्वानुयास्यामि सर्वे चांधकवृष्णयः॥दाशार्हाः परिवारास्ते दाशार्णाश्च विशांपते॥भुंक्ष्व रा
ज्यं महाबाहो भ्रातृभिः सह पांडवैः॥जपैर्होमैश्च संयुक्तो मंगलैश्च पृथग्विधैः॥पुरोगमाश्च ते संतु द्रविडाः सह कुंत २३५
लैः॥आंध्रास्तालचराश्चैव चूचुपा वेणुपास्तथा॥स्तुवंतु त्वाद्य बहुशः स्तुतिभिः सूतमागधाः॥विजयं वसुषेणस्य घोषयंतु

सौहृदात् बांधवात्।प्रणयात् स्नेहात्।अपाकीर्णस्त्यक्तः॥यथा न कुशलेन युक्तः॥पिंडव्यपनयमपोषणेन परित्याजनं॥

च पांडवाः॥स त्वं परिवृतः पार्थैर्नक्षत्रैरिव चंद्रमाः॥प्रशाधि राज्यं कौंतेय कुंतीं च प्रतिनंदय॥मित्राणि ते प्रहृष्यंतु व्यथंतु रिपु
वस्तथा॥सौभ्रात्रं चैव तेद्यास्तु भ्रातृभिः सह पांडवैः॥ ॥इत्युद्योग कर्णोपनिवादे॥ कर्ण उवाच॥ असंशयं
सौहृदान्मे प्रणयाच्चात्थ केशव॥सख्येन चैव वार्ष्णेय श्रेयस्कामतयैव च॥सर्वं चैवाभिजानामि पांडोः पुत्रोस्मि धर्मतः॥निग्र
हाद्धर्मशास्त्राणां यथा त्वं कृष्ण मन्यसे॥कन्या गर्भं समाधत्त भास्करान्मां जनार्दन॥आदित्यवचनाच्चैव जातं मां सा व्यसर्जयत्॥सो
स्मि कृष्ण तथा जातः पांडोः पुत्रोस्मि धर्मतः॥कुंत्या त्वहमपाकीर्णो यथा न कुशलं तथा॥सूतो हि मामधिरथो दृष्ट्वैवाभ्यनयद्गृहा
न्॥राधायाश्चैव मां प्रादात्सौहार्दान्मधुसूदन॥मत्स्नेहाच्चैव राधायाः सद्यः क्षीरमवातरत्॥सा मे मूत्रपुरीषं च प्रतिजग्राह माधव॥
तस्याः पिंडव्यपनयं कुर्यादस्मद्विधः कथं॥धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः॥तथा मामभिजानाति सूतश्चाधिरथः सुतं॥पि
तरं चाभिजानामि तमहं सौहृदात्सदा॥स हि मे जातकर्मादि कारयामास माधव॥शास्त्रदृष्टेन विधिना पुत्रप्रीत्या जनार्दन॥नाम मे
वसुषेणेति कारयामास वै द्विजैः॥भार्याश्चोढा मम प्राप्ते यौवने तेन केशव॥तासु पुत्राश्च पौत्राश्च मम जाता जनार्दन॥हृद
यं मे कृष्ण संजातं कामबंधनं॥न पृथिवी सकला नैव सुवर्णस्य राशयः॥हर्षाद्भयाद्वा गोविंद अनृतं कर्तुमुत्स
हे॥धृतराष्ट्रकुले कृष्ण दुर्योधनसमाश्रयात्॥मया त्रयोदश समा भुक्तं राज्यमकंटकं॥इष्टं च बहुभिर्यज्ञैः सह सूतैर्मया सकृत्॥

आवासान्मावदनानि बंधूनां पापपराय।अकार्षिकर्णयो कुमान्यामपि इन्द्रान्याप्तप्रतिज्ञानात्।ममकुंतीसुतस्त्वामवंरू
 आवाहाश्च विवाहाश्च सह सूतैर्मयाकृताः।मांचकृष्णसमासाद्यकृतः शस्त्रसमुद्यमः॥दुर्योधनेनवार्ष्णेय विग्रहश्चापिपां
डवैः॥तस्माद्रणेद्वैरथेमांप्रत्युद्यातारमच्युत।हंतवाऽपरमेकृष्णपरिगृह्यसव्यसाचिनः॥वधाद्बंधाद्भयाद्वापि लोभाद्वापि
जनार्दन।नाहमनृतंनोत्सहेकर्तुं धार्तराष्ट्रस्यधीमतः॥यदिह्ययनगच्छेयंद्वैरथंसव्यसाचिना।अकीर्तिःस्याद्धृषीकेश ममपार्थस्य
चानघ॥असंशयंहितार्थाय ब्रूयास्त्वंमधुसूदन।सर्वंचपांडवाःकुर्युस्त्वद्वशित्वान्नसंशयः॥मंत्रस्यनियमंकुर्यास्त्वमत्रमधु
सूदन।एतदत्रहितंमन्येसर्वयादवनंदन।यदिजानातिमांराजाधर्मात्मासंयतेंद्रियः।कुंत्याःप्रथमजंपुत्रंनसराज्यंग्रहीष्य
ति।प्राप्यचापिमहद्राज्यंतदहंमधुसूदन।स्फीतंदुर्योधनायैवसंप्रदद्यामरिंदम।सएवराजाधर्मात्माशाश्वतोस्तुयुधि
ष्ठिरः।नेतायस्यहृषीकेशोयोद्धायस्यधनंजयः।पृथिवीतस्यराष्ट्रंचयस्यभीमोमहारथः।नकुलःसहदेवश्चद्रौप
देयाश्चमाधव।धृष्टद्युम्नश्चपांचाल्यःसात्यकिश्चमहारथः।उत्तमौजायुधामन्युःसत्यधर्माचसोमकिः।चैद्यश्चचे
कितानश्चशिखंडीचापराजितः।इंद्रगोपकवर्णाश्चकेकयाभ्रातरस्तथा।इंद्रायुधसवर्णश्चकुंतिभोजोमहा
मनाः।मातुलोभीमसेनस्यश्येनजिच्चमहारथः।शंखःपुत्रोविराटस्यनिधिस्त्वंचजनार्दन।महानयंकृष्णकृतःक्षत्र २४०
एस्यमंत्रस्य॥ ॥

क्षत्रस्यसमुदानयः॥राज्यप्राप्तमिदंदीप्तंप्रथितंसर्वराजसु॥धार्तराष्ट्रस्यवार्ष्णेयशस्त्रयज्ञोभविष्यति॥अस्य
यज्ञस्यवेत्तात्वंभविष्यसिजनार्दन॥आध्वर्यवंतेकृष्णक्रतावस्मिन्भविष्यति॥होताचैवचबीभत्सुःसन्नद्धःसक
पिध्वजः॥गांडीवंस्रुक्तथाचाज्यंवीर्यंपुंसांभविष्यति॥ऐंद्रंपाशुपतंब्राह्मंस्थूणाकर्णंचमाधव॥मंत्रास्तत्रभविष्यंति
प्रयुक्ताःसव्यसाचिना॥अनुजातश्चपितरमधिकोवापराक्रमे॥गीतंस्तोत्रंससौभद्रःसम्यक्तत्रभविष्यति॥उद्गातात्रपुन
र्भीमःप्रस्तोतासुमहाबलः॥विनादान्सनरव्याघ्रोनागानीकांतकृद्रणे॥सचैवतत्रधर्मात्माशश्वद्राजायुधिष्ठिरः॥जपैर्हो
मैश्चसंयुक्तोब्रह्मत्वंकारयिष्यति॥शंखशब्दाःसमुरजाभेर्यश्चमधुसूदन॥उत्कृष्टःसिंहनादश्चसुब्रह्मण्योभविष्यति॥
नकुलःसहदेवश्चमाद्रीपुत्रौयशस्विनौ॥शामित्रंतौमहावीर्यौसम्यक्तत्रभविष्यतः॥कल्माषदंडागोविंदविमलारथपंक्त
यः॥यूपाःसमुपकल्पंतांतस्मिन्यज्ञेजनार्दन॥कर्णिनालीकनाराचवत्सदंतोपबृंहणाः॥तोमराःसोमकलशाःपवित्रा
णिधनूंषिच॥असयोत्रकपालानिपुरोडाशाःशिरांसिच॥हविस्तुरुधिरंकृष्णतस्मिन्यज्ञेभविष्यति॥इध्माःपरिधयश्चैव
शक्तयोविमलागदाः॥सदस्याद्रोणशिष्याश्चकृपस्यचशारद्वतः॥इषवोत्रपरिस्तोमामुक्तागांडीवधन्वना॥महारथप्र

उद्योग

युक्ताश्च द्रौणद्रौणि प्रचोदिताः ॥ प्रातिप्रास्थानिकं कर्म सात्यकिस्तु करिष्यति ॥ दीक्षितो धार्त्तराष्ट्रोत्र पत्नी चास्य महाचमूः ॥ घटो
त्कचोत्र शामित्रं का॰ रिष्यति महाबलः ॥ अतिरात्रे महाबाहो वितते यज्ञकर्मणि ॥ दक्षिणा त्वस्य यज्ञधृष्टद्युम्नः प्रतापवान् ॥
वैतानिके कर्ममुखे जातो यत्कृष्ण पावकात् ॥ यदब्रुवमहं कृष्ण कटुकानि स्म पांडवान् ॥ प्रियार्थं धार्त्तराष्ट्रस्य तेन तप्येद्य
कर्मणा ॥ यदा द्रक्ष्यसि मां कृष्ण निहतं सव्यसाचिना ॥ पुनश्चितिस्तदा चास्य यज्ञस्याथ भविष्यति ॥ दुःशासनस्य रुधिरं यदि
पास्यति पांडवः ॥ आनर्दं नर्दतः सम्यक् तदा सुत्यं भविष्यति ॥ यदा द्रोणं च भीष्मं च पांचाल्यौ पातयिष्यतः ॥ तदा यज्ञावसानं
तद्भविष्यति जनार्दन ॥ दुर्योधनं यदा हंता भीमसेनो महाबलः ॥ तदा समाप्स्यते यज्ञो धार्त्तराष्ट्रस्य माधव ॥ स्नुषाश्च प्रस्नुषाश्चै
व धृतराष्ट्रस्य संगताः ॥ हतेश्वरा हतपुत्रा हतनाथाश्च केशव ॥ रुदंत्यः सह गांधार्या श्वगृध्रकुररा कुले ॥ स यज्ञेस्मिन्नव
भृथो भविष्यति जनार्दन ॥ विद्यावृद्धा वयोवृद्धाः क्षत्रियाः क्षत्रियर्षभ ॥ वृथामृत्युं न कुर्वीरं त्वत्कृते मधुसूदन ॥ शस्त्रेण निधनं
गच्छेत्समृद्धं क्षत्रमंडलं ॥ कुरुक्षेत्रे पुण्यतमे त्रैलोक्यस्यापि केशव ॥ तदत्र पुंडरीकाक्ष

२४१

अपि त्वां न तथैव तत्ताभ्यवन्ति किमित्यर्थः ॥ उपपादनात् दानात् ॥ भयावहानि भयदानि भयानकानि दर्शनमात्रेणान्त
यदेत्वा कुंतीनि तदा न भविता त्रेतेति युगत्रयात्तः कलिः दुःखसहस्र इति दुःखजातीत्यर्थः ॥ अवयवार्थो लोचनेन च

विधत्स्व यदभीप्सितं ॥ यथा कार्त्स्न्येन वार्ष्णेय क्षत्रं स्वर्गमवाप्नुयात् ॥ यावत्स्थास्यंति गिरयः सरितश्च जनार्दन ॥ ताव
त्कीर्तिभवः शब्दः शाश्वतोयं भविष्यति ॥ ब्राह्मणाः कथयिष्यंति महाभारतमाहवं ॥ समागमेषु वार्ष्णेय क्षत्रियाणां यशो
धनं ॥ समुपानय कौंतेयं युद्धाय मम केशव ॥ मंत्रसंवरणं कुर्वन्नित्यमेव परंतप ॥ ॥ इत्युद्योगे कर्णोपनिवादे
॥ ॥ संजय उवाच ॥ ॥ कर्णस्य वचनं श्रुत्वा केशवः परवीरहा ॥ उवाच प्रहसन्वाक्यं स्मितपूर्वमिदं तदा ॥ ॥ भगवा
नुवाच ॥ ॥ अपि त्वां न लभेत्कर्ण राज्यलंभोपपादनं ॥ मया दत्तां हि पृथिवीं न प्रशासितुमिच्छसि ॥ ध्रुवो जयः पांडवा
नामितीदं न संशयः कश्चन विद्यतेत्र ॥ जयध्वजो दृश्यते पांडवस्य समुच्छ्रितो वानरराज उग्रः ॥ दिव्या माया विहिता
विश्वकर्मणा भौमनेन समुच्छ्रिता इंद्रकेतुप्रकाशा ॥ दिव्यानि भूतानि जयावहानि दृश्यंते चैवात्र भयानकानि ॥ न सज्जते शैलव
नस्पतिभ्य ऊर्ध्वं तिर्यग्योजनमात्ररूपः ॥ श्रीमान्ध्वजः कर्ण धनंजयस्य समुच्छ्रितः पावकतुल्यरूपः ॥ यदा द्रक्ष्यसि सं
ग्रामे श्वेताश्वं कृष्णसारथिं ॥ ऐंद्रमस्त्रं विकुर्वाणमुभे चैवाग्निमारुते ॥ गांडीवस्य च निर्घोषं विस्फूर्जितमिवाशनेः ॥ न
तदा भविता त्रेता न कृतं द्वापरं न च ॥ यदा द्रक्ष्यसि संग्रामे धर्मपुत्रं युधिष्ठिरं ॥ जपहोमसमायुक्तं स्वां रक्षंतं महाचमूं ॥

तदा दुर्योधनशकुनिदुःशासनानां त्रयाणां समाहारः तेषां भवन्तु तत्त्वात्तान कृतं कर्णकृतः न द्वापरं कलमद इति बो
ध्यं ॥

पृथिव्यां विनाशं त्वयि मां मोहयितुमिछसि राज्यप्रदानादिना। अस्माकमपि तत्त्वमाज्ञात्वादेव विदितत्वेन राज्यैश्वर्यादि व्यर्थः॥

उद्योग आदित्यमिव दुर्धर्षं तपंतं शत्रुवाहिनीं। नतदा भविता त्रेता न कृतं द्वापरं न च॥ यदा द्रक्ष्यसि संग्रामे भीमसेनं महाब-
लं। दुःशासनस्य रुधिरं पित्वा नृत्यंतमाहवे। प्रभिन्नमिव मातंगं प्रतिद्विरदघातिनं। नतदा भविता त्रेता न कृतं द्वा-
परं न च। यदा द्रक्ष्यसि संग्रामे द्रोणं शांतनवं कृपं। दुर्योधनं च राजानं सैंधवं च जयद्रथं। युद्धायापततस्तूर्णं वारि-
तान्सव्यसाचिना। नतदा भविता त्रेता न कृतं द्वापरं न च। यदा द्रक्ष्यसि संग्रामे माद्रीपुत्रौ महाबलौ। वाहिनीं धार्तरा-
ष्ट्राणां क्षोभयंतौ गजाविव। विगाढे शस्त्रसंपाते परवीररथारुजौ। नतदा भविता त्रेता न कृतं द्वापरं न च॥ ब्रूयाः कृष्ण
इतो गत्वा द्रोणं शांतनवं कृपं। सौम्योयं वर्त्तते मासः सुप्रापयवसेंधनः। सर्वौषधिवनस्फीतः फलवानल्पमक्षिकः
॥ निष्पंकोरसवत्तोयो नात्युष्णशिशिरः सुखः। सप्तमाच्चापि दिवसादमावास्या भविष्यति। संग्रामो युज्यतां तस्यां तामाहुः
शक्रदेवतां। तथा राज्ञो वदेः सर्वान्ये युद्धायाभ्युपागताः॥ यद्वो मनीषितं तद्वै सर्वं संपादयाम्यहं। राजानो राजपुत्राश्च
दुर्योधनवशानुगाः। प्राप्य शस्त्रेण निधनं प्राप्स्यंति गतिमुत्तमां॥ ॥इत्युद्योगे कर्णोपनिवादे॥ ॥संजय उवाच॥
केशवस्य तु तद्वाक्यं कर्णः श्रुत्वा हितं शुभं। अब्रवीदभिसंपूज्य कृष्णं तं मधुसूदनं। जानन्मां किं महाबाहो संमोह- २४२
यितुमिछसि। योयं पृथिव्याः कार्त्स्न्येन विनाशः समुपस्थितः। निमित्तं तत्र शकुनिरहं दुःशासनस्तथा। दुर्योधनस्य

प्राजापत्यं रोहिणीं। मित्रं मित्रदेवतां। संशयन्नमित्रनक्षत्रं पीडनात्। ग्रहः शनिश्चरः। पुष्पशकुनाः कुक्कुटाः॥

नृपतिर्धृतराष्ट्रसुतो नवरा। असंशयमिदं कृष्ण महद्युद्धमुपस्थितं। पांडवानां कुरूणां च घोरं रुधिरकर्दमं। राजानो
राजपुत्राश्च दुर्योधनवशानुगाः। रणे शस्त्राग्निना दग्धाः प्राप्स्यंति यमसादनं। स्वप्ना हि बहवो घोरा दृश्यंते मधुसूदन।
निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः। पराजयं धार्तराष्ट्रे विजयं च युधिष्ठिरे। शंसंत इव वार्ष्णेय विविधा
रोमहर्षणाः। प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः। शनैश्चरः पीडयति पीडयन्प्राणिनोधिकं। कृत्वा चां-
गारको वक्रं ज्येष्ठायां मधुसूदन। अनुराधां प्रार्थयते मैत्रं संशमयन्निव। नूनं महद्भयं कृष्ण कुरूणां समुपस्थि-
तं। विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः। सोमस्य लक्ष्म व्यावृत्तं राहुरर्कमुपेति च। दिवश्चोल्काः पतंत्येताः स-
निर्घाताः सकंपनाः। निष्टनंति च मातंगा मुंचंत्यश्रूणि वाजिनः। पानीयं यवसं चापि नाभिनंदंति माधव। प्रादुर्भूतेषु
चैतेषु भयमाहुरुपस्थितं। निमित्तेषु महाबाहो दारुणं प्राणिनाशनं। अल्पे भुक्ते पुरीषं च प्रभूतमिह दृश्यते। वाजिनां
वारणानां च मनुष्याणां च केशव। धार्तराष्ट्रस्य सैन्येषु सर्वेषु मधुसूदन। पराभवस्य तल्लिंगमिति प्राहुर्मनीषिणः॥
॥ प्रहृष्टं वाहनं कृष्ण पांडवानां प्रचक्षते। प्रदक्षिणा मृगाश्चैव तत्सैन्यं जयलक्षणं। अपसव्या मृगाः सर्वे धार्तराष्ट्रस्य के-
शव। वाचश्चाप्यशरीरिण्यस्तत्पराभवलक्षणं। मयूराः पुष्पशकुना हंसाः सारसचातकाः। जीवंजीवकसंघाश्चाप्यनुगच्छंति पां

वल्गाः काकाः॥ वयः पाकारमूलं। यां स्रुतिवयः॥ वेष्टि कुर्वी धनः॥ एकान्त्यासने। एकाकापि त्रीश्च स्वमंतीशां कंकरोतिपर्थ।

उद्योग दुर्वान्नृगृधाः कंकाः वकाः॥ श्येना श्राद्धधाना महाप्रक्काः॥ मक्षिकाणां च संघाता अनुधावंति केशवान्नः धार्तराष्ट्रस्य सै
न्येषु भेरीणां नास्ति निःस्वनः॥ अनाहताः पांडवानां नदंते पटहाः किल॥ उदपानाश्च नर्दंति यथा गोवृषभास्तथा॥ धार्तरा
ष्ट्रस्य सैन्येषु तत्पराजयलक्षणं॥ मांसशोणितवर्षं च वृष्टं देवेन माधव॥ तथा गंधर्वनगरं भानुमत्समुपस्थितं॥ सप्रा
कारं सपरिखं सवप्रं चारुतोरणं॥ कृष्णश्च परिघस्तत्र भानुमावृत्य तिष्ठति॥ उदयास्तमने संध्ये वेदयन्ती महद्भयं॥
श्रवा शिवाश्च नेदुर्घोरं तत्पराजयलक्षणं॥ कृष्णग्रीवाश्च शकुना रक्तपादा भयानकाः॥ संध्यामभिमुखा यांति तत्पराजयलक्ष
णं॥ ब्राह्मणान्प्रथमं द्वेष्टि गुरूंश्च मधुसूदन॥ भृत्यान्भक्तिमतश्चापि तत्पराजयलक्षणं॥ पूर्वा दिग्लोहिताकारा शस्त्रव
र्णा च दक्षिणा॥ आमपात्रप्रतीकाशा पश्चिमा मधुसूदन॥ प्रदीप्ताश्च दिशः सर्वा धार्तराष्ट्रस्य माधव॥ महद्भयं वेदयं
ति तस्मिन्नुत्पातदर्शिनः॥ सहस्रपादं प्रासादं स्वप्नांते स्म युधिष्ठिरः॥ अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत॥ श्वेतोष्णी
षाश्च दृश्यंते सर्वे ते शुक्लवाससः॥ आसनानि च शुभ्राणि सर्वेषामुपलक्षये॥ तव चापि मया कृष्ण स्वप्नांते रुधिरा
विलां॥ आंत्रेण पृथिवीं दृष्टा परिक्षिपां जनार्दन॥ अस्थिसंचयमारूढश्चामितौजा युधिष्ठिरः॥ सुवर्णपात्र्यां संहृष्टो भुक्त २४२
वान्घृतपायसं॥ युधिष्ठिरो मया दृष्टो ग्रसमानो वसुंधरां॥ त्वया दत्तामिमां व्यक्तं भोक्ष्यते स वसुंधरां॥ उच्चं पर्वतमारूढो भी

एकास्याशनेयो रात्तत्पराजयलक्षणं॥

ज्ञात्वमिंद्रधनुः॥ शुक्लं केयूरकंठत्रं केकंठात्ररणां॥ शुक्लं त्वं च शुक्लामयत्वात्राततकृदयं कन्नूमसवचोनायैत्तित्प्रत्ये ति॥
नकर्णोरकोटरः॥ नहायाशिनीरव्याघ्रोऽग्र सन्निवसहीं लिमां॥ कृपश्चिप्यतिनः सर्वोनसमुपाक्रंमहारसी॥ विदितं मे
हृषीकेश यतो धर्मस्ततो जयः॥ पांडुरं गजमारूढो गांडीवी स धनंजयः॥ त्वया सार्धं हृषीकेश श्रिया परमया ज्वलन्॥ यू
यं सर्वे वधिष्यध्वं तत्र मे नास्ति संशयः॥ पार्थिवान्समरे कृष्ण दुर्योधनपुरोगमान्॥ नकुलः सहदेवश्च सात्यकिश्च महा
रथः॥ शुद्धकेयूरकंठत्राः शुक्लमाल्याम्बरावृताः॥ अधिरूढा नरव्याघ्रा नरवाहनमुत्तमं॥ त्रय एते मया दृष्टाः पांडुरच्छ
त्रवाससः॥ श्वेतोष्णीषाश्च दृश्यंते त्रय एते जनार्दन॥ धार्तराष्ट्रेषु सैन्येषु तान्विजानीहि केशव॥ अश्वत्थामा कृपश्चैव
कृतवर्मा च सात्वतः॥ रक्तोष्णीषाश्च दृश्यंते सर्वे माधव पार्थिवाः॥ उष्ट्रयुक्तं समारूढौ भीष्मद्रोणौ महारथौ॥ मया सार्धं
महाबाहो धार्तराष्ट्रेण चाभिभो॥ अगस्त्यशास्तां च दिशं प्रयाताः स्म जनार्दन॥ अचिरेणैव कालेन प्राप्स्यामो मधुसूद
नं॥ अहं चान्ये च राजानो यच्च तत्क्षत्रमंडलं॥ गांडीवाग्निं प्रवेक्ष्याम इति मे नास्ति संशयः॥ कृष्ण उवाच॥ ॥उपस्थित
विनाशेयं नूनमद्य वसुंधरा॥ तथाहि मे वचः कर्ण नावैति हृदयं तव॥ सर्वेषां तात भूतानां विनाशे समुपस्थिते॥
५ अनयो नयसंकाशो हृदयान्नापसर्पति॥ ॥कर्ण उवाच॥ ॥अपि त्वा कृष्ण पश्याम जीवंतोऽस्मान्महारणात्॥ समुत्ती सो
र्णं महाबाहो वीरक्षयविनाशनात्॥ अथवा संगमः कृष्ण स्वर्गे नो भविता ध्रुवं॥ तत्रेदानीं समेष्यामः पुनः सार्धं त्व

कर्णोपनिवादः समाप्तः॥ ॥कृतंनोस्माकं पांडवानां येषां ते श्राममस्माकं मातुर्वधः समस्तात्॥



यानद्यादिस्तु स्वामाधवं कर्णीयरिष्वज्य वर्धीडितां विसर्जितः केशवेन राधेयस्त्वा दवात्ररता ततः स्वरथमास्थाय
जांबूनदविभूषितं। सहास्माभिर्निववृते राधेयो दीनमानसः॥ ततस्त्वाशुतरं शौरिः केशवः सहसात्यकिः॥ चनक
चोदयच्चाश्वान्याहीयाहीतिसारथिं॥ ॥इत्युद्योगे कर्णोपनिवादः समाप्तः॥ ॥वैशंपायन उवाच॥ ॥असिद्धानु
नये कृष्णे कुरुभ्यः पांडवान्गते। अभिगम्य पृथां क्षत्ता शनैः शोचन्निवाब्रवीत्॥ जानासि मे जीवपुत्रि भावं नित्यमवि
ग्रहे। क्रोशतो न च गृह्णीते वचनं मे सुयोधनः॥ उपपन्नो ह्यसौ राजा चेदिपांचालकेकयैः॥ भीमार्जुनाभ्यां कृष्णेन यु
युधानयमैरपि॥ उपप्लव्ये निविष्टोपि धर्ममेव युधिष्ठिरः॥ कांक्षते ज्ञातिसौहार्दाद्बलवान्दुर्बलो यथा॥ राजा
तु धृतराष्ट्रोयं वयोवृद्धो न शाम्यति॥ मत्तः पुत्रमदेनैव विधर्मे पथि वर्तते॥ जयद्रथस्य कर्णस्य तथा दुःशासन
स्य च। सौबलस्य च दुर्बुद्ध्या मिथो भेदः प्रवर्तते॥ अधर्मेण हि धर्मिष्ठं हृतं वै राज्यमीदृशं॥ येषां तेषामयं धर्मः
सानुबंधो भविष्यति॥ ह्रियमाणे बलाद्धर्मे कुरुभिः को न संज्वरेत्॥ असाम्ना केशवे याते समुद्योक्ष्यंति पांडवाः॥
ततः कुरूणामनयो भविता वीरनाशनः॥ चिंतयन्न लभे निद्रामहस्सु च निशासु च॥ श्रुत्वा तु कुंती तद्वाक्यमर्थका २४४
मेन भाषितं॥ सा निःश्वसंती दुःखार्ता मनसा विममर्श ह॥ धिगस्त्वर्थं यत्कृतेयं महाज्ञातिवधः कृतः॥ वर्त्स्यते सुहृदां चैव

पदस्थ्यानमेव संबोध्या॥ अयुद्धेयु दत्तावेपराभवा कामं स्वेवधायापरिवासितस्यकः॥

युद्धेस्मिन्विपराभवं। पांडवाश्चेदिपांचालायादवाश्च समागताः॥ भारतैः सह योत्स्यंते किं नु दुःखमतः परं। पश्ये दो
षं ध्रुवं युद्धे तथा युद्धे पराभवं॥ अधनस्य मृतं श्रेयो न हि ज्ञातिक्षये जयः॥ इति मे चिंतयंत्या वै हृदि दुःखं प्रवर्त
ते॥ पितामहः शांतनव आचार्यश्च युधांपतिः॥ कर्णश्च धार्तराष्ट्रार्थं वर्धयंति भयं मम॥ नाचार्यः कामवान्शिष्यै
र्द्रोणो युध्येत जातु चित्। पांडवेषु कथं हार्दं न कुर्याच्च पितामहः॥ अयमेको वृथादृष्टिर्धार्तराष्ट्रस्य दुर्मतेः॥ मो
हानुवर्ती सततं पापो द्वेष्टि च पांडवान्॥ महत्यनर्थे निर्बंधी बलवांश्च विशेषतः॥ कर्णः सदा पांडवानां तन्मे दहति
संप्रति॥ आशंसे त्वद्य कर्णस्य मनोहं पांडवान्प्रति॥ प्रसादयितुमासाद्य दर्शयंती यथातथं॥ तोषितो भगवान्यत्र दुर्वासा
मे वरं ददौ॥ आह्वानं मंत्रसंयुक्तं वसंत्याः पितृवेश्मनि॥ साहमंतःपुरे राज्ञः कुंतिभोजपुरस्कृता॥ चिंतयंती बहुविधं हृदयेन वि
दूयता॥ बलाबलं च मंत्राणां ब्राह्मणस्य च वाग्बलं॥ स्त्रीभावाद्बालभावाच्च चिंतयंती पुनः पुनः॥ धात्र्या विश्रब्धया गुप्ता सखी
जनावृता तदा॥ दोषं परिहरंती च पितुश्चारित्ररक्षिणी॥ कथं नु सुकृतं मे स्यान्नापराधवती कथं॥ भवेयमिति संचिंत्य ब्राह्मणं
तं नमस्य च॥ कौतूहलात्तु तं लब्ध्वा बालिश्यादाचरं तदा॥ कन्या सती देवमर्कमासादयमहं ततः॥ योसौ कानीनगर्भो मे पुत्र
वत्परिरक्षितः॥ कस्मान्न कुर्याद्वचनं पथ्यं भ्रातृहितं तथा॥ इति कुंती विनिश्चित्य कार्यं निश्चयमुत्तमं॥

कार्य्यार्थं कर्त्तव्यप्रयोजनार्थं । उत्तरवाससि । उत्तरीयच्छायायां । एकदर्शिनी एकं त्वामेव स्वे नेष्यन्ती ॥

उद्योग कार्य्यार्थमभिनिश्चित्य ययौ भागीरथीं प्रति । आत्मजस्य ततस्तस्य घृणिनः सत्यवादिनः । गंगातीरे पृथाश्रौषीदुपाध्यय
ननिस्वनं । प्राङ्मुखस्योर्ध्वबाहोः सा पर्य्यतिष्ठत पृष्ठतः । जप्यावसानं कार्य्यार्थं प्रतीक्षन्ती तपस्विनी । अतिष्ठत् सूर्य्यतापा
र्त्ता कर्णस्योत्तरवाससि । कौरव्यपत्नी वार्ष्णेयी पद्ममालेव शुष्यती । आपृष्ठतापाज्जप्त्वा स परिवृत्य यतव्रतः । दृष्ट्वा
कुन्तीमुपातिष्ठदभिवाद्य कृताञ्जलिः । यथान्यायं महातेजा मानी धर्मभृतां वरः ॥ इत्युद्योगे कुन्तीकर्णसमागमः ॥
कर्ण उवाच ॥ राधेयोहमाधिरथिः कर्णस्त्वामभिवादये । प्राप्ता किमर्थं भवती ब्रूहि किं करवाणि ते ॥ कुन्त्युवाच
कौन्तेयस्त्वं न राधेयो न तवाधिरथः पिता । नासि सूतकुले जातः कर्ण तद्विद्धि मे वचः । कानीनस्त्वं मया जातः पूर्वजः कु
क्षिणा धृतः । कुन्तिराजस्य भवने पार्थस्त्वमसि पुत्रक । प्रकाशकर्मा तपनो योयं देवो विरोचनः । अजीजनत्त्वां मय्येष क
र्ण शस्त्रभृतां वरं । कुण्डली बद्धकवचो देवगर्भः श्रिया वृतः । जातस्त्वमसि दुर्द्धर्ष मया पुत्र पितुर्गृहे । स त्वं भ्रातॄनसंबुध्य मो
हाद्यदुपसेवसे । धार्त्तराष्ट्रान्न तद्युक्तं त्वयि पुत्र विशेषतः । एतद्धर्म्मफलं पुत्र नराणां धर्मनिश्चये । यत्तुष्यन्त्यस्य पितरो
माता चाप्येकदर्शिनी । अर्जुनेनार्जितां पूर्वं हृतां लोभादसाधुभिः । आच्छिद्य धार्त्तराष्ट्रेभ्यो भुंक्ष्व यौधिष्ठिरीं श्रियं । अ २४५
द्य पश्यन्तु कुरवः कर्णार्जुनसमागमं ॥

तृप्यन्ति चाहं कुर्वतीति शेषः । त्वत्कृते यत्नायं उपगतं समाहितं तत्किं शत्रुः कुर्य्यादित्यन्वयः ॥
सौभ्रात्रेण समालब्धमद्य तं मे तु असाधवः । कर्णार्जुनौ वै भवतां यथा रामजनार्दनौ । असाध्यं किं नु लोके स्याद्युवयोः संहितात्मनो
ः । कर्ण शोभिष्यसे नूनं पंचभिर्भ्रातृभिर्वृतः । वेदैः परिवृतो ब्रह्मा वेद्यामिव महाध्वरे । उपपन्नो गुणैः ज्येष्ठः श्रेष्ठेषु बन्धुषु । सूत श्रेष्ठः
पुत्रेति मा शब्दः पार्थस्त्वमसि वीर्य्यवान् ॥ ॥इत्युद्योगे कुन्तीकर्णसमागमे ॥ ॥वैशंपायन उवाच ॥ ॥ततः सूर्य्यान्निश्चरि तां
कर्णः शुश्राव भारतीं । दुरत्ययां प्रणयिनीं पितृवद्भास्करेरितां । सत्यमाह पृथा वाक्यं कर्ण मातृवचः कुरु । श्रेयस्ते स्यान्नरव्या
घ्र सर्वमाचरतस्तथा ॥ ॥वैशंपायन उवाच ॥ ॥एवमुक्तस्य मात्रा च स्वयं पित्रा च भानुना । चचाल नैव कर्णस्य मतिः सत्यधृते
स्तदा ॥ ॥कर्ण उवाच ॥ ॥न चैतच्छ्रद्दधे वाक्यं क्षत्रिये भाषितं त्वया । धर्म्मद्वारं ममैतत्स्यान्नियोगकरणं तव । अकरोन्मयि य
त्पापं भवती सुमहात्ययं । अपाकीर्णोस्मि यन्मातस्तद्यशःकीर्त्तिनाशनं । अहं च क्षत्रियो जातो न प्राप्तः क्षत्रसत्क्रिया । त्वत्कृते किं
नु पापीयः शत्रुः कुर्य्यान्ममाहितं । क्रियाकाले त्वनुक्रोशमकृत्वा त्वमिमं मम । हीनसंस्कारसमयमद्य मां समचूचुदः । न वै म
म हितं पूर्वं मातृवच्चेष्टितं त्वया । सा मां संबोधयस्यद्य केवलात्महितैषिणी । कृष्णेन सहितात्को वै न व्यथेत धनंजयात् । कोद्य भी हि
तं मां विद्यान्न पार्थानां समितिं गतं । अभ्राता विदितः पूर्वं युद्धकाले प्रकाशितः । पाण्डवान्यदि गच्छामि किं मां क्षत्रं वदिष्यति । सर्वका

निर्वेष्टव्यं तत्त्वयेदं भ्रकुराजं फलं तु यन्नोक्तव्यं। बलं सामर्थ्यं। नाकिंचनत्वादिरूपं। विचरामि नृपात्ययि॥

उद्योग सिः संविभक्ताः सूचितः स्वयथा सुखं। अहं विधास्याम्यहं तां कुर्यान्ति यत्फलं कथं। उपनह्य परिविरे ये मां निषसुखमते। नमस्तु
वं तिव समावमवो वा ममेवं ययथा। ममध्यायेन ये रात्रून्नशकाः इति ममामि स्त्री मन्यते कथं तेषामहं छिंद्यामनोरथं। मया स्वे
न मंत्रमंत्रिती धीति दुरत्ययं। अपारे पारकामा ये त्मजेयं तान्दंकथा। अयं हि कालः संप्राप्तो धार्तराष्ट्रोपजीविनां। निर्वेष्ट
स्यात् व्यमथा मत्र प्राणान्नपरिरक्षि वा कृतार्थाः। सुवृत्ता ये हि तस्य कालेत्युपस्थिते। अनवेद्य कृतं पाया याविक्कवस्तन वस्थिताः॥
राज्ञा किल्बिषिणां ते ये ते वैधीपिंडापहारिणां। निवापं न परा लोको विद्यते पापकर्मणां। धृतराष्ट्रस्य पुत्राणां मध्ये यो स्यामि ते सु
तः। बलं यशः किं वास्माय न विस्त्रष्ट्रमृतेव दाः॥ आवृत्तां स्यममध्ये वृत्तं रकृत्स्न तु रुधोवितं। अतोर्थकरमध्ये तत्र करोम्यव
नेव च॥ नवते यममारन्तोम विमोह्यो नविष्यति। बध्यांश्चिय प्रह्यां यामेन हनिष्यामि ते ख्लान्। युधिष्ठिरं वनीमं वचमोचि वा
र्जुनाहते। अर्जुनेन समं युद्धमपि योधिष्ठिरे वनो। अर्जुनं विनिहत्य ज्येसंस्त्रां संस्यात्फलं मया। यश्च मा वा यि सु ज्यें निहत
ः सव्यसाचिना नते जातु न शिष्यति सुवाः पंचपथा विनि। निरर्जुनाः सकर्णा वा सार्जुना वा हते मयि। इति कर्णवचः श्रुत्वा कुंती २४६
दुःखात्प्रवेपती। उवाच पुत्रमाश्लिष्य कर्णं धैर्यादकंपना। एवं विनाव्यमेतेन क्षयं यास्यंति कौरवाः॥ यथा त्वं भाषसे कर्ण दैवं तु बल

पथ्यं हतोपकारि। हितं परलोकाविरोधि। कुरुसुरव्ययोर्मध्ये धृतराष्ट्रयोः॥ वक्तं संवीते षांनृपाणां वचनं॥

वत्तरास्वयाव तु समीस्वाचरणं मम यं रात्रु कर्णं नादत्तं तत्वति जानीहि संगर इति मो वनं। अनामयं स्वस्ति चेति परिष्वज्योकर्ण
मब्रवीत्। तां कर्णोभ्यनंदेतस्तु ततः कांतनतो जगामसु पृथक्॥ ॥इत्युद्योगे कुंतीकर्णसमागमः॥ ॥वैशंपायन उवाच॥ ॥आग
मय्य हास्तिनपुरादुपप्लव्यमरिंदमः पांडवानां यथा वृत्तं केशवः सर्वमुक्तवान्॥ संभाष्य सुचिरं कालं मंत्रयित्वा पुनः पुनः स्वमे
वावसथं शौरिर्विश्रामार्थं जगाम ह। विसृज्य सर्वान्नृपतीन्विराटप्रमुखांस्तथा। पांडवा भ्रातरः पंच भानावस्तं गते सति। संध्यामु
पास्य ध्यायंतस्तमेव गतमानसाः। आनाय्य कृष्णं दाशार्हं पुनर्मंत्रममंत्रयन्॥ ॥युधिष्ठिर उवाच॥ ॥त्वया नागपुरं गत्वा सभायां
धृतराष्ट्रजः। किमुक्तः पुंडरीकाक्ष तन्नः संवक्तुमर्हसि॥ ॥वासुदेव उवाच॥ ॥मया नागपुरं गत्वा सभायां धृतराष्ट्रजः। तथ्यं
पथ्यं हितं चोक्तो न च गृह्णाति दुर्मतिः॥ ॥युधिष्ठिर उवाच॥ ॥तस्मिन्नुत्पथमापन्ने कुरुवृद्धः पितामहः। किमुक्तवान्हृषीकेश दु कि
र्योधनममर्षणं। आचार्यो वा महाभागो भारद्वाजः किमब्रवीत्। पिता वा धृतराष्ट्रस्तं गांधारी वा किमब्रवीत्। पिता यवीयानस्
माकं क्षत्ता धर्मविदां वरः। पुत्रशोकाभिसंतप्तः किमाह धृतराष्ट्रजं। किं च सर्वे नृपतयः सभायां ये समासते। उक्तवंतो यथातत्वं
तद्ब्रूहि त्वं जनार्दन। उक्तवान्हि भवान्सर्वं वचनं कुरुमुख्ययोः। धार्तराष्ट्रस्य तेषां हि वचनं कुरुसंसदि। कामलोभाभिभूतस्य

उद्योग

धार्त्तराष्ट्रस्याप्रियं प्रियं रुद्धेनेति इत्नीति भगवानुक्तवान्तस्तर्वदेवं श्रोतुमिच्छामीत्यर्थः॥ सा विश्चित्रवीर्यो विश्वामित्रः॥

मंदस्य पाजमानितमः॥ अप्रियं रुद्धेन सहेनत्यतिष्ठतिके चावा तेषां वाक्यानि गोपिंदं श्रोतुमिच्छाम्यहं विशेषः यथावन्नामिय
ध्येतकत्वमानन पाक्रमाभवान्न हितेयतिः रुसमनवा वाचोभवान्नुक्तः॥ ॥वासुदेव उवाच॥ ॥ श्रृणु राजन्यथा वाच्य
मुक्तं राजा मुध्या धनाः मधोक्रमणं राजेंद्र मनाथांतनिविधमेमया विश्वामित्र वाक्यं जन्तर सदूतरा दृष्ट्वाः श्रुत्वा भीष्मः सुमंत्र
ध्दे ववनरव्हसीना दुर्योधन निबोधे दंक्रता ये तु हुवीमिते तान बुत्वा राजन्दशाहिस्त कृष्णस्य हितंकृतं मममानविता राज
ज्ञातु लोकविश्रुतः॥ तस्माद्द्रम करत्वा संभवः श्रुत्वतांवरः तस्यबुद्धिः महत्सानाहितीयः स्मारुकथ श्रुत्वा॥ एकं तु वस्मद्वेवं वेषव
दंतिमती धिगापत वोधेदं कुलेयायाहितीय्ये वृक्ष कृष्णा॥ तस्मा व्सीपिते बुधा कालीमातरमावदं॥ प्रतिज्ञां तु कर्त्तुं कृत्वापि
युरवे कृत स्यवा॥ ज्यता वोवहितस्वयथा पुवि दितं न वा प्रतीतोनिवन्धस्य प्रतिज्ञा मनुष्या तव्यान्तगत्ते मता भा कृतः श्री
मात्रकृतं कतोवेष्ट्रा॥ विश्चित्रवीर्यो धर्मो नामकतेया नम्रयापि श्वासदीक्षा विपितरं सम्याञ्चोभन्यवेत्रायो॥ विश्चित्रवीर्य राज
संप्रमोत्या तु धनुत्र॥ तस्मा वंसद्दैवान्नु कारा राजेंद्र भनुपादां शंसित्वा यथा यदिवसं धातन पितेव कृत्वा श्रुत्वा ततोरामे प्रमता दं २४७
व्हसुत्वयात्रासा॥ मषि निभद्रया देतिनी गोरे विष्ट्वामित्रः॥ तार श्यामिता कृष्ट यत्मारां समय सा ... दां त्वराजकेरा हुँमवचवेसु
रेश्वरः॥ तदोम्प्रधावन्नामे वप्रजा॥ मनयाश्चयं यत्ना यनेकनदी यत्रिविरस्यसून्यता करणात मय एव विश्वामित्र इत्युक्तः॥

इतय इतीः॥

क्षुद्भयपीडिताः॥ उपश्रीमाः श्रुताः सर्वोराजा नवननवा यत्ना॥ इतीः श्रुतुवन्न दंते शोनके॥ कृतप्रवर्द्धनाय प्रीत्यं तेहि श्रुताः सर्वा
वाधिमित्रं राजकस्मो॥ श्रुत्वा वशिष्ठा गांगेय तातः रहिता तुमदीपि॥ साधीन्द्र गुरुवी रत्नं श्रुता धर्मेण पालय॥ न्यचिंती वनि
मा राष्ट्रं विनाश्यमुपागत॥ ॥नारद उवाच॥ ॥ श्रुता तां स्तुस्यलीनां विनिवा तु स्वसे मेमनः॥ प्रतिकार स्यता राज्य मकृते स
रतेन यथा तत यो तमः हा राज मामा कालीव मे श्रुता॥ कृत्वा सुमेहित वाव्यो व्हासन राजा श्रुव कृत श्रुता॥ माव तुन्दवा सेन मान
वराजेति मेनतं सदातीय यकिंतेराष्ट्रं त्वा प्राप्य विनशिष्यति मत्वेम स्महिता र्थी विराजा नवमहामहो॥ इत्युक्तः प्राञ्जलिर्नत्वा तु
विनो न्द्रशमाश्रुयः॥ तेष्वोत्वा वेदंशनेत्र प्रतिज्ञा पिचगोरवानाक्रद्दीरता वराजा वकृतस्मा ॠत्वा॥ सुनः प्रितिशो वदे स्वदेश
वप्रति ज्ञाहृतवानेदं खड्डे य्यसु दान स्रुतवान् कृतवस्तलो॥ एवंतामनुजोयाहं मानरेजनसेवदो॥ शुग्रावेच्यातदारमु
तदयानमन्हा सुनि मदनमा नामयमाज प्रमात्मनृषिंतदाश्वयन्त्या र्थं महाराज प्रमादेकेत वाेश्रुमा वे॥ वाचुवान्
जनवद्वदामरन मवमा॥ श्रुधः करणाँ॥ हीनत्वा स्मेवित जायितामव॥ राजा तु यो दुमवकादानां लोकविश्रुतः॥ सराजात
स्यते तु मां यिचुदीपा हहाः रियाः॥ ५ मतो ददं प्राञ्जलिर्नत्वा मामनरेसं प्रसादयत्॥ नां वेशां तनुमाजनः॥ कौरवं वेदांश्च बद्दन्द्ध
तिष्ठांवितयांकुर्यो मितिराजन्मुनः॥ प्रेता॥ ५ उपलिनलिद मूलनी॥

राज्यमदत्तराज्यार्हितं समर्पितवान्। संवलनमात्मीयताकरणं॥

उद्योग मातातकुलनाशाय राज्यस्यार्धं प्रदीयतां। मयिजीवति राज्यं कः संप्रशासेत्पुमानिह। मावमंस्थावचो मह्यं शममिच्छामि वः
सदा। न विशेषोस्ति मे पुत्र त्वयि तेषु च पार्थिव। मतमेतत्पितुस्तुभ्यं गांधार्या विदुरस्य च। श्रोतव्यं खलु वृद्धानां नाभिशंकी
र्वचो मम। नाशयिष्यसि मा सर्वमात्मानं पृथिवीं तथा॥ ॥इत्युद्योगपर्वणि॥ ॥भीष्मेणोक्ते ततो द्रोणो दुर्योधनमभा
षत। मध्ये नृपाणां भद्रं ते वचनं वचनक्षमः। प्रातीपः शांतनुस्तात कुलस्यार्थे समुत्थितः। यथा देवव्रतो भीष्मः कुलस्यार्थे
स्थितोभवत्। ततः पांडुर्नरपतिः सत्यसंधो जितेंद्रियः। राजा कुरूणां धर्मात्मा सुव्रतः सुसमाहितः। ज्येष्ठाय राज्यमददद्धृतरा
ष्ट्राय धीमते। यवीयसे तथा क्षत्रे कुरूणां वंशवर्द्धनः। ततः सिंहासने राजन्स्थापयित्वैनमच्युतं। वनं जगाम कौरव्यो भार्या
भ्यां सहितो नृपः। नीचैः स्थित्वा तु विदुर उपास्ते स्म विनीतवत्। प्रेष्यवत्पुरुषव्याघ्रो बालव्यजनमुत्क्षिपन्। ततः सर्वाः प्रजा
स्तात धृतराष्ट्रं जनेश्वरं। अन्वपद्यंत विधिवद्यथा पांडुं जनाधिपं। विसृज्य धृतराष्ट्राय राज्यं स विदुराय च। चचार पृथिवीं पां
डुः सर्वां परपुरंजयः। कोशसंजनने दाने भृत्यानां चान्ववेक्षणे। भरणे चैव सर्वस्य विदुरः सत्यसंगरः। संधिविग्रहसंयुक्तो २४८
राज्ञां संवाहनेक्रियाः। अवैक्षत महातेजा भीष्मः परपुरंजयः। सिंहासनस्थो नृपतिर्धृतराष्ट्रो महाबलः। अन्वास्यमानः सततं विदु
॥ रेण महात्मना॥

॥ संवलनक्रियाः पाठः टीः॥

शास्त्रमाज्ञां॥

कथं तस्य कुले जातः कुलभेदं व्यवस्यति। संभूय भ्रातृभिः सार्धं भुंक्ष्व भोगाञ्जनाधिप। ब्रवीम्यहं न कार्पण्यान्नार्थहेतो
ः कथंचन। भीष्मेण दत्तमश्नामि न त्वया राजसत्तम। नाहं त्वत्तोभिकांक्षिष्ये वृत्त्युपायं जनाधिप। यतो भीष्मस्ततो द्रोणो यद्भी
ष्मस्त्वाह तत्कुरु। दीयतां पांडुपुत्रेभ्यो राज्यार्धमरिकर्शन। सममाचार्यकं तात तव तेषां च मे सदा। अश्वत्थामा यथा
मह्यं तथा श्वेतहयो मम। बहुना किं प्रलापेन यतो धर्मस्ततो जयः। एवमुक्ते महाराज द्रोणेनामिततेजसा। व्याजहार ततो
वाक्यं विदुरः सत्यसंगरः। पितुर्वदनमन्वीक्ष्य परिवृत्य धर्मवित्॥ विदुर उवाच॥ देवव्रत निबोधेदं वचनं मम भा
रत। प्रनष्टः कौरवो वंशस्त्वयायं पुनरुद्धृतः। तन्मे विलपमानस्य वचनं समुपेक्षसे। कोयं दुर्योधनो नाम कुलेस्मिन्
कुलपांसनः। यस्य लोभाभिभूतस्य मतिं समनुवर्तसे। अनार्यस्याकृतज्ञस्य लोभोपहतचेतसः। अतिक्रामति यः शा
स्त्रं पितुर्धर्मार्थदर्शिनः। एते नश्यंति कुरवो दुर्योधनकृतेन वै। यथा ते न प्रणश्येयुर्महाराज तथा कुरु। मां चैवं धृत
राष्ट्रं च सर्वमेव महामते। चित्रकार इवालेख्यं कृत्वा मा स्म विनाशय। प्रजापतिः प्रजाः सृष्ट्वा यथा संहरते तथा
। नोपेक्षस्व महाबाहो पश्यमानः कुलक्षयं। अथ ते द्य मतिर्नष्टा विनाशे प्रत्युपस्थिते। वनं गच्छ मया सार्धं धृत
राष्ट्रेण चैव हि। बध्वा वा निकृतिप्रज्ञं धार्तराष्ट्रं सुदुर्मतिं। साध्विदं राज्यमद्यास्तु पांडवैरभिरक्षितं। प्रसीद राजशार्दू

उद्योग लविनाशोह्युपपन्नमहान्।पांडवानांकुरूणांचराज्ञाममिततेजसां।विररामवचस्युक्त्वातुविडुरोदीनमानसः।प्रध्यायमा
नःसतदानिःश्वसंश्चमुहुर्मुहुः।ततोथराज्ञःसुबलस्यपुत्रीधर्मार्थयुक्तंकुलनाशभीता।डुर्योधनंपापमतिंनृशंसं
राज्ञांसमीपेसुतमाहकोपात्।येपार्थिवाराजसभांप्रविष्टाब्रह्मर्षयोयेचसभासदोन्ये।शृण्वंतुवक्ष्यामितवापराधंपा
पस्यसामात्यपरिच्छदस्य।राज्यंकुरूणामनुपूर्वभोज्यंक्रमागतोनःकुलधर्मएषः।त्वंपापबुद्धेतिनृशंसकर्मन्राज्यंकुरू
णामनयाद्विहंसि।राज्येस्थितोधृतराष्ट्रोमनीषीतस्यानुजोविडुरोदीर्घदर्शी।एतावतिक्रम्यकथंनृपत्वंडुर्योधनप्रार्थ
यसेद्यमोहात्।राजाचक्षत्ताचमहानुभावौभीष्मेस्थितेपरवंतौभवेतां।अयंतुधर्मात्मतयामहात्मानकामयोनृवरो
नदीजः।राज्यंतुपांडोरिदमप्रधृष्यंतस्याद्यपुत्राःप्रभवंतिनान्ये।राज्यंतदेतन्निखिलंपांडवानांपैतामहंपुत्रपौत्रानुगा।
म्यवायदेक्तंकुरुमुख्योमहात्मादेवव्रतःसत्यसंधोमनीषी।सर्वंतदस्माभिरहत्यधर्मंराज्यंस्वधर्मान्परिपालयद्भिः॥
अनुज्ञयाचाथमहाव्रतस्यब्रूयान्नृपोयद्विडुरस्तथैव।कार्यंभवेत्तत्सुहृद्भिर्नियुज्यधर्मंपुरस्कृत्यसुदीर्घकालं।न्या
यागतंराज्यमिदंकुरूणांयुधिष्ठिरःशास्तुवैधर्मपुत्रः।प्रचोदितोधृतराष्ट्रेणराज्ञापुरस्कृतःशांतनवेनचैव॥ ॥ २४७
महाभारतेउद्योगे॥ ॥वासुदेवउवाच॥ ॥

ऽभिजायतमात्राणि॥
एवमुक्तस्तुगांधार्याधृतराष्ट्रोजनेश्वरः।डुर्योधनमुवाचेदंराजमध्येनराधिप।डुर्योधननिबोधेदंयत्त्वांवक्ष्यामि
पुत्रक।तथातत्कुरुभद्रंतेयद्यस्तिमयिगौरवं।सोमःप्रजापतिःपूर्वंकुरूणांवंशवर्द्धनः।सोमाद्बभूवषष्ठोयंयया
तिर्नहुषात्मजः।तस्यपुत्राबभूवुर्हिपंचराजर्षिसत्तमाः।तेषांयडुर्महातेजाज्येष्ठःसमभवत्प्रभुः।पूरुर्यवीयांश्चततोयो
स्माकंवंशवर्द्धनः।शर्मिष्ठायासंप्रसूतोदुहितुर्वृषपर्वणः।यडुश्चभरतश्रेष्ठदेवयान्याःसुतस्ततः।दौहित्रस्तातशु
क्रस्यकाव्यस्यामिततेजसः।यादवानांकुलकरोबलवान्वीर्यसंमतः।अवमेनेसतुक्षत्रंदर्पपूर्णःसुमंदधीः।
नचातिष्ठत्पितुःशास्त्रेबलदर्पविमोहितः।अवमेनेचपितरंभ्रातॄंश्चाप्यपराजितः।पृथिव्यांचतुरंतायांयडुरेवाभव
द्बली।वशेकृत्वासनृपतीनवसन्नागसाह्वये।तंपितापरमक्रुद्धोययातिर्नहुषात्मजः।शशापपुत्रंगांधारेराज्याच्चापिव्य
रोपयत्।यचैनमन्ववर्त्तंतभ्रातरोबलदर्पितं।शशापतानपिक्रुद्धोययातिस्तनयानथ।यवीयांसंततःपूरुंपुत्रंस्व
वशवर्त्तिनं।राज्येनिवेशयामासविधेयंनृपसत्तमः।एवंज्येष्ठोप्यथोत्सिक्तोनराज्यमभिजायते।यवीयांसोभिजा
यंतेराज्यंवृद्धोपसेवया।तथैवसर्वधर्मज्ञःपितुर्ममपितामहः।प्रतीपःपृथिवीपालस्त्रिषुलोकेषुविश्रुतः।तस्य
पार्थिवसिंहस्यराज्यंधर्मेणशासतः।त्रयःप्रजज्ञिरेपुत्रादेवकल्पायशस्विनः।देवापिरभवज्ज्येष्ठोबाह्लीकस्तदनं

त्वग्दोषीकुरू॥

तरां तृतीयः शांतनुस्तात धृतिमान्मे पितामहः॥ देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः॥ धार्मिकः सत्यवादी च पितुः शुश्रूष
णे रतः॥ पौरजानपदानां च संमतः साधुसत्कृतः॥ सर्वेषां बालवृद्धानां देवापिर्हृदयंगमः॥ वदान्यः सत्यसंधश्च सर्वभूतहिते
रतः॥ वर्तमानः पितुः शास्त्रे ब्राह्मणानां तथैव च॥ बाह्लीकस्य प्रियो भ्राता शांतनोश्च महात्मनः॥ सौभ्रात्रं परमं तेषां सहि
तानां महात्मनां॥ अथ कालस्य पर्याये वृद्धो नृपतिसत्तमः॥ संभारानभिषेकार्थं कारयामास शास्त्रतः॥ कारयामास सर्वाणि
मंगलार्थानि चाविभुः॥ तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह॥ सर्वे निवारयामासुर्देवापेरभिषेचनं॥ अश्रुकंठो
भवद्राजा पर्यशोचत चात्मजं॥ एवं वदान्यो धर्मज्ञः सत्यसंधश्च सोभवत्॥ प्रियः प्रजानामपि संस्त्वग्दोषेण प्रदूषितः॥ हीनांग
पृथिवीपालं नाभिनंदंति देवताः॥ इति कृत्वा नृपश्रेष्ठं प्रत्यषेधन्द्विजर्षभाः॥ ततः प्रव्यथितात्मासौ पुत्रशोकसमन्वितः॥
ममार तं मृतं दृष्ट्वा देवापिः संश्रितो वनं॥ बाह्लीको मातुलकुलं त्यक्त्वा राज्यं समाश्रितः॥ पितृभ्रातॄन्परित्यज्य प्रा
प्तवान्पुरमृद्धिमत्॥ बाह्लीकेन त्वनुज्ञातः शांतनुर्लोकविश्रुतः॥ पितर्युपरते राजन्राजा राज्यमकारयत्॥ तथैवाहं मतिमता
परिचिंत्येह पांडुना॥ ज्येष्ठः प्रभ्रंशितो राज्याद्धीनांग इति भारत॥ पांडुस्तु राज्यं संप्राप्तः कनीयानपि सन्नृपः॥ विनाशे तस्य पुत्रा २५०
णामिदं राज्यमरिंदम॥ मय्यभागिनि राज्याय कथं त्वं राज्यमिच्छसि॥ अराजपुत्रो ह्यस्वामी परस्वं हर्तुमिच्छसि॥

अराजपुत्रो ह्यस्वामी परस्वं हर्तुमिच्छसि॥ युधिष्ठिरो राजपुत्रो महात्मा न्यायागतं राज्यमिदं च तस्य॥ स कौरवस्यास्य कुल
स्य नेता प्रशास्तिता चैव महानुभावः॥ स सत्यसंधः सततोऽप्रमत्तः शास्त्रे स्थितो बंधुजनस्य साधुः॥ प्रियः प्रजानां सुहृदानुकं
पी जितेंद्रियः साधुजनस्य भर्ता॥ क्षमा तितिक्षा दम आर्जवं च सत्यव्रतत्वं श्रुतमप्रमादः॥ भूतानुकंपा ह्यनुशासनं च॥
युधिष्ठिरे राजगुणाः समस्ताः॥ अराजपुत्रस्त्वमनार्यवृत्तो लुब्धः सदा बंधुषु पापबुद्धिः॥ क्रमागतं राज्यमिदं परेषां क
थं कथं शक्ष्यसि दुर्विनीतः॥ प्रयच्छ राज्यार्धमपेतमोहः सवाहनं त्वं सपरिच्छदं च॥ ततोऽवशेषं तव जीवितस्य सहानुज
स्य भवेन्नरेंद्र॥ ॥इति महाभारते उद्योगपर्वणि॥ ॥वासुदेव उवाच॥ ॥एवमुक्तेऽपि भीष्मेण द्रोणेन विदुरे
ण च॥ गांधार्या धृतराष्ट्रेण न चैव मंदोऽन्वबुध्यत॥ अवधूयोत्थितो मंदः क्रोधसंरक्तलोचनः॥ अन्वद्रवंत तं पश्चाद्राजानस्त्यक्त
जीविताः॥ आज्ञापयच्च राजस्तान्पार्थिवान्नष्टचेतसः॥ प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः॥ ततस्ते पृथिवीपालाः प्र हैतं
ययुः सहसैनिकाः॥ भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः॥ अक्षौहिण्यो दशैका च कौरवाणां समागताः॥ तासां प्र
मुखतो भीष्मस्तालकेतुर्व्यरोचत॥ यदत्र युक्तं प्राप्तं च तद्विधत्स्व विशांपते॥ उक्तं भीष्मेण यद्वाक्यं द्रोणेन विदुरेण च
॥ गांधार्या धृतराष्ट्रेण समक्षं मम भारत॥ एतत्ते कथितं राजन्यद्वृत्तं कुरुसंसदि॥ साम्यमादौ प्रयुक्तं मे राजन्सौ

अनिर्जित्यनिनाक्षुकः। सामोपक्रांडवोधानयुगार्तिरः कर्षितुकः प्रयुक्तः॥ ममया। सामनेदयारवस्पृष्टा करणं कर्मचकार्तं
उद्योग चात्रमिहता। आमसायाप्यवंशाम्यवजानांचविरुध्ये। जनार्दनस्त्वामयुक्तोऽयदासांमनरुपाते। कर्मचकार्त्तिनेचिवेदवमा
नुपसंहितं। यदानाद्रियतवाक्यं सामपूर्वं सुयोधनः॥ तदस्मयास्मानीयसिदिंता सर्वपार्थिवाः॥ अद्भुतानिचघोराणिदारुणा है
निच भारत॥ अमानुषाणि कर्माणि दृष्ट्वा नाविस्मयानिलो। निर्भर्त्सीयदारास्तव्योस्तृणी कुरुसुयोधने। राधेयं भीषयित्वासौ च
लं चक्रुतत्पुत्रोह्यतः। ताश्च राज्ञां निवेदकश्च। तथा तु न प्रभेदयितुवाद्यं पान्सर्वाक्षो निर्मम नणाचासकृत्। पुनःसामाभिसंयुक्तं
संप्रदानमथाब्रवीत्। अभेदात्कुरुवंशस्य कार्ययोगात्तथैव च। तव प्राधृतराष्ट्रस्य भीष्मस्य विदुरस्य च। तिष्ठेयुःपांडवाःसर्वे
हित्वा मानमधश्चराः। प्रयच्छंतु च ते राज्यमनीशास्ते भवंतु ते। यथाह राजा गांगेयो विदुरस्य हितं तव। सर्वं भवतु ते रा
ज्यं पंच ग्रामान्विसर्जय। अवश्यं भरणीया हि पितुस्ते राजसत्तम। एवमुक्तोपि दुष्टात्मा नैव भागं व्यमुंचत। ततःदंडं चतुर्थं पश्य
मि तेषु पापेषु नान्यथा। निर्यातश्च विनाशाय कुरूणां च नराधिपाः। एतन्निकषितं राजन्यदहं कुरुसंसदि। न ताते राज्य
प्रयच्छंति विना युद्धेन पांडव। विनाशहेतवः सर्वे प्रत्युपस्थितमृत्यवः॥ इति श्रीउद्योगे कृष्णवाक्यं॥ ॥वैशंपायन
उवाच॥ ॥जनार्दनवचः श्रुत्वा धर्मराजो युधिष्ठिरः॥ भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य च। श्रुतं भवद्भिर्यद्वृत्तं। २५२
नमित्याहिनादेवमाप्यपांसमहितं संरक्ष्यं दिनवतः कर्मवदत्कार्तिनं कृतं। घोराणि दारुणान्यतिनयानकाति अभेदाद्भेद निमित्तं कृष्णवाक्यं॥

संयुक्तः संबंधी कुलेन सजातीयसंघेन। अभिजनेन कौल्येन। अंगिरसा द्रोणस्य॥
मे
सेनानां कुरुसंमर्दे। कच्चास्यापि यद्वाक्यं तत्सर्वमवधारितं। तस्मात्सेनाविभागं मे कुरुध्वं नरसत्तमाः। अक्षौहि
ण्यस्तु समेता सप्त विजयाय वै। तासां ये प्रणेतारः सप्त विख्यातास्तान्निबोधत। द्रुपदश्च विराटश्च धृष्टद्युम्नशिखंडि
नौ। सात्यकिश्चेकितानश्च भीमसेनश्च वीर्यवान्। एते सेनाप्रणेतारो वीराः सर्वे तनुत्यजः। सर्वे वेदविदः शूराः सर्वे
सुचरितव्रताः। ह्रीमंतो नीतिमंतश्च सर्वे युद्धविशारदाः। इष्वस्त्रकुशलाः सर्वे तथा सर्वास्त्रयोधिनः। सप्तानामपि यो
नेता सेनानां प्रविभागवित्। यः सहेत रणे भीष्मं शराग्निपावकोपमं। त्वं तावत्सहदेवात्र प्रब्रूहि कुरुनंदन। स्वमतं पुरुषव्याघ्र
को नः सेनापतिः क्षमः। संयुक्त एकदुःखश्च वीर्यवांश्च महीपतिः। नकुलोनंतरश्च स्यादिदं वचनमादरात्। वयसा शास्त्रतो धै
र्यात्कुलेनाभिजनेन च। ह्रीमान्बलान्वितः श्रीमान्सर्वशास्त्रविशारदः। वेदशास्त्रमहाराज द्रुपदः सत्यसंगरः। यो नित्यं स्प
र्द्धते द्रोणं भीष्मं चैव महाबलं। श्लाघ्यः पार्थिववंशस्य धुर्यो वाहिनीपतिः। पुत्रपौत्रैः परिवृतः शाखावानिव द्रुमः।
यस्तताप तपो घोरं सदारः पृथिवीपतिः। रोषाद्द्रोणविनाशाय वीरः समितिशोभनः। पितेवास्मान्समाधत्ते यः सदा पार्थि
वर्षभः। श्वशुरो द्रुपदोस्माकं सेनाग्रं स प्रकर्षतु। स द्रोणभीष्मावायांतौ सहेदिति मतिर्मम। स हि दिव्यास्त्रविज्ञाता सखा।

चांगिरसा दृष्टः माद्रीसुता मातुले अवमतिं कुरुनंदनः ॥ वासविर्वासवसमः सव्यसाच्यब्रवीद्वचः ॥ योयं तपःप्रभावेन ऋषि
संतोषणेन च ॥ दिव्यः पुरुष उत्पन्नो ज्वालावर्णो महाभुजः ॥ धनुष्मान्कवची खड्गी रथमारुह्य दंशितः ॥ दिव्यैर्हयवरैर्युक्ते रग्नि
कुंडात्समुत्थितः ॥ गर्जन्निव महामेघो रथघोषेण वीर्यवान् ॥ सिंहसंहननो वीरः सिंहतुल्यपराक्रमः ॥ सिंहोरस्कः सिंहभु
जः सिंहवक्षा महाबलः ॥ सिंहप्रगर्जनो वीरः सिंहस्कंधो महाद्युतिः ॥ सुभ्रुः सुदंष्ट्रः सुहनुः सुबाहुः सुमुखोकृशः ॥ सुजत्रुः
सुविशालाक्षः सुपादः सुप्रतिष्ठितः ॥ अभेद्यः सर्वशस्त्राणां प्रभिन्न इव वारणः ॥ जज्ञे द्रोणविनाशाय सत्यवादी जितेंद्रियः ॥ धृ
ष्टद्युम्नमहं मन्ये सहेद्भीष्मस्य सायकान् ॥ वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव ॥ यमदूतसमान्वेगे निपाते पाव
कोपमान् ॥ रामेणाजौ विसहितान्वज्रनिष्पेषदारुणान् ॥ पुरुषं तं न पश्यामि यः सहेत महाव्रतं ॥ धृष्टद्युम्नमृते राजन्निति
मे धीयते मतिः ॥ क्षिप्रहस्तश्चित्रयोधी मतः सेनापतिर्मम ॥ अभेद्यकवचः श्रीमान्मातंग इव यूथपः ॥ ॥भीम उवाच॥
वधार्थं यः समुत्पन्नः शिखंडी द्रुपदात्मजः ॥ वदंति सिद्धा राजेंद्र ऋषयश्च समागताः ॥ यस्य संग्राममध्येषु दिव्यमस्त्रं वि
कुर्वतः ॥ रूपं द्रक्ष्यंति पुरुषा रामस्येव महात्मनः ॥ न तं युद्धेषु पश्यामि यो विभिंद्याच्छिखंडिनं ॥ शस्त्रेण समरे राजन्सन्नद्धं ॥ २५२
स्यंदनस्थितं ॥ द्वैरथं समरे नान्यो भीष्मं हन्यान्महाव्रतं ॥ शिखंडिनमृते वीरं स मम सेनापतिर्मतः ॥ युधिष्ठिर उवाच ॥

अधिवासिते गंधैः कौतुकरक्षासूत्रबंधनं । मंगलं स्वस्तिवाचनादि ॥

सर्वस्य जगतस्तात सारासारं बलाबलं । सर्वं जानाति धर्मात्मा मतमेषां च केशवः ॥ यमाह कृष्णो दाशार्हः सोस्तु सेनापतिर्मम
कृतास्त्रो ह्यकृतास्त्रो वा वृद्धो वा यदि वा युवा । एषां नो विजये मूलमेष तात विपर्यये । अत्र प्राणाश्च राज्यं च भावाभावौ सुखा
सुखे । एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता । यमाह कृष्णो दाशार्हः सोस्तु नो वाहिनीपतिः ॥ ब्रवीतु वदतां श्रेष्ठो निशा स
मतिवर्तते ॥ ततः सेनापतिं कृत्वा कृष्णस्य वशवर्तिनं । रात्रेः शेषे व्यतिक्रांते प्रयास्यामो रणाजिरं ॥ अधिवासितशस्त्राश्च
कृतकौतुकमंगलाः ॥ ॥वैशंपायन उवाच॥ ॥तस्य तद्वचनं श्रुत्वा धर्मराजस्य धीमतः ॥ अब्रवीत्पुंडरीकाक्षो धनंजयमवे
क्ष्य ह ॥ ममाप्येते महाराज भवद्भिर्य उदाहृताः ॥ नेतारस्तव सेनायां मता विक्रांतयोधिनः ॥ सर्व एव समर्था हि तव शत्रुं प्रबाधितुं ॥
इंद्रस्यापि भयं ह्येते जनयेयुर्महाहवे । किं पुनर्धार्तराष्ट्राणां लुब्धानां पापचेतसां । मयापि हि महाबाहो त्वत्प्रियार्थं महाह
वे । कृतो यत्नो महांस्तत्र शमः स्यादिति भारत ॥ धर्मस्य गतमानृण्यं न स्म वाच्या विवक्षतां ॥ कृतार्थं मन्यते बालः सोत्मानमविच
क्षणः ॥ धार्तराष्ट्रो बलस्थं च मन्यते त्मानमातुरः ॥ युज्यतां वाहिनी साधु वधसाध्या हि मे मताः ॥ न धार्तराष्ट्राः शक्ष्यंति स्थातुं दृ
ष्ट्वा धनंजयं ॥ भीमसेनं च संक्रुद्धं यमौ चापि यमोपमौ ॥ युयुधानद्वितीयं च धृष्टद्युम्नममर्षणं ॥ अभिमन्युं द्रौपदेयान्विरा
टद्रुपदावपि ॥ अक्षौहिणीपतींश्चान्यान्नरेंद्रान्भीमविक्रमान् ॥ सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदं । धार्तराष्ट्रबलं संख्ये

शकटा अनांसि ॥ आपणाः पण्यवीथ्युपलक्षितं विक्रयद्रव्यं ॥ वेशा वेश्याः ॥ प्रस्थदाणि ॥ यानयुग्यं यानयुगसंबंधिद्र

 व्यं निष्पतितसंज्ञायः ॥ एवमुक्तस्तु कृष्णेन संप्रहृष्टमनास्तथा ॥ तयोश्च हृष्टमनसो नादः समभवन्महान् ॥ योग इत्य
थ सैन्यानां त्वरतां संप्रधावतां ॥ हयवारणशब्दश्च नेमिघोषश्च सर्वतः ॥ शंखदुंदुभिघोषश्च तुमुलः सर्वतोऽभवत्
प्रयास्यतां पांडवानां ससैन्यानां समंततः ॥ अग्रानीकेन भीमश्च माद्रीपुत्रौ च दंशितौ ॥ सौभद्रो द्रौपदेयाश्च धृष्टद्युम्नश्च पा
र्षतः ॥ प्रभद्रकाश्च पांचाला भीमसेनमुखा ययुः ॥ ततः शब्दः समभवत्समुद्रस्येव पर्वणि ॥ हृष्टानां संप्रयातानां घोषो दिवमि
वास्पृशत् ॥ प्रहृष्टा दंशिता योधाः परानीकविदारणाः ॥ तेषां मध्ये ययौ राजा कुंतीपुत्रो युधिष्ठिरः ॥ शकटापणवेशाश्च या
नयुग्यं च सर्वशः ॥ कोशं यंत्रायुधं चैव ये च वैद्याश्चिकित्सकाः ॥ फल्गु यच्च बलं किंचित्तथैव कृशदुर्बलं ॥ तत्संगृह्य ययौ राजा
ये चापि परिचारकाः ॥ उपप्लव्ये तु पांचाली द्रौपदी सत्यवादिनी ॥ सह स्त्रीभिर्निववृते दासीदाससमावृता ॥ कृत्वा मूलप्रतीकारं
गुल्मैः स्थावरजंगमैः ॥ स्कंधावारेण महता प्रययुः पांडुनंदनाः ॥ ददतो गां हिरण्यं च ब्राह्मणैरभिसंवृताः ॥ स्तूयमाना ययू
राजन्रथैर्मणिविभूषितैः ॥ केकया धृष्टकेतुश्च पुत्रः काश्यस्य चाभिभूः ॥ श्रेणिमान्वसुदानश्च शिखंडी चापराजितः ॥
हृष्टास्तुष्टाः कवचिनः सशस्त्राः समलंकृताः ॥ राजानमन्वयुः सर्वे परिवार्य युधिष्ठिरं ॥ ॥

मूलं वृद्धादि मूलस्य स्त्रीशिबिरस्य प्रतीकारं गुल्मैर्नाना प्राकारादिभिः रक्षितैः गजादिभिर्निर्विजंगमैश्च मद्भिः 
सैन्यैः ॥ ॥

जघनार्धे पश्चार्धे

जघनार्धे विराटश्च याज्ञसेनिश्च सोमकिः ॥ सुधर्मा कुंतिभोजश्च धृष्टद्युम्नस्य चात्मजाः ॥ रथायुतानि चत्वारि हयाः पंचगुणा
स्तथा ॥ पत्तिसैन्यं दशगुणं गजानामयुतानि षट् ॥ अनाधृष्टिश्चेकितानो धृष्टकेतुश्च सात्यकिः ॥ परिवार्य ययुः सर्वे वासु
देवधनंजयौ ॥ आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ॥ पांडवाः समदृश्यंत नर्दंतो वृषभा इव ॥ तेऽवगाह्य कुरुक्षे
त्रं शंखान्दध्मुररिंदमाः ॥ तथैव दध्मतुः शंखौ वासुदेवधनंजयौ ॥ पांचजन्यस्य निर्घोषं विस्फूर्जितमिवाशनेः ॥ निशम्य
सर्वसैन्यानि समहृष्यंत सर्वशः ॥ शंखदुंदुभिसंसृष्टः सिंहनादस्तरस्विनां ॥ पृथिवीं चांतरिक्षं च सागरांश्चान्वनादयत् ॥ ततो
देशे समे स्निग्धे प्रभूतयवसेंधने ॥ निवेशयामास तदा सेनां राजा युधिष्ठिरः ॥ परिहृत्य श्मशानानि देवतायतनानि च ॥ आश्र
मांश्च महर्षीणां तीर्थान्यायतनानि च ॥ मधुरानूषरे देशे शिवे पुण्ये महामतिः ॥ निवेशं कारयामास कुंतीपुत्रो युधिष्ठिरः ॥
ततश्च पुनरुत्थाय सुखी विश्रांतवाहनः ॥ प्रययौ पृथिवीपालैर्वृतः शतसहस्रशः ॥ विद्राव्य शतशो गुल्मान्धार्तराष्ट्र
स्य सैनिकान् ॥ पर्यक्रामत्समंताच्च पार्थेन सह केशवः ॥ शिबिरं मापयामास धृष्टद्युम्नश्च पार्षतः ॥ सात्यकिश्च रथोदा
रो युयुधानः प्रतापवान् ॥ आसाद्य सरितं पुण्यां कुरुक्षेत्रे हिरण्वतीं ॥ सूपतीर्थां शुचिजलां शर्करापंकवर्जितां ॥ खान
यामास परिखां केशवस्तत्र भारत ॥ गुप्त्यर्थमपि चादिश्य बलं तत्र न्यवेशयत् ॥ विधिर्यः शिबिरस्यासीत्पांडवानां म

तुषांगारालोहितादिधबैर्नाग्यंकृत्वबेहुनो।महायंत्राणीनवसार्दवयुगणेशेषाम्यां।विंतयंतीत्यर्थः।कंकटैः कवचैः सन्नाह

ह्यात्मनां।तद्विधानं नरेंद्राणां कारयामास केशवः।प्रभूततरकाष्ठानि दुराधर्षतराणि वै।भक्ष्यपानानि

शतशोथ सहस्रशः।शिबिराणि महार्हाणि राज्ञां तत्र पृथक् पृथक्।विमानानीव राजेंद्र विविधानि महांति च।त

त्रासन् शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः।सर्वोपकरणैर्युक्ता वैद्याः शास्त्रविशारदाः।ज्याधनुर्वर्मशस्त्राणां त

थैव मधुसर्पिषोः।ससर्जरसपांसूनां राशयः पर्वतोपमाः।बहूदकं सुयवसं तुषांगारसमन्वितं।शिबिरे शिबिरे राजा संच

कार युधिष्ठिरः।महायंत्राणि नाराचास्तोमराण्यपरश्वधाः।धनूंषि कवचादीनि ऋष्टयश्च तूणसंयुताः।गजाः कंकट

सन्नाहा लोहकक्षांतरवहाः।दृश्यंते तत्र गिर्याभाः सहस्रशतयोधिनः।निविष्टान् पांडवांस्तत्र ज्ञात्वा मित्राणि भार

त।अभिसंसस्रुर्यथोद्देशं सबलाः सहवाहनाः।चरितब्रह्मचर्यास्ते सोमपा भूरिदक्षिणाः।जयाय पांडुपुत्राणां समा

जग्मुर्महीक्षितः॥ ॥इत्युद्योगपर्वणि निर्यात्रायां॥ ॥जनमेजय उवाच॥ ॥युधिष्ठिरं सहानीकमुपायांतं युयु

त्सया।सन्निविष्टं कुरुक्षेत्रे वासुदेवेन पालितं।विराटद्रुपदाभ्यां च सपुत्राभ्यां समन्वितं।केकयैर्वृष्णिभिश्चैव पा

र्थिवैः शतशो वृतं।महेंद्रमिव चादित्यैरभिगुप्तं महारथैः।श्रुत्वा दुर्योधनो राजा किं कार्यं प्रत्यपद्यत।एतदिच्छा

म्यहं श्रोतुं विस्तरेण महामते।संभ्रमे तुमुले तस्मिन् यदासीत् कुरुजांगले।व्यथयेयुरिमे देवान् सेंद्रानपि समाग २५४

नेप्सां भरसा इति मित्रपदार्थविशेषणं।अपिशुस्नुषां दमवात्॥

आद्येयो।नेजनीयः आदार्य्य आसारगमनदितस्त्र मार्गीयेषु॥

मि।पांडवा वासुदेवश्च विराटद्रुपदौ तथा।धृष्टद्युम्नश्च पांचाल्यः शिखंडी च महारथः।युधामन्युश्च विक्रांतो देवै

रपि दुरासदः।एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन।कुरूणां पांडवानां च यद्यदासीद्विचेष्टितं॥ ॥इत्युद्योगपर्वणि नि

र्यात्रायां॥ वैशंपायन उवाच॥ प्रतियाते तु दाशार्हे राजा दुर्योधनस्तदा।कर्णं दुःशासनं चैव शकुनिं चा

ब्रवीदिदं।अकृतेनैव कार्येण गतः पार्थानधोक्षजः।स एनान्मन्युनाविष्टो ध्रुवं धक्ष्यत्यसंशयं।इष्टो हि वासुदेवस्य पां

डवैर्मम विग्रहः।भीमसेनार्जुनौ चैव दाशार्हस्य मते स्थितौ।अजातशत्रुरप्यत्र भीमार्जुनवशानुगः।निकृत

श्च मया पूर्वं सह सर्वैः सहोदरैः।विराटद्रुपदौ चैव कृतवैरौ मया सह।तौ च सेनाप्रणेतारौ वासुदेववशानु

गौ।भविता विग्रहः सोयं तुमुलो लोमहर्षणः।तस्मात्सांग्रामिकं सर्वं कारयध्वमतंद्रिताः।शिबिराणि कुरुक्षेत्रे क्रि

यंतां वसुधाधिपाः।सुपर्याप्तावकाशानि दुरादेयानि शत्रुभिः।आसन्नजलकाष्ठानि शतशोथ सहस्रशः।अच्छेद्या

हार्य्यमार्गाणि बंधोच्छ्रयवंति च।विविधायुधपूर्णानि पताकाध्वजवंति च।समास्तेषां पथानः क्रियतां नगरा

द्बहिः।प्रयाणं घुष्यतामद्य श्वोभूत इति माचिरं।ते तथेति प्रतिज्ञाय श्वोभूते चक्रिरे तथा।हृष्टरूपा महात्मानो विना

शाय महीक्षितां।ततस्ते पार्थिवाः सर्वे तच्छ्रुत्वा राजशासनं।आसनेभ्यो महार्हेभ्य उदतिष्ठन्नमर्षिताः।बाहून् परिघसं

नियन्तोताबभूवतुः॥

उद्योग काचाग्नं सूप्तं प्रथनः स्नानिः स्नानिः कांचनांगददीमांश्च दंताग्रुरुग्रवृषितानां तस्मीपानि यवंतः पुंडरीकनिभैः कोशैः

अंतरीयाणि रायाणि च सुपर्णानि च सर्वशः। पूरिताः रचिताः श्च महारथाः सांद्रदमकाः विहाराः समकल्पयन्तस्मिन्नागास्तु नाग

शिक्षास्थ बहिताः। स्वर्णवर्णानि विचित्राणि कांचनानि च कृतिचाः विचित्राणि च शस्त्राणि चक्रुः सर्वाणि सर्वशः। पदातय

स्तु शूरास्तु शस्त्राणि विचित्राणि च। उपजग्मुः शरीरस्थाः दश विचित्राणि लकराः॥ तदा सर्वे ते वीरा संप्रहृष्टनरा हृते। नग

रे धार्तराष्ट्रस्य तारतसाम्स महाकलः। जानोयमलिलावर्तारिपन्नगास्तु मीनवान्। शंखदुंदुभिनिर्घोषः कार्मसंचय

रत्नवाह्यप्रासादमाला शोभिताः रथ्यापणमहाकरः। योधचंडो दृश्यते कुरुराजमहार्णवः॥ व्यहुरूपततद्राराजस्थं दोर

यदवासेव॥ ॥इत्युद्योगे निर्याणपर्वणि॥ ॥वैशंपायन उवाच॥ ॥वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठि

रः॥ पुनः पप्रच्छ वार्ष्णेयं कथं मन्दोऽब्रवीदिदं। अस्मिन्नभ्यागते काले किं च नः क्षमम् अच्युत। कथं वा वर्तमाना वै स्वधर्मा

न्न च्यवेमहि। दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च। वासुदेव मतज्ञोऽसि मम सभ्रातृकस्य च। विदुरस्यापि ते वाक्यं श्रुतं

भीष्मस्य चोभयोः। कुन्त्याश्च विपुलप्रज्ञ प्रज्ञा कार्त्स्न्येन ते श्रुता। सर्वमेतदतिक्रम्य विचार्य च पुनः पुनः। क्षमं यन्नो २५५

महाबाहो तद्ब्रवीह्यविचारयन्। श्रुत्वैतद्धर्मराजस्य धर्मार्थसहितं वचः। मेघदुंदुभिनिर्घोषः कृष्णो वाक्यमथाब्रवीत्

कृष्ण उवाच॥ ॥उक्तं दुर्योधनमतं मयान्यस्य नाथं तथा न्यायं तं कितवमायाकृति निशामान्याय समक्षं तं पार्थिवे

उक्तवानस्मि यद्वाक्यं धर्मार्थसहितं हितं। न तु तन्निकृतिप्रज्ञः कौरव्यः प्रतिनन्दति। न च भीष्मस्य दुर्मेधाः श्रृणोति विदु

रस्य वा। मम वा भाषितं किंचित्सर्वमेवातिवर्तते। नैष कामयते धर्मं नैष कामयते यशः। जितं स मन्यते सर्वं दुरा

त्मा कर्णमाश्रितः। बंधमाज्ञापयामास मम चापि सुयोधनः। न च तं लब्धवान्कामं दुरात्मा पापनिश्चयः। न च भीष्मो न

च द्रोणो युक्तं तत्राहतुर्वचः। सर्वे तमनुवर्तंते ऋते विदुरमच्युत। शकुनिः सौबलश्चैव कर्णदुःशासनावपि। त्व

पर्व य्यमुक्तान्यनाथं तेसूदमसर्षणं। किं चापि न मया प्रोक्तं न्यायान्यनाथं तं कौरवं। संक्षेपेण दुरात्मासौ न युक्तं त्वयि वर्तते। पा

र्थिवेषु न सर्वेषु य इमे तव सैनिकाः। यत्पापं यन्न कल्याणं सर्वं तस्मिन्प्रतिष्ठितं। न चापि वयमप्यर्थं परित्यागेन कहि

चित्। कौरवैः शममिच्छामः स्वत्र युद्धमनंतरं॥ ॥वैशंपायन उवाच॥ ॥तच्छ्रुत्वा पार्थिवाः सर्वे वासुदेवस्य भाषितं। अ

ब्रुवंतो मुखं राजन्समुदैक्षंत भारत। युधिष्ठिरस्त्वभिप्रायमुपलक्ष्य महीक्षितां। योगमाज्ञापयामास मन्त्रिभिः सह यत्नैः

सहानीतः। किलकिलाशब्दमनाकंपांडवस्य तदा आज्ञापिततदा योगमसमरूष्यंतामैनिकाः। अवध्यानां वधं प

श्यन्धर्मराजो युधिष्ठिरः। निश्वसन्भीमसेनं च विजयं चेदमब्रवीत्। यदर्थं वनवासश्च प्राप्तं दुःखं च यन्मया। सोऽयम

स्मानुपैत्येव। किलकिलारवं हत्वं तं घोरं। यदर्थयस्य निवृत्ताय प्रयत्नाताबलात्॥

प्रयत्नात्तावलात्। तस्मिन्निमित्तेन निर्हस्यार्थं प्रयत्नात्तायत्तकृत॥ रणेरचानस्यया॥ अनुकर्षो रथस्याधो रणादंडः॥ तोमाराह
स्तकांडवः। उपासंगः शरास्त्रादिरणं। निषंगा। बलहरणः॥ तोमरः शल्यं करग्रहविक्षिप्यः कास्त्रदावा चित्रिपन्नपाश्या विशे

स्मात्पाशपित्वपाश। नर्घः प्रयन्नतः। तस्मिन्प्रयत्नः कृतास्मा निःसत्तो हीनप्रयत्नत॥ अकृतात्तपयत्नेस्मात्तपाद्दत्तःकलिमीदा
त्। कथं युद्धध्येसंग्रामः कार्य्यः सदनविष्यति। कथं द्वावसुरहहदत्तविजायानोनविष्यति। तच्छ्रुत्वा धर्मराजस्यसव्यसाची
परंतप। यदुक्तं वासुदेवेन श्रावयामासतं नृतः। उक्तवान्देवकीपुत्रः कुंत्यास्त्रविदुरस्यच। वचनंतत्त्वया राजन्निखिलेनाव
धारितं। नचतो वदतांता धर्म्ममितिमां तिष्ठिकी मतिः। नापिवृकं चकौंतेय निर्वेतिउपसुव्यतां। तच्छ्रुत्वा वासुदेवोपि स
व्यसाचिवचस्तदा। स्मयमानो ब्रवीद्वाक्यं पार्थमेवमितिब्रुवन्। ततस्तेक्षतसंकल्पा युद्धायसहसैनिकाः। पांडवेयामहाराज
तांरात्रिंसुखमावसन्॥ इत्युद्योगः निर्यात्रायां॥ वैशंपायनउवाच॥ ॥व्युष्टायां वैरजन्यां हि राजा दुर्योधनस्ततः॥ व्य
भजत्तान्यनीकानि दशचैकंचभारत। नरहस्तिरथाश्वानां सारमध्यंचफल्गुहृच। सर्वेष्वेतेष्वनीकेषु संदिदेशनराधिप
॥ सानुकर्षाः सतूणीराः सवरूथाः सतोमराः॥ सोपासंगाः सशक्तीकाः सनिषंगाः सहर्षयः॥ सध्वजाः सपताकाश्च सशरासन
तोमराः॥ रज्जुभिश्च विचित्राभिः सपाशाः सपरिस्तराः॥ सकचग्रहविक्षेपाः सतैलगुडवालुकाः॥ साशीविषघटाः सर्वे ससर्जरस
पांशवः॥ २५६
पः। तैलगुडवालुकाः सुवापथिवान्वयं चणांकुःसुरणवदहसितमाशीविषघटाः सर्पकुंभाः॥ सर्जरसपांशवोज्वालयि
त्वाद्रवः॥ ॥

घंटाफलकं घंटायुक्तं चर्म्मसारःकाष्ठसार निर्मितमसवात्सदंड फलकाः कंटकोपलक्षितदंडवंतः॥ द्वीपिचर्म्मनिर्मितंकं
र्म्मतिः। सीरलांगलं। विषतोमरा विषदिग्धतोमराः। शूलः प्रसिद्धः॥ पिटकांपटकं। बोधसूस्त्रानि राधसाधनमंडलानि। द्व

सघंटाफलकाः सर्वे सायायुडजलोपलाः॥ सशूलनिंदिपालाश्च मधूच्छिष्टसुदिराः॥ सकांडदंडकाः सर्वे ससीरविषतोम
राः॥ सशूर्प्पपिटकाः सर्वे सदात्रांकुशतोमराः॥ सकीलककचाः सर्वे वासीवृक्षादनाचिताः॥ व्याघ्रचर्म्मपरीवारा द्वीपिच
र्मावृता॥ सर्वे सद्दष्टयः सशृंगाः सप्रासविविधायुधाः॥ सकुठाराः सकुद्दालाः सतैलक्षौमवाससः॥ रुक्मजालप्रतिच्छन्ना॥
नानामणिविभूषिताः॥ चित्रानीकाः सुवपुषो ज्वलिताइवपावकाः॥ तथाकवचिनः शूरा शस्त्रेषुकृतनिश्रमाः॥ कुलीना
हयायोनिज्ञाः सारथ्ये विनिवेशिताः॥ बद्धारिष्टायथारक्षवबद्धध्वजपताकिनः॥ बद्धाभरणनिर्व्यूहा बद्धचर्मासिपत्तयः॥ पि२
दस्यायात्रिजासारथ्ये विनिवेशिताः॥ धूर्य्ययोर्हययोयाराक्षस्त्यान्यौपार्ष्णिसारथी। तौ चापिरथिनां श्रेष्ठौ रथी च हयवित्तथा
नगराणीव गुप्तानि दुराधर्षाणि शत्रुभिः॥ आसन्रथसहस्राणि हेममालीनि सर्वशः॥ यथा रथास्तथा नागा बद्धकक्षाः स्व
लंकृताः॥ बभूवुः सप्तपुरुषा रत्नवंतइवाद्रयः॥ द्वावंकुशधरौ तत्र द्वावुत्तमधनुर्धरौ॥ द्वौ वरासिधरौ राजन्नेकः शक्तिपिना
कधृक्॥ गजैर्मत्तैः समाकीर्णं सर्वमायुधकोशकैः॥ तद्बभूव बलं राजन्कौरव्यस्य महात्मनः॥ आमुक्तकवचैर्युक्तैः सप
ताकैः स्वलंकृतैः॥ सादिभिश्चोपपन्नास्तु तथा वायुत्वजोदयाः॥ सुसंग्राहाः सुसंपन्ना हेमभांडपरिच्छदाः॥

सादनाकंटकः॥ कृपिरिंशादापाद्यर्थाः शृंगरक्षमोवार्थाः सारथ्ये विनिवेशिताः पृष्ठरथेष्वितिशेषः॥ सानुकर्षादीनांस
र्वेरथाइत्यनेनसंबंधात्॥

उ॰स॰मू॰ ने॰ उत्तकोत्तरात्त्रोध्यं

अरिष्टशिरपतिघातकमोघभटः। निर्व्यूहो नागशालानागदंतकं। एकः सारथिः प्रासपः एकवीणवर्त्मव्यापकः॥ एकः सार

थिः रथपाशः अन्यावन्यौ तद्रक्षार्थं गजादिसंख्या द्वाभ्यामधिके इष्टव्येत नरथस्यासन्नरथस्य नागा इति स्तोकार्थ वि·

उद्योग धानकथात्तसाः सस्त्राः सर्वे सादिविशेषस्थिताः॥ नानारूपविकाराश्च नानाकवचशस्त्रिणः॥ पदातिनो नरास्तत्र बभूवुर्हेममा

लिनः॥ रथस्यासन्दशनागा नागस्य दशवाजिनः। नरा दश हयस्यासन् गोप्तारः समंततः। रथस्य नागाः पंचाशन्नागस्यासन्शतं हयाः। तेद

याः हयस्य पुरुषाः सप्त भिन्नसंधानकारिणः। सेना पंचशती नागा रथास्तावंत एव च। सेनाद्वचादिना वृष्टतना ध्वजिनी वह

ग्॥ अक्षौहिण्याः पर्याया निरुक्ताश्च वरूथिनी। एवं व्यूढान्यनीकानि कौरवेयेण धीमता। अक्षौहिण्यो दशैकाश्च संख्या

ताः सप्त चैव हि। अक्षौहिण्यस्तु सप्तैव पांडवानामभूद्बलं। अक्षौहिण्यो दशैकाश्च कौरवाणामभूद्बलं। नराणां पंच

पंचाशदेषा पत्तिर्विधीयते। सेनामुखं च तिस्रस्ता गुल्ममित्यभिसंज्ञितं। त्रयो गुल्मा गणस्त्वासीद्गणास्त्वयुतशोऽभवन्

। दुर्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः। तत्र दुर्योधनो राजा शूरान्बुद्धिमतो नरान्। प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतीं स्त

था। पृथगक्षौहिणीनां च प्रणेतॄन्नरसत्तमान्। विधिवत्पूर्वमानीय पार्थिवानभ्यषेचयत्। कृपं द्रोणं च शल्यं च सैंधवं च जयद्रथं। सुद च

क्षिणं च कांबोजं कृतवर्माणमेव च। द्रोणपुत्रं च कर्णं च भूरिश्रवसमेव च। शकुनिं सौबलं चैव बाह्लीकं च महाबलं। दिवसे दि २५७

वसे तेषां प्रतिवेलं च भारत॥

॥राध॥ सेनावतिष्ठते पर्यायाये व्याप्यव्यापकभावात् सेना विशेषवाचकाः सारका निरुच्यत इत्यर्थः

ध्वजिन्यादिपदानि तत्तन्नायकाभिधायीनि पत्तीनां संख्यां तत्तद्गणानामित्यादि॥

चक्रे स विविधाः सज्जाः संस्कृत्य च पुनः पुनः। तथा विनियताः सर्वे ये च तेषां पुरोगमाः। बद्धतूणाः सैनिका राजन् प्रियं राज्ञश्चिकीर्ष

वः॥ ॥इत्युद्योग॰ नि॰ निर्याणायां॥ वैशंपायन उवाच॥ ॥ततः शांतनवं भीष्मं प्रांजलिर्धृतराष्ट्रजः। सह सर्वैर्महीपा

लैरिदं वचनमब्रवीत्। ऋते सेनाप्रणेतारं पृतना सुमहत्यपि। दीर्यते युद्धमासाद्य पिपीलिकपुटं यथा। न हि जातु द्वयो

र्बुद्धिः समा भवति कर्हिचित्। शौर्यं च नाम नेतॄणां स्पर्द्धते च परस्परं। श्रूयते च महाप्राज्ञ हैहयानमितौजसः। अभ्ययु

र्ब्राह्मणाः सर्वे समुच्छ्रितकुशध्वजाः। तानन्वयुस्तदा वैश्याः शूद्राश्चैव पितामह। एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः। ते

स्म युद्धेष्वभज्यंत त्रयो वर्णाः पुनः पुनः। क्षत्रियास्तु जयंत्येव बहुलं चैकतो बलं। ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः। ते

भ्यः शशंसुर्धर्मज्ञा याथातथ्यं पितामह। वयमेकस्य शृणुमो महाबुद्धिमतो रणे। भवंतस्तु पृथक्सर्वे स्वबुद्धिवशवर्तिनः।

ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजं। नयेषु कुशलं शूरमजयन्क्षत्रियांस्ततः। एवं ये कुशलं शूरं हिते स्थितमकल्मषं

सेनापतिं प्रकुर्वंति ते जयंति रणे रिपून्। भवानुशनसा तुल्यो हितैषी च सदा मम। असंहार्यः स्थितो धर्मे स नः सेनापति

र्भव। रश्मिमतामिवादित्यो वीरुधामिव चंद्रमाः। कुबेर इव यक्षाणां देवानामिव वासवः। पर्वतानां यथा मेरुः सुपर्णः पक्षि

णां यथा। कुमार इव देवानां वसूनामिव हव्यवाट्। भवता हि वयं गुप्ताः शक्रेणेव दिवौकसः। अनाधृष्या भविष्यामस्त्रि

नमउमांविहतःएकराःत्रुध्यंतायाङ्कुंराकोनि।षयायागरागायात्रस्य॥

उद्योग

देवानामपि कौरव। घ्नयात्तुनो नवातप्रोस्वाना।मिवपाप किंव्यंचाम त्वयास्पाम॥सोऽनेयाऽदवर्षनं॥ भीष्मउवाच॥ ॥
एवमेतन्महाबाहो यथा वदसि भारत। यथैव हि त्वं तेषां तथैव मम पाण्डवाः। अपि चैव मया श्रेयो वाच्यं तेषां नराधिप।
मायायुक्तं वाच्यं यथा मम समयः कृतः। नतु पश्यामि योद्धारमात्मनः सदृशं भुवि। ऋते तस्मान्नरव्याघ्रात्कुन्तीपुत्राद्धनंज
य। ता सहि वेद महाबुद्धिर्दिव्यान्यस्त्राणि नैकशः। नतु मां विवृतो युध्येत पाण्डवः। अहं चैव रणे नैव निर्मनुष्य
मिदं जगत्। कुर्यां शस्त्रबलेनैव ससुरासुरराक्षसम्। नत्वेवोत्सादनीया मम पाण्डोः सुता नराधिप। तस्माद्योधान्हनिष्यामि
प्रयोगेणायुतं सदा। एवमेषां करिष्यामि निधनं कुरुनंदन। नचेत्ते मां हनिष्यंति पूर्वमेव समागमे। सेनापतिर्भवि
ष्यामि समयेनापरेण ते। नविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि। कर्णो वा युध्यतां पूर्वमहं वा पृथिवीपते। स्पर्द्ध
ते हि सदात्यर्थं सूतपुत्रो मया रणे॥ कर्णउवाच॥ नाहं जीवति गांगेये राजन्योत्स्ये कथंचन। हते भीष्मे तु योत्स्यामि सह गां
डीवधन्वना॥ वैशंपायनउवाच॥ ततः सेनापतिं चक्रे विधिवद्भूरिदक्षिणं। धृतराष्ट्रात्मजो भीष्मं सोऽभिषिक्तो व्यरोचत। ततो भेरी
श्च शंखांश्च शतशोऽथ सहस्रशः। वादयामासुरव्यग्रा वादका राजशासनात्। सिंहनादाश्च विविधा वाहनानां च निःस्वनाः। प्रा २५८

वृक्षणिवायसुरवानि।प्रतिनादयन्नयरन्ता।आमीलेगहाना।आनालंगदेनेपा।तितानार्थः। औंदिधम्मार्थीयाकुशलाः

दुरासन्ननभ्रे च वर्षं रुधिरकर्दमं। निर्घाताः पृथिवीकंपा गजबृंहितनिःस्वनाः। आसंश्च सर्वयोधानां पातयंतो मन
नांस्युत। वाचश्चाप्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे। शिवाश्च भयवेदिन्यो नदन्त्यो दीप्ततरास्वराः। सेनापत्ये यदा राजन्गां
गेयमभिषिक्तवान्। तदैतान्युग्ररूपाणि अभवन्शतशो नृप। ततः सेनापतिं कृत्वा भीष्मं परबलार्दनं। वाचयित्वा द्विजश्रे
ष्ठान्निष्कैर्गोभिश्च भूरिशः। वर्धमानो जयाशीर्भिर्निर्ययौ सैनिकैर्वृतः। आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा॥
स्कंधावारेण महता कुरुक्षेत्रं जगाम ह। परिक्रम्य कुरुक्षेत्रं कर्णेन सह कौरवः। शिबिरं मापयामास समे देशे जनाधि
पः। मधुरानूषरे देशे प्रभूतयवसेंधने। यथैव हास्तिनपुरं तद्वच्छिबिरमाबभौ॥ ॥इत्युद्योगपर्वणि निर्यात्रायां॥ X ॥ जनमेजयउवाच
आपगेयं महात्मानं भीष्मं शस्त्रभृतां वरं। पितामहं भारतानां ध्वजं सर्वमहीक्षितां। बृहस्पतिसमं बुद्ध्या क्षमया पृथिवीसमं॥
समुद्रमिव गांभीर्ये हिमवंतमिव स्थिरं। प्रजापतिमिवौदार्ये तेजसा भास्करोपमं। महेंद्रमिव शत्रूणां ध्वंसनं शरवृ
प्रतिभये पावःरा॰ ष्टिभिः। रणयज्ञे प्रतिभये स्वाभीलं लोमहर्षणे। दीक्षितं चिररात्राय श्रुत्वा तत्र युधिष्ठिरः। किमब्रवीन्महाबाहुः स
र्वशस्त्रभृतां वरः। तदा भीमार्जुनौ वापि कृष्णो वा प्रत्यभाषत॥ ॥वैशंपायनउवाच॥ आपद्धर्मार्थकुशलो महा
बुद्धिर्युधिष्ठिरः। सर्वान्भ्रातॄन्समानीय वासुदेवं च सात्वतं। उवाच वदतां श्रेष्ठः सांत्वपूर्वमिदं वचः। पर्याक्रामत सैन्यानि॥

नियन्ता शिक्षितश्च रणे शिष्टः॥ पितामहेन वो युद्धं सर्वमेव न विष्यति। तस्मात्समस्तुमस्याः सुपर्णाश्च मम पश्यत॥ ॥अर्जुन उ
वाच॥ ॥यथार्हति यो गवान्वक्तुमस्मिन्काले समुपस्थिते। तथ्यं दमर्थं वदत्वद्य युक्तं तन्नरतर्षभ। राज तमेव महाबाहो
क्रियतां यदनन्तरं। नायकास्तव सेनायां क्रियन्तां नामितः समावे॥ ॥वैशंपायन उवाच॥ ॥ततो हि पदमानाय्य विराट
शिनिपुंगवं। धृष्टद्युम्नं च पांचाल्यं धृष्टकेतुं च पार्थिवं। शिखंडिनं च पांचाल्यं सहदेवं च मागधं। एतान्समहेष्वासान्
वीरान्युद्धाभिकांक्षिणः। सेनाप्रणेतॄन्विधिवदभ्यषिंचद्युधिष्ठिरः। सर्वसेनापतिं चात्र धृष्टद्युम्नं चकार ह। द्रोणांतह
तोरुत्पन्नो य इद्धाज्जातवेदसः। सर्वेषामेव तेषां तु समस्तानां महात्मनां। सेनापतिपतिं चक्रे गुडाकेशं धनंजयं। अर्जु
नस्यापि नेता च संयंता चैव वाजिनां। संकर्षणानुजः श्रीमान्महाबुद्धिर्जनार्दनः। तद्दृष्ट्वोपस्थितं युद्धं समासन्नं महात्य
यं। प्राविशद्भवनं राज्ञः पांडवस्य हलायुधः। सहाक्रूरप्रभृतिभिर्गदसांबोद्धवादिभिः। रौक्मिणेयाहुकसुतैश्चारु
देष्णपुरोगमैः। वृष्णिमुख्यैरभिगतैर्व्याघ्रैरिव बलोत्कटैः। अभिगुप्तो महाबाहुर्मरुद्भिरिव वासवः। नीलकौशे
यवसनः कैलासशिखरोपमः। सिंहखेलगतिः श्रीमान्मदरक्तांतलोचनः। तं दृष्ट्वा धर्मराजश्च केशवश्च महाद्युतिः। उ
दतिष्ठत्ततः पार्थो भीमकर्मा वृकोदरः। गांडीवधन्वा ये चान्ये राजानस्तत्र केचन। पूजयांचक्रिरे ते वै समायातं हलायुधं। २५९

उपक्कारपक्कांत॥

ततस्तं पांडवो राजा करे पस्पर्श पाणिना। वासुदेवपुरोगास्तं सर्व एवाभ्यवादयन्। विराटद्रुपदौ वृद्धावभिवाद्य हलायुध
ः। युधिष्ठिरेण सहित उपाविशदरिंदमः। ततस्तेषूपविष्टेषु पार्थिवेषु समंततः। वासुदेवमभिप्रेक्ष्य रौहिणेयोऽभ्या
भाषत। भवितायं महारौद्रो दारुणः पुरुषक्षयः। दिष्टमेतद्ध्रुवं मन्ये न शक्यमतिवर्तितुं। अस्माद्युद्धात्समुत्तीर्णानपि
वः ससुहृज्जनान्। अरोगानक्षतैर्देहैः पश्यामि नियतं मम। समेतं पार्थिवं क्षत्रं कालपक्वमसंशयं। विमर्दः सुमहान्भा
वी मांसशोणितकर्दमः। उक्तो मया वासुदेवः पुनः पुनरुपह्वरे। संबंधिषु समां वृत्तिं वर्तस्व मधुसूदन। पांडवा हि यथा
स्माकं तथा दुर्योधनो नृपः। तस्यापि क्रियतां साह्यं स पर्येति पुनः पुनः। तच्च मे नाकरोद्वाक्यं त्वदर्थे मधुसूदनः। निविष्टः
सर्वभावेन धनंजयमवेक्ष्य ह। ध्रुवो जयः पांडवानामिति मे निश्चिता मतिः। तथा ह्यभिनिवेशोऽयं वासुदेवस्य भारत। न चाहमु
त्सहे कृष्णमृते लोकमवेक्षितुं। ततोऽहमनुवर्तामि केशवस्य चिकीर्षितं। उभौ शिष्यौ हि मे वीरौ गदायुद्धविशारदौ॥
तुल्यस्नेहोऽस्म्यतो भीमे तथा दुर्योधने नृपे। तस्माद्यास्यामि तीर्थानि सरस्वत्या निषेवितुं। न हि शक्ष्यामि कौरव्यान्नश्यमा
न उपेक्षितुं। एवमुक्त्वा महाबाहुरनुज्ञातश्च पांडवैः। तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनं॥ ॥इत्युद्योगपनि
र्याणायां॥ ॥वैशंपायन उवाच॥ एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः। हिरण्यरोम्णो नृपतेः सा

वंसितःप्रनारित॥

उद्योग सांदिकसखस्यावै। आहृतीनामधिपतिर्नग्निस्यातियशस्विनः॥ दाक्षिणात्यपतिःशूरो दिक्षुरुक्मीतिविश्रुतः।य
:किंपुरुषमिंद्रस्यपंथमादत्तवासितःकृष्णेशिष्योधनुर्वेदं चतुष्पादमवाप्तवान्॥ यामाहेंद्रधनुर्लोकेसमत्पुंगांडी
वतेजसा। शार्ङ्गंराचमहाबाहुःसम्मितंदिव्यलक्षणं॥ त्रीण्येवतानिदिव्यानिधनूंषिदिविचारिणां। वारुणंगांडिवंत
त्रमाहेंद्रंविजयंधनुः॥ शार्ङ्गंतुवैष्णवंप्राहुर्दिव्यंतज्ञामयंधनुः॥ धारयामासतत्कृष्णःपरसेनाभयावहं। गांडीवंपा
वकोलेभेखांडवेपाकशासनिः॥ द्रुमाद्रुक्मीमहातेजाविजयंसमपद्यत। संछिद्यमौरवान्पाशान्निहत्यमुरमोजसा।
निर्जित्यनरकंभौममाहृत्यमणिकुंडले। षोडशस्त्रीसहस्राणिरत्नानिविविधानिच। प्रतिपेदेहृषीकेशःशार्ङ्गंच
धनुरुत्तमं। रुक्मीतुविजयंलब्ध्वाधनुर्मेघसमस्वनं। विभीषयन्निवजगत्पांडवानभ्यवर्तत। नामृष्यत्तपुरायस्यासोऽस्यबाहु
बलगर्वितः। रुक्मिण्याहरणेवीरोवासुदेवेनधीमता। कृत्वाप्रतिज्ञांनाहत्वानिवर्तिष्येजनार्दनं। ततोऽनुधावद्वार्ष्णेयंस
र्वशस्त्रभृतांवरः। सेनयाचतुरंगिण्यामहत्यादूरपातिना। विचित्रायुधवर्मिण्यागंगयेवप्रवृद्धया। ससमासाद्यवा
र्ष्णेयंयोगानामीश्वरंप्रभुं। व्यंसितोव्रीडितोराजन्नाजगामसकुंडिनं। यत्रैवकृष्णेनरणेनिर्जितःपरवीरहा॥
तत्रभोजकटंनामकृतंनगरमुत्तमं। सैन्येनमहतातेनप्रभूतगजवाजिना। पुरंतद्भुविविख्यातंनाम्नाभोजक २६०

वृष्णिवान्पुरुद्धेनाशिल्पेनसत्रानतुणे॥

दंहृष्य। सनोजराजः। सैन्येनमहतापरिवारितः। भ्रुंशोदिरण्यामहावीर्यःपांडवाञ्छिप्रमागमत्। ततःसकवैवी
र्ध्याततैलांरवक्रोधागमन॥ श्रुतेनादित्यवर्णेनप्रविवेशमहाचमूं। विदितःपांडवेयानांवासुदेवप्रियेप्सया
या। युधिष्ठिरस्तुतंराजाप्रत्युद्गम्याभ्यपूजयत्। सपूजितःपांडुपुत्रैर्यथान्यायंसुसंस्तुतः। प्रतिपूज्यचतान्सर्वा
न्विश्रांतःसहसैनिकः। उवाचमध्येवीराणांकौंतेयंचधनंजयं। साहाय्येयदिभीतोऽसिस्थितोस्मियुधिपांड
व। करिष्यामिरणेसाह्यमसह्यंतवशत्रुभिः। नहिमेविक्रमेतुल्यःपुमानस्तीहकश्चन। हनिष्यामिरणे
यंभागंयंदास्यसिपांडवा। अपिद्रोणकृपौवीरौभीष्मकर्णावथोपुनः। अथवासर्वएवैतेतिष्ठंतुवसुधाधिपा
:। निहत्यसमरेशत्रूंस्तवदास्यामिमेदिनीं। इत्युक्तोधर्मराजस्यकेशवस्यचसंनिधौ। शृण्वतांपार्थिवेंद्राणामन्ये
षांचैवसर्वशः। वासुदेवमभिप्रेक्ष्यधर्मराजंचपांडवं। उवाचधीमान्कौंतेयःप्रहस्यसखिपूर्वकं। कौरवाणां
पे कुलेजातःपांडोःपुत्रोविशेषतः। द्रोणंव्यपदिशन्शिष्यंवासुदेवसहायवान्। भीतोस्मीतिकथंब्रूयाद्
२ पो भीतोगांडिवधृक्। युध्यमानस्यमेवीरगंधर्वैःसुमहाबलैः। सहायोघोषयात्रायांकस्तदासीत्सखामम। तथाप्रति
३ ल्पे भयेतस्मिन्देवदानवसंकुले। खांडवेयुध्यमानस्यकःसहायस्तदाभवत्। निवातकवचैर्युद्धेकालकेयैश्चदानवैः।

उद्योग

तत्रमेयुध्यमानस्यकःसहायस्तदाभवत्।तथाविराटनगरेकुरुभिःसहसंगरे।युध्यतोबहुभिस्तत्रकःसहायोऽभवन्म
म।उपजीव्यरुद्रंदेवंशंकरंविश्वपावनम्।वरुणंपावकंचैवकृपंद्रोणंचमाधवं।धारयन्गांडिवंदिव्यंधनुस्तेजोमयं
दृढं।अक्षय्यशरसंयुक्तोदिव्यास्त्रपरिबृंहितः।कथमस्मद्विधोब्रूयाद्भीतोस्मीतियशस्करं।वचनंनरशार्दूलवज्रा
युधमपिस्वयं।नास्मिभीतोमहाबाहोसहायार्थश्चनास्तिमे।यथाकामंयथायोगंगच्छवान्यत्रतिष्ठवा।विनिवर्त्यत
तोरुक्मीसेनांसागरसंनिभां।दुर्योधनमुपागच्छत्तथैवभरतर्षभ।तथैवचाभिगम्यैनमुवाचवसुधाधिपः।प्र
रा. त्याख्यातस्तुतेनापिसतदाशूरमानिना।एवंद्वौमहाराजतस्माद्युद्धाद्व्यपेयतुः।रौहिणेयश्चवार्ष्णेयोरुक्मीचवसुधा
धिपः।गतेरामेतीर्थयात्रांभीष्मकस्यसुतेतथा।उपाविशन्पांडवेयामंत्रायपुनरेवच।समितिर्धर्मराजस्यसापार्थिव
समाकुला।शुशुभेतारकैश्चित्राद्यौश्चंद्रेणेवभास्वता॥ इत्युद्योगेऽभिनिर्याणायां॥ जनमेजयउवाच॥ तथाव्यूढे
ष्वनीकेषुकुरुक्षेत्रेद्विजर्षभ।किमकुर्वंस्तुकुरवःकालेनाभिप्रचोदिताः॥ वैशंपायनउवाच॥ ॥तथाव्यूढेष्व
नीकेषुयत्तेषुभरतर्षभ।धृतराष्ट्रोमहाराजसंजयंवाक्यमब्रवीत्।एहिसंजयमेसर्वमाचक्ष्वानवशेषतः।सेना २६१
निवेशेयद्वृत्तंकुरुपांडवसेनयोः।दिष्टमेवपरंमन्येपौरुषंचाप्यनर्थकं।यदहंबुध्यमानोपियुद्धदोषान्

स्वलेखलत राचेध्यं॥

एतस्मापराधेनमहितातगंतुंजातंसमारनिमित्तावशमंक्षरं॥ ॥इत्यभिनियात्रा॥

व.रु. क्षयोदयान्।तथापिनिकृतिप्रज्ञंपुत्रंदुर्द्यूतदेविनं।नशक्नोमिनियंतुंवाकर्तुंवाहितमात्मनः।भवत्येवहिमेसूत
बुद्धिर्दोषानुदर्शिनी।दुर्योधनंसमासाद्यपुनःसापरिवर्तते।एवंगतेवैयद्भावितद्भविष्यतिसंजय।क्षत्रधर्मःकि
लरणेतनुत्यागोहिपूजितः॥ ॥संजयउवाच॥ ॥त्वद्युक्तोऽयमनुप्रश्नोमहाराजयथेच्छसि।नतुदुर्योधने
दोषमिमंवक्तुमर्हसि।शृणुष्वानवशेषेणवदतोममपार्थिव।यआत्मनोदुश्चरिताद्शुभंप्राप्नुयान्नर
।नसकालंनवादेवानेनसोऽप्यमतोदिशेत्।महाराजमनुष्येषुनिंद्यंयःसर्वमाचरेत्।सवध्यःसर्वलोकस्यनिंदि
तानिसमाचरन्।निकारानिकृतप्रज्ञैःपांडवैस्त्वत्प्रतीक्षया।अनुभूताःसहामात्यैर्निकृतैरधिदेवने।हयानांचगजा
नांचराज्ञांचामिततेजसां।वैशसंसमरेवृत्तंयत्तन्मेशृणुसर्वशः।स्थिरोभूत्वामहाप्राज्ञसर्वलोकक्षयोदयम्।य
थाभूतंमहायुद्धेश्रुत्वाचैकमनाभव।नह्येवकर्तापुरुषःकर्मणोःशुभपापयोः।अस्वतंत्रोहिपुरुषःकार्यतेदा
रुयंत्रवत्।केचिदीश्वरनिर्दिष्टाःकेचिदेवयदृच्छया।पूर्वकर्मभिरप्यन्येत्रैधमेतत्प्रदृश्यते॥ ॥इत्युद्योगे
ऽभिनिर्याणसमाप्तं॥ ॥संजयउवाच॥ हिरण्वत्यांनिविष्टेषुपांडवेषुमहात्मसु।न्यविशंतमहाराजकौ
रवेयायथाविधि।तत्रदुर्योधनोराजानिवेश्यबलमोजसा।सम्मानयित्वानृपतीन्न्यस्यगुल्मांस्तथैवच।आरक्ष
२

त्कत्थनावाक्यं॥

उद्योग स्य विधिं कृत्वा योधानां भारत। कर्णं दुःशासनं चैव शकुनिं चापि सौबलं तथा। आनाय्य नृपतिस्तत्र मंत्रयामास भा-
रत। ततो दुर्योधनो राजा कर्णेन सह [illegible] दुःशासनेन चासौ बलेन च राजेंद्र मंत्रयित्वा नरर्षभ।
आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत्। उलूक गच्छ कैतव्य पांडवान्सह सोमकान्। गत्वा मम वचो ब्रूहि वासुदेवस्य शृण्वतः
। इदं तत्समनुप्राप्तं वर्षपूगाभिचिंतितं। पांडवानां कुरूणां च युद्धं लोकभयंकरं। यदेतत्कत्थनावाक्यं संजयो महदब्रवी-
त्। वासुदेवसहायस्य गर्जतः सानुजस्य ते। मध्ये कुरूणां कौंतेय तस्य कालोयमागतः। यथा वः संप्रतिज्ञातं तत्सर्वं क्रियतामि-
ति। ज्येष्ठं तथैव कौंतेयं ब्रूयास्त्वं वचनान्मम। भ्रातृभिः सहितः सर्वैः सोमकैश्च सकेकयैः। कथं वा धार्मिको भूत्वा त्वमधर्मे म-
नः कृथाः। य इच्छसि जगत्सर्वं नश्यमानं नृशंसवत्। अभयं सर्वभूतेभ्यो दाता त्वमिति मे मतिः। श्रूयते हि पुरा गीतः श्लो-
कोयं भरतर्षभ। प्रह्लादेनाथ भद्रं ते हृते राज्ये तु दैवतैः। यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि बै-
डालं नाम तद्व्रतं। अत्र ते वर्तयिष्यामि आख्यानमिदमुत्तमं। कथितं नारदेनेदं पितुर्मम नराधिप। मार्जारः किल दुष्टात्मा
निश्चेष्टः सर्वकर्मसु। ऊर्ध्वबाहुः स्थितो राजन् गंगातीरे कदाचन। स वै कृत्वा मनःशुद्धिं प्रत्ययार्थं शरीरिणां। करोमि धर्म- २६२
मित्याह सर्वानेव शरीरिणः। तस्य का

श्री

लेन महता विश्रंभं जग्मुरंडजाः। समेत्य च प्रशंसंति मार्जारं तं विशांपते। पूज्यमानस्तु तैः सर्वैः पक्षिभिः पक्षिभोजनः। आ-
त्मकार्यं कृतं मेने चर्यायाश्च कृतं फलं। अथ दीर्घस्य कालस्य तं देशं मूषिका ययुः। ददृशुस्तं च ते तत्र धार्मिकं व्रतचारिणं
। कार्येण महता युक्तं दंभयुक्तेन भारत। तेषां मतिरियं राजन्नासीत्तत्र विनिश्चये। बहुमित्रा वयं सर्वे तेषां नो मातुलो ह्ययं।
रक्षां करोतु सततं वृद्धबालस्य सर्वशः। उपगम्य तु ते सर्वे बिडालमिदमब्रुवन्। त्वत्प्रसादाच्चरिष्यामः सुखं चैव यथासुखं।
भवान्नो गतिरव्यग्रा भवान्नः परमः सुहृत्। ते वयं सहिताः सर्वे भवंतं शरणं गताः। भवान्धर्मपरो नित्यं भवान्धर्मे व्यवस्थि-
तः। स नो रक्ष महाप्राज्ञ त्रिदशानिव वज्रभृत्। एवमुक्तस्तु तैः सर्वैर्मूषिकैः स विशांपते। प्रत्युवाच ततः सर्वान्मूषिकान्मूषिकांतकः यारमित
द्वयोर्योगं न पश्यामि तपसो रक्षणस्य च। अवश्यं तु मया कार्यं वचनं भवतां हितं। युष्माभिरपि कर्तव्यं वचनं मम नित्यशः।
तपसास्मि परिश्रांतो दृढं नियममास्थितः। न चापि गमने शक्तिं कांचित्पश्यामि चिंतयन्। सोस्मि नेयः सदा तातां नदीकूल-
मितः सुखं। तथेति तं प्रतिज्ञाय मूषिका भरतर्षभ। वृद्धबालमथो सर्वं मार्जाराय न्यवेदयन्। ततः स पापो दुष्टात्मा मूषि-
कानथ भक्षयन्। पीवरश्च सुवर्णश्च दृढबंधश्च जायते। मूषिकाणां गणाश्चात्र भृशं संक्षीयते स च। मार्जारो वर्धते चा

पितेजोबलंसमपद्यत।ततस्तेमूषिकाःसर्वेसमेत्यान्योन्यमब्रुवन्।मातुलोवर्द्धतेनित्यंवयंक्षीयामहेभृशं।ततःप्राज्ञत
मःकश्चिड्डिण्डिकोनाममूषिकः।अब्रवीद्वचनंराजन्मूषिकानांमहागणं।गच्छतांवोनदींतीरंसहितानांविशेषतः।पृष्ठ
तोहंगमिष्यामिसहैवमातुलेनतो।साधुसाध्वितितेसर्वेपूजयांचक्रिरेतदा।अकुर्वंश्चैवयथान्यायंडिण्डिकस्यवचोर्थवत्
अविज्ञानात्ततःसोथडिण्डिकंह्युपयुक्तवान्।ततस्तेसहिताःसर्वेमंत्रयामासुरंजसा।तत्रवृद्धतमःकश्चित्कोकिलोना
ममूषिकः।अब्रवीद्वचनंराजन्ज्ञातिमध्येयथातथा।नमातुलोधर्मकामश्छद्मनासौहिकृतःशिखा।नमूलफलभक्षस्य
विष्ठाभवतिलोमशा।अस्यगात्राणिवर्द्धंतेगणश्चपरिहीयते।अद्यसप्ताष्टदिवसान्डिण्डिकोपिनदृश्यते।एतच्छ्रु
त्वावचःसर्वेमूषिकाविप्रदुद्रुवुः।बिडालोपिसदुष्टात्माजगामैवयथागतं।तथात्वमपिदुष्टात्मन्बैडालंव्रतमा
स्थितः।चरसिज्ञातिषुसदाबिडालोमूषिकेष्विव।अन्यथाकिलतेवाक्यमन्यथाकर्मदृश्यते।दंभनार्थायलोकस्य
वेदाश्चोपशमश्चते।त्यक्त्वाछद्मत्विदंराजन्क्षत्रधर्मंसमाश्रितः।कुरुकार्याणिसर्वाणिधर्मिष्ठोसिनरर्षभ।बाहुवीर्ये २६३
णपृथिवींलब्ध्वाभरतसत्तम।देहिदानंद्विजातिभ्यःपितृभ्यश्चयथोचितं।क्लिष्टायावर्षपूगांश्चमातुर्मातृहितेस्थितः।प्र

माक्रोशश्रुरणोजित्वासंमानंपरमावह।अपिवत्सामारवत्रायतास्त्रास्मास्निरपवर्जिताः।युध्यामहेवयंसंख्येकोपयेमवयं
दुर्वाचात्वत्कृतेहुताशनावस्त्रसमत्वागोविंदस्यबाहुमाश्रित्यएवंदाहंस्मरतपुरुषोत्तमवा।यत्कृतंसमवोवत्सुमायोनेकृ
कमेसहिताः।अथसमस्निग्धोराजन्नुवाचाथमायमसरायुद्धतस्यायसमागतकालः।समरस्यनराधिप।एतदर्थंमयासार्द्धंकृतमेव
युधिष्ठिर।किंतुयुद्धात्परंलाभंकोवेयोवक्तुमन्यते।किंवत्वंक्षत्रियकुलेजातःसंप्रथितोभुवि।द्रोणादस्त्राणिसंप्राप्यकृ
पाच्चभरतर्षभ।तुल्ययोनिःसमबलोवासुदेवंसमाश्रितः।ब्रूयास्त्वंवासुदेवंचयोत्स्यमानोस्मिपतः।अस्मात्स्वार्थंपाण्डवानांचैव
यदेमीभ्रातृतियोधय।मनामदेवद्वयमाययाकृतवानसितत्सायवदुनःलब्धामांकृतेनोमामभिद्रवाइंद्रजालंसमायावि
कुहकंवाविभीषणं।आत्तशस्त्रस्यमेयामेवंदंतिप्रतिगर्जनाः।वयमप्युत्सहेमह्यैवंगवानसमायया।रसातलंविशामो
पिवैइंद्रंवापुरमेवचादर्शयेमरूपाणिस्वशरीरंसकृत्यपिनतुपर्यायतः।सिद्धिर्बुद्धिमाप्नोतिमानुषी।मनसैवहिभूता
निधातिवकुलनंदनः।अब्रवीचपिवस्तोयधार्त्तराष्ट्रोनदंरणा।घातयित्वासदास्मान्कियार्थस्यात्रसुहृत्तम।आत्मवचनेकोवमे
सर्वमजयस्त्वंसाक्षीमद्वितीयःपार्थेनाविरवःसत्व्यमानितः।समत्वमरारीकृत्वापाण्डवार्थेपराक्रमी।युध्यस्वाहार
रोपयत्स्वयपामःपुरुषोनवासस्तुत्वभितिजयस्त्वकापौरुषमास्थितः।करोतिद्विषतोशोकंसजीवतिसुजीवितं।स्वक

स्मिविव ते कस्मात्ख्याता लोके महद्यशः ॥ अथेदानीं विजानीमः के निमित्ताः सन्निपातकाः ॥ मद्दिधेनापि न्यपतिस्तयि सुकाःक
थं वनास्मन्नाहं मंत्तुगेकर्त्तुं किं सत्वे विशेषतः ॥ नेवं ने वरकं बालं बकाशिनमविद्यकं ॥ उलूकमद्य वोब्रूहि युस्मकृतीम
सेवकं ॥ विराटनगरे पार्थं यन्मवं न्ते देहा तु सुतरा व हन्वेनाम विरुद्यानस्तन्मामेवद्विषां मध्ये ॥ शक्तिज्ञातं मनामध्येन न
निष्ठ्या त्वयातुरा पृथुः श्वासनस्य कविश्यौ वत्साय दिग्भक्तते ॥ यद्भवी विविचाके ते यधान्तिं राज्ञानदेरेणो ॥ निहनिष्यामि
तस्मात्तस्य कालोयमागतः ॥ त्वं हि मोज्यं पुरस्कार्य्यं न केयेवं नारता कस्य कं कवनेन कर्त्तं युध्यस्व कृतियो मवा ॥
यिष्य से हतो नूनं मोगदा मालिगण्णारता न ह यावमनाम छेवलिनं ते हकोदराअस्तु कववन्म ब्रूहि व वनान्कमनारत
। युध्यस्वाद्य स्थिरो नूत्वा यस्यामस्तवयोरुकृयासु धिष्ठिरानुरागं वदेवं वमथिनारता कुलायशूपरिकेवासीदानीय
शातयं ॥ ब्रूयात्वं सहदेवं वराजमध्ये वधोमम ॥ युध्येदानीं रणं कृतः केयानकं स्य पाण्डवा ॥ विराटदुपदौ यो नौ ब्रूयात्व
ववनं मम ॥ न हष्टपूर्वा भर्त्तारो भृत्येरपि महागुणैः ॥ तथार्थपतिभिः कृत्वा यतः स्वाः प्रजानता ॥ श्लाघ्यो दे नरप
तिर्युवयोरिति चागतं ॥ ते यूयं मे हता नृत्वा तदर्थमनापि वा ॥ श्लामार्थं पाण्डवार्थं च प्रयुध्यं मत्पान्दस्पृहश्चुत्तेचपां २६५
चाल्यं ब्रूयात्वं वचनान्मम ॥ एषते समयः प्राप्तो लब्धव्यं श्च त्यया स्वयं ॥ द्रोणमागम्य समरे ज्ञास्यसे हितमुत्तमं ॥ युध्यस्व

सुहृत्कार्थं कुरुकर्म सुदुष्करं ॥ शिखंडिनमथो ब्रूहि उलूक वचनान्मम ॥ स्त्रीति मत्वा महाबाहुर्नहनिष्यति कोरवः ॥
गांगेयो धन्विनां श्रेष्ठो युध्येदानीं सुनिर्भयः ॥ कुरुकर्म रणे यत्तं पश्यामः पौरुषं तव ॥ एवमुक्त्वा ततो राजा प्रहस्योलूक
मब्रवीत् ॥ धनंजयं पुनर्ब्रूहि वासुदेवस्य शृण्वतः ॥ अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमां ॥ अथवा निर्जितोस्माभी
रणे वीर शयिष्यसि ॥ राष्ट्रान्निर्वासनक्लेशं वनवासं च पांडवाः ॥ कृष्णायाश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ यदर्थं क्षत्रियाः सू
ते सर्वं तदिदमागतं ॥ बलं वीर्यं च शौर्यं च परं चाप्यस्त्रलाघवं ॥ पौरुषं दर्शयन्युद्धे कोपस्य कुरु निष्कृतिं ॥ परिक्लिष्टस्य दी
नस्य दीर्घकालोषितस्य वा ॥ हृदयं न स्फुटेत्कस्य यस्यैश्वर्याच्च्युतस्य वा ॥ कुले जातस्य शूरस्य परवित्तेषु गृध्यतः ॥ आवि
च्छिन्नं राज्यमाक्रम्य कोपं कस्य न दीपयेत् ॥ यत्तदुक्तं महद्वाक्यं कर्मणा तद्विभाव्यतां ॥ अकर्मणा
तद्विभाव्यतां ॥ (अकर्मणा तद्विभाव्यतां) अकर्म्मणा कथितेन सन्तः कुपुरुषं विदुः ॥ अमित्राणां वशे स्थानं राज्यस्य च पुन
रुद्धरावार्थे युद्धकामस्य तस्मात्कुरु तथा पौरुषं ॥ पराजितो वि सुतमः कथं मानायिता सजायाच्च कोमर्षी मनुष्येण क
र्त्तुं पुरुषमानिना ॥ द्रष्टा शोच चतुर्वर्षाणि वने धिष्ण्या क्लिशमिताः ॥ संवत्सरं विराटस्य दास्यमास्थाय चोषितः ॥ राष्ट्रान्निर्वासनं क्ले
शं वनवासं च पांडवाः ॥ कृष्णायाश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ अप्रियाणां च वचनं प्रवुच्चस्तुनः पुनः ॥ अमर्षं दर्शय त्वम

तेकथनावाक्यं अथसंज्ञासंज्ञायथाःकृतः।लोहानिसारेणीराजनाधिस्यातागृह्णता।वेदयोःश्रुतिधनुर्वेदयोः।अंत

उद्योग ममर्षोहिवाप्पौरुषं।कोधोबलंतथावीर्यंज्ञानयोगोत्रयोऽरुषः।इदंतेहस्यतांपार्थदुष्करंहुतरुषोमवाल।लोहानिमा
रोनिर्हन्ताकुरुकुरुत्वमकर्द्मं।पुष्पाणीत्राम्नानायोद्याःदस्योर्युद्धमन्नमकेशवः।अममागम्यनीम्णेरासंयुगेकिंविकवसे।अ
रुरुधुर्यथामंदाःपर्वतंगंधमादनं।एकंकवमिकौतेयश्वकबन्द्युरुषोत्तवीत्ततनृत्रेसुदुर्धर्षेन्नल्यचबलिनावरौ।द्रो
णंचबलिनांश्रेष्ठंशावीयतिसमंयुधि।अजित्वासंयुगेपार्थराज्यंकथमिदंकसि।बालेधनुषिचाचार्य्योवदयोरंतगोद्वयोः
युधिदुर्योमविक्रोत्प्रमनीकवरमच्युत।द्रोणंमहाद्युतिंपार्थजेतुमिबमितन्नुवा।नहिशुश्रुमवातेनमेरुमुन्माथितागि
रिः।अनिलोवीवहेन्मूरुंद्यौर्वापिपतेन्महीं।युगंवापरिवर्तेतयद्येवंस्याद्यथात्थमां।कोह्यन्यांजीवितांकांक्षीप्राप्या
स्त्रमरिंमर्दनं।गजोवाजीनरोवापिपुनःस्वस्तिगृहान्व्रजेत।पार्थोवाइतरोवापिकोह्यस्त्रिस्तद्गृहान्व्रजेत।कथमाभ्याम
भिध्यानःसंस्पृष्टोदारुणेनवा।रणेजीवन्प्रमुच्येतपदाभूमिमुपस्पृशन्।किंदर्दुरःकूपशयोयथेमांनबुध्यसेराजचमूंसमेतां
दुराधर्षांदेवचमूप्रकाशांगुप्तांनरेंद्रैस्त्रिदशैरिवद्यां।प्राच्यैःप्रतीच्यैरथदाक्षिणात्यैरुदीच्यकांबोजशकैःखशैश्च।शा २६५
ल्वैःसमत्स्यैःकुरुमध्यदेशैर्म्लेच्छैःपुलिंदैर्द्रविडांध्रकांच्यैः।नानाजनौघंयुधिसंप्रवृद्धंगांगंयथावेगमपारणीयं।

गामध्यगं।एतद्विवरणंव्राहि।प्रतिपादकेवेदेधनुर्वेदेशाध्यांतमनयोः।आत्मानंद्रोणाभीष्मायामधिधातोदंडदारुणेन
न्ययानकेनास्त्रेण।।

पर्य्यायःपरिक्रमःयोरुषंपर्यायधर्मेण।विधमतादर्षमनसिवर्त्तते।निवर्तमानकुरुतात्तानदेवतिकर्माणिनिष्फलमितस्त्रियः।अमात्र
मांचस्थितंनागबलस्यमध्येयुयुत्सुमासमदकिमल्पबुद्धे।अहंपाविष्टुधीर्वीवबत्रिदिवंचातस्यं।ज्ञानीमादिशोणपार्थक
वंहिंसवेनारता।अकवमानानाद्युध्यसकवासर्जुनकिंवद्धापर्य्यायमिष्टिस्तस्यानिनश्यते।कवंतास्यदीर्घकंबनासो
केसिध्येतकर्मधनंजय।मार्वनविष्णुमसिदृष्टाःकवातकोद्दिष्टगतिःज्ञातामितवासुदेवमहायंज्ञानामितगांडिवंता
लमावेत्तंजानामितवाहंसोनास्तियाःजानानाऽस्तराज्यमनहरामि।नतुपर्थ्यैघधर्ममणासिद्धिंप्राप्ता।तिमानसंःमनासे
वात्रक्रम्भानिविधमंताकृतंवशा।अयदेशसमातुकंरात्रौविलपतस्तवा।प्रयन्तेवप्रजागसिष्येवानिस्सस्येवाध्वं।कमद
गांडिवंतिमृद्धिद्वंदामपणोजितः।कृतदानीमसतस्यबलमासीद्फाल्गुन।मिगदोद्धीमासमनोरक्षाल्लुतोहासंगांडिवा
।भवियाद्व्यदावोन्नडिनाकृतमनिदिनो।मावोदास्यसमापन्नांमौवर्यामासपार्थता।अमत्रवथ्यमासुकाहासकमरापद
स्थितान्।अवोचंयत्संदतिलानदंवनस्त्थ्यामवतत्।धृतदिवामापार्थेनविरोटनगरंसदा।स्वकेमलोवेत्रातविरोटस्यमद्व
नस्मीनीमासनेनाकौंतेयपत्रतनमापौरुषं।एवमेवसदादंडसक्रियास्त्रिमधुधर्मवेलोकावाधेडवेत्राकन्यानर्तितवा
नसि।ननयावासुदेवस्यमचापिनवफाल्गुन।राज्यंपतिप्रदास्यामियुध्यस्वसहकेशवः।।

ष्णुरुषकारान्तावाएवामदवंदंडपदाप्नाववस्तुदेवहनिपरिसागनावधांतरयद्रागंकारितमितसर्वः।।

४ इंद्रजालं मं
चकृतं ॥४१
७ द्योग

समाकलं
शालच हर्मे

मायास्वाभाविकमसत्यप्रकाशनं ॥ कुरु इन्द्रकोमोपधं कृतं ॥ सत्त्वबलं बंचला उद्योगः ॥ वाक्यमित्रमाङ्दुर्योधनस्यानुगाडं कुरुं ॥ कुदूप

नमायाहीन्द्रजालं वाकुरु इन्द्रकावापिमीषणा ॥ आतयास्तस्यसंयामवदंतिव्रतिगर्जता ॥ वासुदेवसहस्वेवाफाल्गुनानां वा

तानिवा ॥ आसाद्यमाममामाघेतुंड्विष्यंतिदिशो दिशः ॥ संख्य ॥ गंगकत्तीष्माणितिष्ठिवानि शिरसा गिरिं ते ॥ स्मंवामहागाधं वा — र्मिपाकः

कल्पां प्रकृषोदधिः ॥ शारदस्तमहामीनं विविशतिमहौरगं ॥ हृदकलेमहोवालंसोमदन्निति मिं गिलं ॥ ङःशासानोद्धशलेरा — गाढं

त्यमसंप्रसुषेणा चित्रायुधनागनकं ॥ जयद्रथाडिप्रकृ मित्रगाधं दुर्मर्षणा ॥ दंशाकुं निष्पातं ॥ शाल्वो द्यमकृष्यमनिशद्कं

यदा कमाद्र्थ्यमनश्चावता ॥ नविष्यसिवदंतमर्वबांधवस्त्वदामनस्त्वेपरितापमष्यति ॥ नदामनस्त्वविदिवादिवा शुब्नि

वीर्जितापाथमहाप्रशासना ॥ प्रशाम्यराज्यदि सुकुलंनंवयाशुन्न्ददितःस्वर्गइवातपस्विना ॥ ॥ इत्युद्योगपर्वक

यानं ॥ ॥ संजय उवाच ॥ स्मनानिवेशांसंप्रामः केतव्यःपांडवस्यह ॥ ममागतःपांडवे पिदुर्योधिष्ठिरमनाषत ॥ स्यंति

शाहत्ववाक्यानांयथोक्तं ब्रुवतामम ॥ दुर्योधनस्यमामाहशृणुवानकाकुमहसि ॥ युधिष्ठिर उवाच ॥ ॥ उलूककानयस्तंत

स्त्रिदिवंविगतज्वरः ॥ यन्मतं धार्तराष्ट्रस्य तु प्रमादीर्घदर्शिनः ॥ मतो द्युतिमतां मध्ये पांडवानां महात्मनाम् ॥ संजयानां

वमस्यानांकृष्णस्यच यशस्विनः ॥ नाइद्दलोकरनिमिवताः तपस्विना स्वर्गइव ॥ — २६६

हृद्वत्लेमहानकं ५ — पिहृद्वलमप्रकालेपागः दा०

धिस्याताःदाताशलेशशसंशयपथः कृतालाक्षामिरोनिराजनं ॥ वेदयोःश्रुतिधनुर्वेदयोः ॥ अनेनंगमध्यगांगतद्विवरांबासि

द्रुपदस्य सपुत्रस्य विराटस्य च सन्निधौ ॥ नृमियानांच सर्वेषां मध्येवाक्यंजगाद ह ॥ ॥ उलूक उवाच ॥ ॥ इदं त्वामब्र

वीद्राजा धार्तराष्ट्रो महामनाः ॥ शृण्वतां कुरुवीराणां तन्निबोध नराधिप ॥ पराजितोसिद्यूतेन कृष्णा चानायिता सभां ॥ शक्यो

मर्षो मनुष्येण कर्तुं पुरुषमानिना ॥ द्वादशैव तु वर्षाणि वने धिष्ण्याद्विवासिताः ॥ संवत्सरं विराटस्य दास्यमास्थाय चोषिताः

असितं राज्यहरणं वनवासं च पांडव ॥ द्रौपद्याश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ अशक्केन च यद्धत्तं भीमसेनेन पांडव ॥ दुः

शासनस्य रुधिरं पीयतां यदि शक्यते ॥ लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्दमं ॥ समः पंथा हता यूयं श्वो युध्यस्व सकेशवः

अ समागम्य भीष्मेण संयुगे किं विकत्थसे ॥ आरुरुक्षुर्यथा मंदः पर्वतं गंधमादनं ॥ एवं कत्थसि कौन्तेय अकत्थन्पुरुषो भव ॥

नपुत्रस्य तु दुर्धर्षं शल्यस्य च बलिनो वरं ॥ द्रोणस्य च युधिष्ठिरं शचीपतिसमं युधि ॥ अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ॥ ब्राह्मे — ६

धनुषि चाचार्यं वेदयोरन्तगं द्वयोः ॥ युधि धुर्यमसंक्षोभ्यमनीकचरमच्युतं ॥ द्रोणं महाद्युतिं पार्थ जिगीषसि तन्मृषा ॥ नहि

शुश्रुम वातेन मेरुमुन्मथितं गिरिं ॥ अनिलो वा वहेन्मेरुं द्यौर्वापि निपतेन्महीं ॥ युगं वा परिवर्तेत यद्येवं स्याद्यथात्थ मां

॥ को ह्यास्त्रं जीविताकांक्षी प्राप्यास्त्रमरिमर्दनं ॥ गजो वाजी नरो वापि पुनः स्वस्ति गृहान्वियात् ॥

स

वृत प्रतिपादके वेदे धनुषि धनुर्वेद प्राप्यं तमनयोः ॥

आत्मानं द्रौपद्या मामत्याममसि धातो हेतुदारुणेन नयानकेनाक्षिणा। पर्यायः परिक्रमः पौरुषं पर्याये पर्यायिधर्मेणयोः



कथमात्मानमसि ध्यातः मंस्ये दारुणेन वा रणेजीवच्छिन्नचेतयदा न्मिनुपस्थानां किं दर्दुरः कूपचायो ययेमानबुध मेराजवत्रमम नेना। दुरात्मदेववन्नघकारांगुष्ठोनांगंडीमस्य दर्शयिरिवद्यो। प्राचिः श्रतीचिरथदाक्षि णात्यिरुदीच्य कांबोजवाकिः स्वनिष्ठा। प्राचिः ममच्छे। कुरुमध्यदेशिन्नो बिः पुलिंदि इविडो। ऽडकांच्यः। नानाजानाद्युधिमंप्रहर्ष
म गांगं यथा वेगं धारली यं मां चन्द्रितं नागकुलस्य मध्ये युयुत्साहमेमं दकिमल्पबुद्धेहृत्येवमुक्त्वा राजा नं धर्मपुत्रं युधि ष्ठिरं। अस्याहनपुनर्जिस्तुलुब्धकः इत्यनापत। अकवमानो युध्यत्वकवमेन हि किं वक्ता। पर्यायमसिष्ठिरतस्या नत
- स्मि ध्यतिकवनालायदो दंकवनान्नोकेमिछेत्कर्म धनंजयाम्रवनेवेष्टुः मिद्दाथीः कच्चे ते को हिडगतः। जानामिते वासुदेवं महात्मं जानामिते गांडिवं तालमात्रं जानाम्येतत्त्वाहवेनास्तियोद्धा जेनन्ते हंराज्यमेतद्दशामिानुक्त्यपत्थ्यां य धर्मेणामिहिं प्राप्नोति मातृवयः मनसैवानुक्लानि विधाताकुरुतेवशो। त्रयोदशसमाशुतोराज्यं विलपतस्तवानृय स्यैव पुत्रशाक्षिप्यैनिहत्य त्वां मवा धवाकृतदा गांडिवं ते ह्यस्व दामयरोर्जितः। कृतवाजी मतेनस्य बलमासीच २६७
फाल्गुनासगदाङीमासनावायाथीबायिमगांडिवातानविमोक्षमतदाघोन्ह्वि नाकुलामनिंदितां। मावो दास्यमभापन्नाने कृष्णामाममनाविनी॥ येण विधाता दैवं मनसैव कृतानिवशोकुरुतेदं तेनेदं प्रतिकर्मनिष्फलमित्यर्थः॥

अमानुष्ये पुरुषाकाराभावे। एवमेव दंड यदामा वस्त्वके नरहितप्रित्यागेन वेणातरग्रहणं कारितमित्यर्थः। मायाया

अमानुष्यमसमा पुष्कान्नामकर्म्मण्यवस्थितानां। अवोवंपत्र्ववदतिल्लानदृंवस्तथ्यमेवतता। धृत्ता हि वेणीयार्येन विरादन म
गारपदास्तद्कर्मणि च श्रांतं विराटस्य महानामा त्रीमात्मनेनकौंतेयपत्युतन्ममयो रुधा। एवं मत्तहदा दंडं क्षत्रियाः कुविंदेदधुः। श्रेणीयां रुक्मांबवे सौपाच मयुगेयः पलायतो न तथा वासुदेवस्य न चापितव फाल्गुना राज्यं प्रति प्रदास्या
चं मियुध्यत्वमके शवः। नमायाहीद्रजालं वा कुहका वा विभीषणी। आत्तशस्त्रस्य मेयुद्धे वहंति प्रतिगर्जनां। वासुदेवसं हस्त्रं वा फाल्गुनानां शतानि वा। आसाद्य मामसमो द्वेषुं द्रविष्यंति दिशोदश। संयुगं गच्छतोप्य राजिंधिवासिरसागिरित नमंवा महागाधंवा कुत्या पुरुषोदधिं। आरहतमहामीनं विविंशतिमहोरगं। हृदबलमसुचालं सोम दशितितिमिंगिलं दुःशासनो हंचलवाल्यमसंपुष्येणचित्रायुधनागनक्रं। जयद्रथाद्रिपुरुकुमित्रगाढं दुर्मर्षणोदं शकुनिप्रपाते। शस्त्रौघमक्षय्यमति प्रवृद्धं यदावगाह्य श्रमनष्टचेता। नविष्यसित्वहतमित्रबांधवस्तदा मनस्ते परितापमेष्यति। तदा मन स्त्वं चिरदिवादिवाप्रवेपूर्निवर्तितात्यर्थमहोशुया। चानात्ताप्रसाम्यराज्यं हि सुदुर्लभं त्वयाबुभुत्सयतास्वर्गईवातपस्विना॥

नाविकमत्यप्रकाशनैं। इंद्रजालंमंत्रकृतं। कुहकमोषधकृतं। सत्तचलबलतां दुधेवेगः। पुरुमित्रेणडयोधनभ्राता। गाढे कुष्टं बुभुत्सता इहलोके न्हृतिमिच्छता। तपस्विना स्वर्गमिव॥

उद्योग इत्युद्योगे उलूकयाने॥ ॥संजय उवाच॥ ॥उलूकस्त्वर्जुनं भूयो यथोक्तं वाक्यमब्रवीत्। आशीविषमिव क्रुद्धं तुदन्वा
क्यशलाकया॥ तस्य तद्वचनं श्रुत्वा रुषिताः पांडवा भृशं। प्रागेव भृशसंक्रुद्धाः कैतव्येन प्रधर्षिताः॥ नासनेष्ववतिष्ठंत बा
हूंश्चैव विचिक्षिपुः॥ आशीविषा इव क्रुद्धा वीक्षांचक्रुः परस्परं। अवाक्शिरा भीमसेनः समुदैक्षत केशवं॥ नेत्राभ्यां लो
हितांताभ्यां आसीविष इव श्वसन्। आर्तं वातात्मजं दृष्ट्वा क्रोधेनाभिहतं भृशं॥ उत्स्मयन्निव दाशार्हः कैतव्यं प्रत्यभाषत
॥ प्रयाहि शीघ्रं कैतव्य ब्रूयाश्चैव सुयोधनं। श्रुतं वाक्यं गृहीतोर्थो मतं यत्ते तथास्तु तत्॥ एवमुक्त्वा महाबाहुः केशवो रा
जसत्तम। पुनरेव महाप्राज्ञं युधिष्ठिरमुदैक्षत॥ संजयानां च सर्वेषां कृष्णस्य च यशस्विनः। द्रुपदस्य सपुत्रस्य विराटस्य
च संनिधौ॥ भूमिपानां च सर्वेषां मध्ये वाक्यं जगाद ह॥ उलूकोप्यर्जुनं भूयो यथोक्तं वाक्यमब्रवीत्। आशीविषमिव क्रु
द्धं तुदन्वाक्यशलाकया॥ कृष्णादींश्चैव तान्सर्वान्यथोक्तं वाक्यमब्रवीत्॥ उलूकस्य तु तद्वाक्यं पापं दारुणमीरितं॥
श्रुत्वा विचुक्षुभे पार्थो ललाटं चाप्यमार्जयत्॥ तदवस्थं तदा दृष्ट्वा पार्थं सा समितिर्नृपाः। नामृष्यंत महाराज पांडवानां मह
रथाः॥ अधिक्षेपेण कृष्णस्य पार्थस्य च महात्मनः॥ श्रुत्वा ते पुरुषव्याघ्राः क्रोधाज्जज्वलुरच्युताः॥ धृष्टद्युम्नः शिखंडी च २६८
सात्यकिश्च महारथः। केकया भ्रातरः पंच राक्षसश्च घटोत्कचः॥ द्रौपदेयाभिमन्युश्च राक्षसश्च घटोत्कचः भीमसेन

श्च विक्रांतो यमौ च विमहारथौ॥ उत्पेतुरासनात्सर्वे क्रोधसंरक्तलोचनाः॥ बाहून्प्रगृह्य रुचिरानक्तांश्चंदनरूषिता
न्। अंगदैः परिहार्यैश्च केयूरैश्च विभूषितान्॥ दंतान्दंतेषु निष्पिष्य सृक्किणी परिलेलिहन्॥ तेषामाकारभावज्ञः
कुंतीपुत्रो वृकोदरः। उदतिष्ठत्स वेगेन क्रोधेन प्रज्वलन्निव॥ उद्वृत्य सहसा नेत्रे दंतान्कटकटाप्य च॥ हस्तं हस्तेन
निष्पिष्य उलूकं वाक्यमब्रवीत्॥ अशक्तानामिवास्माकं प्रोत्साहननिमित्तकं॥ श्रुतं ते वचनं मूर्ख यत्त्वां दुर्योधनोब्रवीत्॥
तन्मे कथयतो मंद शृणु वाक्यं दुरासदं। सर्वक्षत्रस्य मध्ये त्वं यद्वक्ष्यसि सुयोधनं॥ शृण्वतः सूतपुत्रस्य पितुश्च त्वं दुरा
त्मनः। अस्माभिः प्रीतिकामैस्तु भ्रातुर्ज्येष्ठस्य नित्यशः॥ मर्षितं ते दुराचार तत्त्वं न बहु मन्यसे॥ प्रेषितश्च हृषीके
शो शमाकांक्षी कुरून्प्रति। कुलस्य हितकामेन धर्मराजेन धीमता॥ त्वं कालचोदितो नूनं गंतुकामो यमक्षयं। गच्छस्वाहवमस्मा
भिस्तच्च श्वो भविता ध्रुवं॥ मयापि च प्रतिज्ञातो वधः सभ्रातृकस्य ते। स तथा भविता पाप नात्र कार्या विचारणा॥ वेलामतिक्रमे
त्सद्यः सागरो वरुणालयः। पर्वताश्च विशीर्येयुर्मयोक्तं न मृषा भवेत्॥ सहायस्ते यदि यमः कुबेरो रुद्र एव वा। यथा प्रतिज्ञा
तं दुर्बुद्धे करिष्यंति पांडवाः॥ दुःशासनस्य रुधिरं पाता चास्मि यथेप्सितं। यश्चेह प्रतिसंरब्धः क्षत्रियो माभियास्यति। अपि
तं भीष्मं पुरस्कृत्य तं नेष्यामि यमक्षयं॥ यच्चैतदुक्तं वचनं मया क्षत्रस्य संसदि। यथैतद्भविता सत्यं तथैवात्मानमालभे॥

उद्योग भीमसेनवचः श्रुत्वा सहदेवो ह्यमर्षणः। क्रोधसंरक्तनयनस्ततो वाक्यमुवाच ह। गोविंद शूरमत्यर्थं शमनीकजनसंसदि। श्रुणु
पापवचो महदयश्चोदितस्त्वया। मास्माकं नविता भेदः कदाचित्कुरुभिः सह। धृतराष्ट्रस्य संबोधो यदि न स्यात्त्वया महा
त्वं तु लोकविनाशाय धृतराष्ट्रकुलस्य च। उत्पन्नो वीर पुरुषः स्वकुलघ्नस्य पापकृत। जन्मप्रभृति चास्माकं पिता तेषाय
पुरुषः। हे अहितानि वज्रमानि नित्यशः कर्तुमिच्छति तस्य वैरानुषंगस्य गतास्त्वं तु दुर्गमं। अद्य मां दीनि दत्त्वाश
कृतिः संप्रपद्यत। ततो मित्राकृति हत्वा मित्रनामसु धिक्विना। भीमस्य वचनं श्रुत्वा सहदेवस्य वीर्ययो। उवाच फाल्गु
तो वाक्यं भीमसेनस्य च विव। भीमसेनेन ते संति येषां वीर त्वया सह। मे सत्यं शरद्वत्सु सुषिनो मृत्युपाशवशं गताः। उ...य
श्रुत्वा नते वाक्यः परुषं पुरुषोत्तम। हताः किमपराध्यते येषां क [redacted] स्या भुजमायिताः एवं मुक्त्वा महा वाक्यं भीमसेनीमयाग्रके पुक
मे धृष्टद्युम्नमुखा वीरास्तु ठदः सममाषत। श्रुत्वा वस्तस्य यापस्य धातेराष्ट्रस्य भाषितं। कुरु सन्नवासुदेवस्य ममसिंवविशे
षतः। श्रुत्वा सर्वतः सर्वदा अस्माकं हितकाम्यया। दुतावासुदेवस्य तेव तादृशयन्त्रितः। समत्या पार्थिवं कृत्स्नमर्वसागरा
याम्यहं। निवर्तिः समनुज्ञातो वाक्यमस्य यदुत्तरा। उत्तरके प्रापयिष्यामि यद्भद्या मित्रयोधनः। स्त्रीहृते के चित्तस्यास्य च रति २६४
वाक्यं वक्ष्यसु खो। गांडीवेनाभिधास्यामि क्रीबादिवव नोत्तरा। ततस्ते पार्थिवाः सर्वे प्रशंसन्तु धनंजयं। तेन वाक्योपवा

शरयन्नयाल्पयना। प्रदरेपथाइस्यमि॥
रे राविस्मिता राजसत्तमाः। अनुनीय च तान्सर्वान्दिय थामान्त्यम धावयः। धर्मराजं तदा वाक्यं तत्त्वार्थ्य प्रत्यभाषत॥
आत्मानमवमन्वानो नहि स्यात्पार्थिवोत्तमा तत्रोत्तरं प्रवक्ष्यामि तवश्रु श्रुषरोरतः। उलूकं वरतश्रेष्ठ ग्रामसर्वसेयो
जिंता दुर्योधनस्य तद्वाक्यं निशम्यान्तरतर्षेन। अतिलोहितनेत्राभ्यामाशी विषद्रव श्रुद्रता। स्मयमानद्व क्रोधात्सृक्कि
णी परिसंलिहन्। जनार्दनमभिप्रेक्ष्य भ्रातृंश्चैवेदमब्रवीत्। उलूक गच्छ कितवां ब्रूहि तात सुयोधनं। कृतघ्नं वैर पुरुषं
दुर्मति कुलपासना। पांडवेषु सदा पापनित्यं जिह्मप्रवर्तिनः। स्ववीर्यादि यः पराक्रम्य पापश्चाक्रमते परान्। अपनीतिश्च य
वाक्यमेष विक्रत्रियः पुमान्। स प्राप्त कृत्रियो भूत्वा अस्मानाङ्कुयमस्वुगो। मात्यायः। मात्मानपुरस्कृत्य युद्ध मा गाः कुला
धमा। अपिवीर्यं समाश्रित्य त्वत्वीर्यं च कौरव। आक्रयस्वरणाय... क्षत्रियो नवापरवीर्यं समाश्रित्य
ः समाक्रयते परान्। अशक्तः स्वयमादातुमेतदेवं नृमकांय स्त्वपरे सांवीर्यं। आत्मानं च कुमन्य सोक थमेव सशक्
स्त्वमस्मान्समभिगर्जसि॥ ॥कृष्णउवाच॥ ॥मद्वचश्चापि भूयस्ते वक्तव्यः सुयोधनः। श्व इदानीं प्रपद्येथाः पुरुषो
न वदुर्मति। मन्यसे यद्रु मूढ त्वं न योत्स्यति जनार्दनः। सारथ्येन वृतः पार्थे इति त्वं न बिभेषि च॥ ॥ हृश्यथाः॥

उद्योग

नचान्यकालेपश्चात्कालेपिममीकृतेविपक्षत्वेनगणयति॥ प्रयतन्प्रयत्नयतनशक्तिःसामान्यमितिगुरुवचाश्वनिरुक्तिः॥सर्व
जघन्यकालमप्येतद्भवेत्सर्वपार्थिवान्॥निर्दहेयमहंक्रोधात्तृणानीवहुताशनः॥युधिष्ठिरनियोगात्तुफाल्गुनस्य
महात्मनः॥करिष्येऽयुध्यमानस्यसारथ्यंविजितात्मनः॥यद्युत्पतसिलोकांस्त्रीन्यद्याविशसिभूतलं।तत्रतत्रार्जुनरथं
प्रभातेद्रक्ष्यसेपुनः॥यद्वापिभीमसेनस्यमन्यसेमोघभाषितं।दुःशासनस्यरुधिरंपीतमद्यावधार्यतां॥नत्वांसमीक्षते
पार्थोनापिराजायुधिष्ठिरः॥भीमसेनोनचयमौप्रतिकूलप्रभाषिणं॥ ॥इत्युद्योगेउलूकयाने॥ ॥संजयउवाच॥
दुर्योधनस्यतद्वाक्यंनिशम्यभरतर्षभ।नेत्राभ्यामतिताम्राभ्यांकैतव्यंसमुदैक्षत।सकेशवमभिप्रेक्ष्यगुडाकेशोमहा
यशाः॥अभ्यभाषतकैतव्यंप्रगृह्यविपुलंभुजं॥स्ववीर्यंयःसमाश्रित्यसमाह्वयतिवैपरान्।अभीतोयुध्यतेशत्रून्स
वैपुरुषउच्यते।परवीर्यंसमाश्रित्ययःसमाह्वयतेपरान्।क्षत्रबन्धुरशक्तत्वाल्लोकेसपुरुषाधमः॥सत्वंपरेषांवी
र्येणमन्यसेवीर्यमात्मनः॥सत्वंकापुरुषोमूढःपरांश्चाक्षेप्तुमिच्छसि॥यस्त्वंवृद्धंसर्वराज्ञांहितबुद्धिंजितेन्द्रियं।मरणा
यमहाप्रज्ञंदीक्षयित्वाविकत्थसे।भावस्तेविदितोस्माभिर्दुर्बुद्धेकुलपांसन।नहनिष्यतिगाङ्गेयंपाण्डवोघृणयेतिहि
ऽयस्यवीर्यंसमाश्रित्यधार्तराष्ट्रविकत्थसे।हन्तास्मिप्रथमंभीष्मंमिषतांसर्वधन्विनां।कैतव्यगत्वाभरतान्समेत्यसुयो
धनंधार्तराष्ट्रंवदस्वतथेत्युवाचार्जुनःसव्यसाचीनिशाव्ययायेभवितविमर्दः॥ अनीत्यःप्रयतन्नशक्तियावः
॥राज्ञांमध्येहदं॥ २७५

सत्यसंक्षेनाम्नःद्रोणाद्हतेद्रोणंविनापिकिंतुनदीरणानसाहतिनातार्धिकंनाम्नमधियायाश्रित्यञ्जनिमानस्यस्वगुणानतित
स्पर्ध्यस्यश्चात्मनियतनवसामर्थ्यकोपपारुष्यस्वगुरुक्तिः॥नितुर्यस्यवास्तवपरदोषस्यापिवांवालपस्यपरावज्ञानस्याश्रा
यदोब्रवीत्कृष्णमदीनसत्त्वोमध्येकुरूणांहर्षयन्सत्यसंधः॥अहंहन्तासंजयानामनीकंशाल्वेयकांश्चेतिममैषभारः॥कैतव्यग
त्वानरतान्समेत्यसुयोधनंधार्तराष्ट्रंवदस्व।हन्यामहंद्रोणमृतेपिलोकान्नतेभयविद्यातपाण्डवेभ्यः॥ततोधितन्नतवराज्यं
मापरुताःपाण्डवाश्चेतिनावः॥सदर्पंदृष्ट्वानसमीक्ष्यमेवसमर्थमात्मन्यपिवन्नमानातस्मादहंतत्प्रथमसहदंहंतासमक्ष
कुरुद्दहमेव।सर्वपिदायदुष्कृतमनःवृतोधृष्टद्युम्नोरथीरहत्सत्यसंधःअहंहितःपाञ्चालादीपमतेनाश्वरथात्यातयिष्यामि
बाणौःशीघ्रंतकर्णवनेवाक्यं।विज्ञास्यतिसुयोधनः॥अद्यावितंदारताललनमयाहंदृपितामहदायङ्केश्रसनामध्येपुरुषेष्ठ
स्वस्थानेः॥कुरुस्वेतिनामसमितिहत्वातिक्रमणास्यवाचधर्मंसोनित्यविरोधिपापबुद्धिंद्वयसकृत्।समस्यापतितामविराडस्यःस्यैसे
तामुयोधनोःश्रनिमानस्यदर्पस्यक्रोधपारुष्यासस्तया।निष्ठुर्यस्यावलेपस्यश्चात्मसंभावनस्यचाधदशामतायाःस्तेरणस्यध
र्मविद्वेषणस्यचाश्रधर्मस्यापवादस्यवृद्धातिक्रमणास्यच।दर्शनस्यचवक्रस्यरुजश्चास्येवानयस्यच॥इत्यासेवफलंतीव
मचिराद्वोयोधनोवासुदेवेहितायहिमयिक्रुद्धेनराधमाचाशान्तिजीवितद्दराज्यवीकृतदिन्नम्॥

त्यसंभवनस्यानकुलगुणारोपस्यरुधशामतायाहिमातापाः॥तेद्वयस्यपरदोषोत्पादनस्याश्चतिवादस्यमान्येषुसंमानानाद्रघान
स्यचवक्रास्युतक्तविपरीतमाहिराः॥

ज्ञां तन्माभूत्तथा द्रोणोऽस्त्रतेजेन पातितः निराशो जीवितराज्ये तु त्वत्र युद्धं चरन्विष्यसि । त्वां हत्वा निधनं युधि वा सत्राणां
च सुयोधनात्मामसेनेन निहतोऽकृत्वा निस्पृष्यसि । न द्वितीयां प्रतिज्ञां हि प्रतिजानामि केशव । सत्यं ब्रवीम्यहं देव
सर्वमेतच्च भविष्यति । युधिष्ठिरापि कैतव्यमुलूकमिदमब्रवीत् । उलूक मद्वचो ब्रूहि गत्वा तात सुयोधनं । स्वेन वृत्तेन
मे वृत्तं नाधिगंतुं त्वमर्हसि । उभयोरंतरं वेद सूनृतानृतयोरपि । न चाहं कामये पापमपि कीटपिपीलयोः । किं तु न
ज्ञातिषु वधं कामये दुःकथंचन । एतदर्थं मया तात पंच ग्रामा वृता पुरा । कथं तव सुदुर्बुद्धे न प्रेक्षे व्यसनं महत् । स त्वं का
मपरीतात्मा मूढभावाच्च कत्थसे । तथैव वासुदेवस्य न गृह्णासि हितं वचः । किमिदानीं बहूक्तेन युध्यस्व सह बांधवैः
मम विप्रियकर्तारं कैतव्य ब्रूहि कैतव । श्रुतं वाक्यं गृहीतोऽर्थो मतं यत्ते तथास्तु तत् । भीमसेनस्ततो वाक्यं भूय प्याह दुर्
पात्मजे । उलूक मद्वचो ब्रूहि दुर्मतिं पापपूरुषं । शठं नैकृतिकं पापं दुराचारं सुयोधनं । गृध्रोदरे वा वस्तव्यं पुरे वा नाग
साह्वये । प्रतिज्ञातं मया यच्च सभामध्ये नराधम । कर्ता तदहं तत्सत्यं सत्येनैव शपामि ते । दुःशासनस्य रुधिरं हत्वा पा
स्याम्यहं मृधे । सक्थिनी तव भंक्त्वैव हत्वा हि तव सोदरान् । सर्वेषां धार्तराष्ट्राणामहं मृत्युः सुयोधन । सर्वेषां राजपु
त्राणामभिमन्युरसंशयं । कर्मणा तोषयिष्यामि भूयश्चैव वचः शृणु । हत्वा सुयोधन त्वां हि सहितं सर्वसोदरैः ॥ २७१

ष्या कृमिभ्यः पदानुगैः । धर्मराजस्य पश्यतः । नकुलस्तु ततो वाक्यमिदमाह महीपते । उलूक ब्रूहि कैतव्यं धार्तराष्ट्रं सु
योधनं । श्रुतं ते गदतो वाक्यं सर्वमेव यथातथं । यथा कत्थसि कौरव्य यथावः मत्तशासि मे । सहदेवोऽपि नृपत इद
माह वचोऽर्थवत् । दुर्योधन मतिर्या ते वृथैषा तव भविष्यति । शोचिष्यसि महाराज सपुत्रज्ञातिबांधवः । इमं च क्लेशमस्म
स्माकं हृष्टो यत्त्वं विकत्थसे । विराटद्रुपदौ वृद्धावुलूकमिदमूचतुः । दासभावं नियच्छेव साधोरिति मतिः सदा । तौ च दा
सौ वदासौ वा पौरुषं यस्य यादृशं । शिखंडी च ततो वाक्यमुलूकमिदमब्रवीत् । वक्तव्यो भवता राजा पापेष्वभिरतः सदा । प
श्य त्वं मां रणे राजन् कुर्वाणं कर्म दारुणं । यस्य वीर्यं समासाद्य मन्यसे विजयं युधि । तमहं पातयिष्यामि रथात्तव पितामहं
। ब्रूहि त्वं पांचाल्यपुत्रो हंतव्यश्चा महात्मना । सोऽहं तोषं करिष्यामि निघ्नतां सर्वधन्विनां । धृष्टद्युम्नोऽपि कैतव्यमुलूकमिद
मब्रवीत् । सुयोधनो मम वचो वक्तव्यो नृपतेः सुतः । अहं द्रोणं हनिष्यामि सगणं सह बांधवैः । कर्ता चाहं तथा कर्म यथा ना
न्यः करिष्यति । तमब्रवीद्धर्मराजः कारुण्यं वचो महत् । नाहं ज्ञातिवधं राजन् कामये वै कथंचन । तवैव दोषाद्दुर्बुद्धे
सर्वमेतत्त्वमागतं । अवजप्यं महाकार्य्यं सर्वेषां यदि तं मतं । सुगच्छ मा चिरं तात उलूक यदि मन्यसे । इह वा तिष्ठ
भद्रं ते यद्वि तव बांधवाः । उलूकस्तु ततो राजन् धर्मपुत्रं युधिष्ठिरं । आमंत्र्य प्रययौ तेत्र यत्र राजा सुयोधनः । उलूकस्ततो

उष्ट्रवामीत्रुष्टसुक्रोरथः॥ यात्मानुतत॥ ॥इत्युलूकयानं॥

उद्योग गम्य दुर्योधनमब्रवीत्। अर्जुनस्य समादेशं यद्युक्तं वाक्यमब्रवीत्। कितवस्य वचस्तस्य वाक्यं निशम्य भरतर्षभ। दुःशासनं च कर्णं च श
कुनिं चापि भारत। आज्ञापयत राजेन्द्र बलं मित्रबलं तथा। यथा प्रागुदयात्सर्वा युक्ता तिष्ठत्यनीकिनी। ततः कर्णसमादिष्टा दू
ताः संचरिता रथैः। उष्ट्रवामीभिरप्यन्ये सदश्वैश्च महाजवैः। तूर्णं परिययुः सेनां कृत्स्नां कर्णस्य शासनात्। आज्ञापयत
२ यात २ राजेन्द्र योगः प्रागुदयादिति॥ ॥इत्युद्योगपर्वणि उलूकयानं समाप्तं॥ ॥संजय उवाच॥ ॥उलूकस्य वचः श्रुत्वा कुन्तीपुत्रो युधि
ष्ठिरः। सेनां निर्यापयामास धृष्टद्युम्नपुरोगमां। पदातिनीं नागवतीं रथिनीमश्ववृन्दिनीं। चतुर्विधबलां भीमामकंप्यां पृथिवीमि
व। भीमसेनादिभिर्गुप्तां सार्जुनैश्च महारथैः। धृष्टद्युम्नवशां दुर्गां सागरस्तिमितोपमां। तस्यास्त्वग्रे महेष्वासः पाञ्चाल्यो यु
द्धदुर्मदः। द्रोणप्रेप्सुरनीकानि धृष्टद्युम्नो व्यकर्षत। यथाबलं यथोत्साहं रथिनः समुपादिशत्। अर्जुनं सूतपुत्राय भीमं दु
र्योधनाय च। धृष्टकेतुं च शल्याय गौतमायोत्तमौजसं। अश्वत्थाम्ने च नकुलं शैब्यं च कृतवर्मणे। सैन्धवाय च वार्ष्ण
यं युयुधानं समादिशत्। शिखण्डिनं च भीष्माय प्रमुखं समकल्पयत्। सहदेवं शकुनये चेकितानं शलाय च। द्रौपदेयां
स्तथा पंच त्रिगर्तेभ्यः समादिशत्। वृषसेनाय सौभद्रं शेषाणां च महीक्षितां। समर्थं तं हि मेने वै पार्थादभ्यधिकं २७२

इष्वस्त्रकृत्कारणाधन्त्याह संहृत इति राज॥ नेमिलिकायो व्यवात्॥ ममात्र दत्तं चेतनाह। श्रुत्वा तामेव ओपस्थितास्
रणे। एवं विभज्य सर्वांस्तान् पृथक् च सह चैव हि। ज्वालावर्णो महेष्वासो द्रोणमंशमकल्पयत्। धृष्टद्युम्नो महेष्वासः सेनाप
तिपतिस्ततः। विधिवद्व्यूह्य मेधावी युद्धाय धृतमानसः। यथादिष्टान्यनीकानि पाण्डवानामयोजयत्। जयाय पाण्डुपु
त्राणां यत्तस्तस्थौ रणाजिरे॥ ॥इति महाभारते उद्योगपर्वणि॥ ॥धृतराष्ट्र उवाच॥ ॥प्रतिज्ञाते फाल्गुनेन वधे
भीष्मस्य संजय। किमकुर्वत मे मन्दाः पुत्रा दुर्योधनादयः॥ हतमेव हि पश्यामि गाङ्गेयं पितरं रणे। वासुदेवसहायेन पा
र्थेन दृढधन्वना। स चापरिमितप्रज्ञस्तच्छ्रुत्वा पार्थभाषितं। किमुक्तवान्महेष्वासो भीष्मः प्रहरतां वरः। सेनापत्यं च संप्रा
प्य कौरवाणां धुरंधरः। किमचेष्टत गाङ्गेयो महाबुद्धिपराक्रमः॥ ॥वैशम्पायन उवाच॥ ततस्तत्संजयस्तस्मै सर्वमे
व न्यवेदयत्। यथोक्तं कुरुवृद्धेन भीष्मेणामिततेजसा॥ ॥संजय उवाच॥ सेनापत्यमनुप्राप्य भीष्मः शान्तनवो नृ
प। दुर्योधनमुवाचेदं वचनं हर्षयन्निव॥ नमस्कृत्य कुमाराय सेनान्ये शक्तिपाणये। अहं सेनापतिस्तेऽद्य भविष्यामि
न संशयः। सेनाकर्मण्यभिज्ञोऽस्मि व्यूहेषु विविधेषु च। कर्म कारयितुं चैव भृतानप्यभृतांस्तथा। यात्रायानेषु च
युद्धेषु तथा प्रशमनेषु च। भृशं वेद महाराज यथा वेद बृहस्पतिः। तैरहं मोहयिष्यामि पाण्डवांश्चैव तत्त्वतः॥

पात्राया घयारण॥ यानैरथादो॥

न ह्यस्य पारेः पासस्य स्वर्गस्य प्रशमने श्रीकारः ॥ अतिरथानां संख्यां ॥ कृतपद्दरणां कृतं तत्त्वतः ॥ संदत्तो राज्ञस्तु संवा रानि स्त्राः ॥

मोऽहं याम्यामि तान्त्वन पालयं स्तव वाहिनीं ॥ यथा व्क्षास्त्व तात राजञ्छेवात्मा न साऽध्वरः ॥ ॥दुर्योधन उवाच॥ विद्य
तामनघा गयनयं देवासुरयपि ॥ समस्तस्तु महाबाहो सत्यमेतद्भवामिते ॥ किंतु नस्त्वयि दुर्धर्ष सेनापत्येव स्थितो द्रोण
व तुरुषव्याघ्र स्थितस्तु दावि वेदिति ॥ नवज्ञां तुरुषाग्र्यान्यां स्थितान्यां विजयाम ममीन दर्शनं कुरुश्रेष्ठ देवाज्यमविकवं
॥रथसंख्यां तु कार्त्स्न्येन परेषामात्मनस्तथा ॥ तथैवातिरथानां च वक्तुमिच्छामि कौरव ॥ पितामहो हि कुशलः सर्वेषामा
त्मनस्तथा ॥ श्रोतुमिच्छाम्यहं सार्धमेभिः सह वसुधाधिपैः ॥ ॥भीष्म उवाच॥ गांधारस्य शृणु राजेंद्र रथसंख्यां स्वके बले ये
रथाः स्थिरा पालतथैवातिरथाश्च ये ॥ बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ॥ रथानां तव सेनायां यथामुख्यं तु मम
शृणु भवानग्ररथोदारः सह सर्वैः सहोदरैः ॥ दुःशासनप्रभृतिभिर्भ्रातृभिः शतसंमितैः ॥ सर्वे कृतप्रहरणाश्छेद्यच्छेदवि
शारदाः ॥ रथोपस्थे गजस्कंधे गदाप्रासासिचर्मणि ॥ संयंतारः प्रहर्तारः कृतास्त्रा भारसाधनाः ॥ इष्वस्त्रे द्रोणशिष्याश्च कृ
पस्य च शरद्वतः ॥ एते हनिष्यन्ति रणे पांचालान् युद्धदुर्मदान् ॥ कृतकिल्बिषाः पांडवेयैर्धार्तराष्ट्रा मनस्विनः ॥ तथाहं भरतश्रे
ष्ठ सर्वसेनापतिस्तव ॥ शत्रून् विध्वंसयिष्यामि कदर्थीकृत्य पांडवान् ॥ न त्वात्मनो गुणान् वक्तुमर्हामि विदितोऽस्मि ते ॥ कृतवर्मा त्व २७३

उग्र्यं तवा रथवंशो रथपरंपरायां ॥

तिरथो भोजः शस्त्रभृतां वरः ॥ अर्थसिद्धिं तव रणे करिष्यति न संशयः ॥ शस्त्रविद्भिरनाधृष्यो दूरपाती दृढायुधः ॥ हनिष्यति च
शत्रूंस्ते महेंद्रो दानवानिव ॥ मद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः ॥ स्पर्धते वासुदेवेन नित्यं यो वै रणे रणे ॥ भागिनेयान्
निजांस्त्यक्त्वा शल्यस्ते तु रथो मतः ॥ एष योत्स्यति संग्रामे कृष्णं चक्रगदाधरं ॥ सागरोर्मिसमैर्बाणैः प्लावयन्निव श
त्रवान् ॥ भूरिश्रवाः कृतास्त्रश्च तव चापि हितः सुहृत् ॥ सौमदत्तिर्महेष्वासो रथयूथपयूथपः ॥ बलक्षयममित्राणां सु
महांतं करिष्यति ॥ सिंधुराजो महाराज रथो द्विगुणो रथः ॥ योत्स्यते समरे राजन् विक्रांतो रथसत्तमः ॥ द्रौपदीहरणे राजन्
परिक्लिष्टः पांडवैः ॥ संस्मरंस्तं परिक्लेशं योत्स्यते परवीरहा ॥ एतेन हि तदा राजंस्तप उग्रं सुदारुणं ॥ सुदुर्लभो वरो लब्धः
पांडवान् योद्धुमाहवे ॥ स एष रथशार्दूलस्तद्वैरं संस्मरन् रणे ॥ योत्स्यते पांडवैस्तात प्राणांस्त्यक्त्वा सुदुस्त्यजान् ॥
इ॥ उद्योग॰ रथातिरथसंख्यायां ॥ ॥भीष्म उवाच॥ ॥सुदक्षिणस्तु कांबोजो रथ एकगुणो मतः ॥ तवार्थसि
द्धिमाकांक्षन् योत्स्यते समरे परैः ॥ एतस्य रथसिंहस्य तवार्थे राजसत्तम ॥ पराक्रमं यथेंद्रस्य द्रक्ष्यंति कुरवो र
णे ॥ एतस्य रथवंशो हि तिग्मवेगप्रहारिणः ॥ कांबोजानां महाराज शलभानामिवायतिः ॥ नीलो माहिष्मती
वासी नीलवर्मा रथस्तव ॥ रथवंशेन कदनं शत्रूणां वै करिष्यति ॥ कृतवैरः पुरा चैव सहदेवेन मारिष योत्स्य
ते सततं राजंस्तवार्थे कुरुनंदन ॥ विंदानुविंदावावंत्यौ समेतौ रथसत्तमौ ॥ कृतिनौ समरे तात दृढवीर्यपराक्रमौ

गंगांवागंगामिव।रथौ तौ नातिरथौ वि निश्चकुमारौ विदितस्तु॥

उद्योग ।एतौ तौ पुरुषव्याघ्रौ रिपुसैन्यं प्रधक्ष्यतः।गदाप्रासासिनाराचैस्तोमरैश्च करच्युतैः॥युद्धाभिकामौ समरे
क्रीडंतौ विचरिष्यतः मध्ये महाराज विचरंतौ कृतांतवत्।त्रिगर्ता भ्रातरः पंच रथोदारा मता मम।कृतवैरास्तु पार्थे
स्तु विराटनगरे तदा।मकरा इव राजेंद्र समुद्धततरंगिणीं।गंगां विक्षोभयिष्यंति पार्थानां युधि वाहिनीं॥ते रथाः पंच
राजेंद्र सत्यरथमुखास्तथा॥ यथा सत्यरथाः पूर्वं।एते योत्स्यंति संग्रामे संस्मरंतः पुराकृतं।व्यलीकं पांडवेयेनाम
सिनानुजेन ह दिशो विजयता राजञ्श्वेतवाहेन भारत।ते हनिष्यंति पार्थानां तानासाद्य महारथान्॥ वरान्वरान्महे
ष्वासान् क्षत्रियाणां धुरंधरान्।लक्ष्मणस्तव पुत्रस्तु तथा दुःशासनस्य च।उभौ तौ पुरुषव्याघ्रौ संग्रामेष्वपला
यिनौ।तरुणौ सुकुमारौ च राजपुत्रौ तरस्विनौ।युद्धानां च विशेषज्ञौ प्रणेतारौ च सर्वशः।रथौ तौ कुरुशार्दूल
मतौ मम रथसत्तमौ।क्षत्रधर्मरतौ वीरौ महत्कर्म करिष्यतः।दंडधारो महाराज रथ एको नरर्षभ।योत्स्यते तव
संग्रामे स्वेन सैन्येन पालितः॥बृहद्बलस्तथा राजा कौशल्यो रथसत्तमः।रथो मम मतस्तात महावेगपराक्र
मः॥एष योत्स्यति संग्रामे स्वान्बंधूनचयन्रणे।उग्रायुधो महेष्वासो धार्तराष्ट्रहिते रतः।एष राजा कृपः शारद्वत
रथयूथपयूथपः॥ रूपः शारद्वता राजन्रथयूथपयूथपः॥

२७४

वाणान्परित्यज्य त्वेषु निर्ममोचत्वा।एतस्यासेन्याःसेनासमवेताः॥संवृतोऽमनामिनामितिश्रोर्षः श्रर्षःसंधिः॥ऋषीणां

प्रियान्ब्राह्मणान्परित्यज्य प्रधक्ष्यति रिपूंस्तव।गौतमस्य महर्षेर्य आचार्यस्य शरद्वतः।कार्तिकेय इवाजेयः शरस्तं
बाज्जातोऽनवत्।एष सेनां सुबहुलां विविधायुधकार्मुकां॥ प्रमिवत्समरतातचरिष्यति विनिर्दहन्॥ ॥इत्युद्यो
गे रथातिरथसंख्यायां॥ ॥भीष्म उवाच॥ ॥शकुनिर्मातुलस्तेऽसौ रथ एको नराधिप।प्रसृज्य पांडवैर्वैरं योत्स्य
ते नात्र संशयः।एतस्य सैन्या दुर्धर्षाः समरेऽप्रतियायिनः॥विकृतायुधभूयिष्ठा वायुवेगसमाजवाः॥द्रोणपुत्रो म
हेष्वासः सर्वानत्यतिधन्विनः।समरे चित्रयोधी च दृढास्त्रश्च महारथः॥एतस्य हि महाराज यथा गांडीवधन्वनः
शरासनविनिर्मुक्ताः संसक्ता यांति सायकाः॥नैष शक्यो महावीरः संख्यातुं रथसत्तमः॥निर्दहेदपि लोकांस्त्रीनिच्छ
न्नेष महारथः॥क्रोधस्तेजश्च तपसा संभृतोऽश्रमवासिना।द्रोणेनानुगृहीतश्च दिव्यैरस्त्रैरुदारधीः॥दोषस्त्वस्य महा
नेको येनैष भरतर्षभ।नाम रथो नाप्यरथो मतः पार्थिवसत्तम।जीवितं प्रियमत्यर्थमायुष्कामः सदा द्विजः॥न
ह्यस्य सदृशः कश्चिदुभयोः सेनयोरपि।हन्यादेकरथेनैव देवानामपि वाहिनीं।वपुष्मांस्तलघोषेण स्फोटयेदपि पर्वता
न्।असंख्येयगुणो वीरः प्रहर्ता दारुणद्युतिः।दंडपाणिरिवासह्यः कालवत्प्रचरिष्यति

क्रोधात्तेजसा समुद्रायोयमित्यर्षिः।जीवितः प्राणास्तद्धारणकालश्चास्य॥

सिंहः॥ग्राकः॥कौवोमीतः॥हृष्टरूपाह्यमी॥संग्रामयिष्यति संरणेष्यति ज्ञाविवित्रियव्रता॥आचार्यकमाचार्य्यवांदीसो
उद्योग पुगांतानिरिवक्रोधसिंहः॥कौयामहाद्युतिः॥एषनारतयुद्धस्यहृष्टसंग्रामयिष्यति॥पितास्यमद्रा॥तनाहवेविसु
वतिवृत्तिःरणेकर्म्ममहत्करवन्निरेमेना॥मिसयायः॥श्रसेविगानिलाहतःसनाकहंश्वताविताः॥पाडुवत्रस्यासेत्या॥ति
वधस्यतिरणेधृतः॥रथयूथपयूथानांयूथपोयंनरर्षभः॥नरराजात्मजः कर्त्ता किमतीव दितं तव॥सर्वशर्वानिपिको
नामाचार्यःस्वविराडुकः॥गाण्डिवंतसंजयाना॥ऊियस्त्रेस धनंजयः॥निषत्ताभमहेष्वासः पार्थमल्लिष्टकारिणां॥हन्या
दाचार्यकं दासंस्मृत्यसुणा निर्जितं॥श्रीह्यातयंमहावीरः पार्थस्यगुणविस्तरैः॥ब्रवीदप्यधिकं चैनं नारक्षातोनुप
स्थति॥हन्याहकराद्यानेषादवगंधर्वमातुपान्॥एकोऽनतानपिरणेदिव्यैरस्त्रैः प्रतापवान्॥पौरवोराजशार्दूल स्ववरा
जन्मसारथः॥मातामसराद्यादारः परवीररथारुजः॥चेन सोन्मतमहताप्रत पेनद्गुवा दिनी॥वधस्यतिमपांचालानकक
सेकुसागतिर्यथा॥सत्यश्रवारथस्त्वेकराजपुत्रो॥हाहरूलः॥तवराजन् रिपुबलकालवत्सचरिष्यति॥एतस्यायाधरा
विदविचित्रकवचा सुधाः॥विचरिष्यतिसंग्रामेनिघ्नतः॥ग्रात्रवांस्तव॥दृषासनोरथश्वस्यापकर्षीउग्रोमहारथः॥सधस्य
तिरिपुणां तबलं तु बलिनां वरः॥जलसंधोमहातेजाराजनरथवरस्तव॥त्यक्ष्यतिसमरप्राणान्मगधसैन्यामहारणां
एषविक्रोतरायाधीववित्रायाधीत्वसंगृाह॥वीतनोश्चापितराजनरथात्तुतिःसहायास्यति॥बाल्हीकोतिरथश्चैवसमर
ष हतं सुगणैस्तुसूपयानिर्जितोऽर्जुनेनानिसुखीकृतं॥ २७५

चानिवर्त्तितःसमराजन्मतोयुदेशरा॥विवस्वानताप्रमः॥वैश्येषसमरंप्राप्यनिवर्त्तेतकथंचन॥यथासतत्रगोराजन्सहिद
न्यास्यरात्रणी॥सेनापतिर्महाराजसत्यवांस्तमहारथः॥रणेष्वद्भुतकर्म्माचरथीपररथारुजः॥एतस्यसमरंदृष्ट्वानव्यथा
स्तिकथंचन॥उत्स्मयन्नुत्पतत्येषपरान्रथपथेस्थितान्॥एषचारिषुविक्रांतःकर्म्मसत्पुरुषोचितं॥कर्त्ताविमर्देयस
मस्त्वदर्थेपुरुषोत्तमः॥अलायुधोराक्षसेन्द्रःक्रूरकर्म्मामहारथः॥हनिष्यतिपरान्राजन्पूर्ववैरमनुस्मरन्॥एषराक्षस
सैन्यानांसर्वेषांरथसत्तमः॥मायावीदृढवैरश्चसमरेविचरिष्यति॥प्राग्ज्योतिषाधिपोवीरोभगदत्तःप्रतापवान्॥गजा
ङ्कुशधरश्रेष्ठोरथेचैवविशारदः॥एतेनयुद्धमभवत्पुरागाण्डीवधन्वनः॥दिवसान्सुबहून्राजन्नुभयोर्जयगृद्धिनोः॥त
तःसखायंगांधारमानयत्पाकशासनं॥अकरोत्संविदंतेनपांडवेनमहात्मना॥एषयास्यतिसंग्रामेगजस्कंध
विशारदः॥ऐरावतगतोराजादेवानामिववासवः॥ ॥इत्युद्योगपर्वणिरथसंख्यायां॥ ॥अचलोवृषकश्चैवभ्रा
तरौचातराकुनेः॥रथौमदकृदराधर्षौशात्रून्विधमिष्यतः॥दृढवेतौनरव्याघ्रौदृढक्रोधौप्रहारिणौ॥गांधारमुख्यौत
रुणौदर्शनीयौमहाबलौ॥सखायोदयितौनित्यंयएषरणकर्कशः॥उत्साहयतिराजंस्त्वांविग्रहेपांडवैःसदा॥परुषः
कत्थनोनीचःकर्णोवैकर्त्तनस्तव॥मंत्रीनेताचबंधुश्चमानीचात्यंतमुच्छ्रितः॥एषनैवरथःपूर्णोनाप्यतिरथोरणे
॥वियुक्तःकवचेनेषसहजेनविचेतनः॥कुंडलाभ्यांचदिव्याभ्यांवियुक्तःसततंघृणी॥अभिशापाच्चरामस्य

ब्राह्मणीस्य यस्य तु त्वाद् न स्त्रिन तस्य चक्र मक्रन शापात् । करणानां कवचानां साधनादीनां । सम्मानस्तु तल्पेषु सक्तु विनेदयि

ब्राह्मणस्य च भाषणात् । करणानां वियोगाच्च तेन मेऽर्धरथो मतः । नैष फाल्गुनमासाद्य पुनर्जीवन्विमोक्ष्यते । ततोऽब्रवीत्त
नद्रोणः सर्वशस्त्रभृतां वरः । एवमेतद्यथात्थ त्वं न मिथ्यास्ति कथंचन । रणे रणेऽभिमानी च विमुखश्चापि दृश्यते । घृणी कर्णः
प्रमादी च तेन मेऽर्धरथो मतः । एतच्छ्रुत्वा तु राधेयः क्रोधादुत्फाल्य लोचने । उवाच भीष्मं राजेन्द्र तुदन्वाग्भिः प्रतोदवत् । पिताम
ह यथेष्टं मां वाक्शरैरुपकृन्तसि । अनागसं सदा द्वेषादेवमेव पदे पदे । मर्षयामि च तत्सर्वं दुर्योधनकृतेन वै । त्वं तु मां
मन्यसे मन्दं यथा कापुरुषं तथा । भवानर्धरथो मह्यं मतो नास्त्यत्र संशयः । सर्वस्य जगतश्चैव गाङ्गेय न मृषा वदे । कुरूणा
महितो नित्यं न च राजावबुध्यते । को हि नाम समानेषु राजसूदात्तकर्मसु । तेजोवधमिमं कुर्याद्विभेदयिषुराहवे । य
था त्वं गुणनिर्देशादपरागं चिकीर्षसि । न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः । महारथत्वं संख्यातुं शक्यं क्षत्रस्य कौ
रव । बलज्येष्ठं स्मृतं क्षत्रं मन्त्रज्येष्ठा द्विजातयः । धनज्येष्ठाः स्मृता वैश्याः शूद्रास्तु वयसाधिकाः । यथेच्छकं स्वकं ग्राहाद्रथान
तिरथांस्तथा । कामद्वेषसमायुक्तो मोहात्प्रकुरुते भवान् । दुर्योधन महाबाहो सम्यगावेक्ष्यताम् । त्यज्यतां दुष्ट

बुद्धिभेदं कर्तुमिच्छुः । सदयस्यानेन बलवन्मा कलयस्व विस्तारात्पाणां मत्तो दौर्बल्यज्ञानेन परित्यागं सेनापतित्वाद्यागाशयः । गुण
निर्देशान्नार्जुनस्यापादाय इति । मोहात् ॥

मौलाः क्रमागताः । सहासं ततं निलंघ्यादेन त्ववाति हृता नाम पाल्यो ॥ धनंजय इष्यतावः । तस्यैव वर्षपूगाचिन्तितः ॥

भावोऽयं भीष्मः किल्बिषकृत्तव । भिन्ना हि सेना नृपते दुःसंधेया भवत्युत । मौला हि पुरुषव्याघ्र किमु नानासमुत्थिता ॥
एषां द्वैधं समुत्पन्नं योधानां युधि भारत । तेजोवधो नः क्रियते प्रत्यक्षेण विशेषतः । रथानां क्व च विज्ञानं क्व च भीष्मोऽल्पचेत
नः । अहमावारयिष्यामि पाण्डवानामनीकिनीम् । आसाद्य माममोघेषुं गमिष्यन्ति दिशो दश । पाण्डवाः सहपाञ्चालाः शार्दू
लं वृषभा इव । क्व च युद्धविमर्दो वा मन्त्राः सुव्याहृताः क्व च । क्व च भीष्मो गतवया मन्दात्मा कालचोदितः । एकाकी स्पर्धते नित्यं स
र्वेण जगता सह । न चान्यं पुरुषं कंचिन्मन्यते मोघदर्शनः । श्रोतव्यं खलु वृद्धानामिति शास्त्रनिदर्शनम् । न त्वेव ह्यतिवृद्धानां पुन
र्बाला हि ते मताः । अहमेको हनिष्यामि पाण्डवानामनीकिनीम् । सुयुद्धे राजशार्दूल यशो भीष्मं गमिष्यति । कृतः सेनापतिस्त्वेष त्व
या भीष्मो नराधिप । सेनापतिं यशो गन्ता न तु योधान्कथंचन । नाहं जीवति गाङ्गेये योत्स्ये राजन्कथंचन । हते तु भीष्मे योद्धास्मि सर्वै
रेव महारथैः ॥ इत्युद्योग० रथातिरथसंख्यायां ॥ ॥ भीष्म उवाच ॥ समुद्यतोऽयं भारो मे सुमहान्पर्वतोपमः । धार्तराष्ट्र
स्य संग्रामे वर्षपूगाभिचिन्तितः । तस्मिन्नभ्यागते काले प्रतप्ते लोमहर्षणे । मिथोभेदो न मे कार्यस्तेन जीवसि सूतज । न त्वहं
द्य विक्रम्य स्थविरोऽपि शिशोस्तव । युद्धश्रद्धां रणे छिन्द्यां जीवितस्य च सूतज । जामदग्न्येन रामेण महास्त्राणि विमुञ्चता । न मे
व्यथाभवत्काचित्त्वं तु मे किं करिष्यसि । कामं नैतत्प्रशंसन्ति सन्तः स्वबलसंस्तवम् । वक्ष्यामि तु त्वां संतप्तो निहीन कुल

पांसना।सामर्त्तंपार्थिवंसर्वंकाशिराजस्वयंवरा।निर्जित्यैकरथेनैवयाःकन्यास्तरसाहृता॥ईदृशानांसहस्राणिविशि
ष्टानामयोधनः।मयैकेननिरस्तानिससैन्यानिरणाजिरे।वांप्राप्यविरुद्धरूपंकुरूणामनयामहान्।उपस्थितोविना
शाययतस्वसुरूपोनवा।युध्यस्वसमरेपार्थयेनत्वविस्पर्द्धसेमहद्।हत्यामिचांविनिर्मुक्तमस्याहुताःखुर्मते।नचवाचत
ता राजाधर्म्मैराष्ट्रःसतापवान्।मांसमीक्ष्यस्वगांगायकार्य्यविद्मदद्धृतं।चिंत्यतामिदमकार्यममतिःश्रेयसंपरं।उभा
वपिनवेतोममदकम्मकरिष्यतः।स्त्रयस्थाप्याउमिवामिपार्थिवांस्थसमानमान्।यथैवातिरथास्तत्रयथैवरथहायथाः
।बलाबलममित्राणांश्रोतुमिच्छामिकौरव।प्रभातायांरजन्यांविड्ंदूयुद्धंभविष्यति॥ ॥भीष्मउवाच॥ एतेरथास्तवा
ख्यातास्त्वायथैवातिरथाश्चये।यचाप्यर्द्धरथाराजन्पांडवानामतःशृणु।यदिकौतूहलंतेद्यपांडवानांबलेनृप।रथसं
ख्यांशृणुष्वत्वंसहैभिर्वसुधाधिपैः।स्वयंराजारथोदारःपांडवःकुंतिनंदनः।अग्निवत्समरेतातचरिष्यतिनसंशयः।भी
मसेनस्तुराजेंद्ररथोष्टगुणसंमितः।नागायुतबलोमानीतेजसानसमानुषः।माद्रीपुत्रोचरथिनौनौचाविवपुरुषर्षभौ
।अश्विनाविवरूपेणतेजसाचसमन्वितौ।एतेचमूमुखगताःस्मरंतःक्लेशमुत्तमं।रुद्रवत्संचरिष्यंतितत्रमेनास्तिसंश
यः।सर्वएवमहात्मानःशालस्कंधाइवोन्नता॥प्रादेशेनाधिकाःपुंसिरन्येस्तेचप्रमाणतः।सिंहसंहननाःसर्वेपांडुपुत्रा



महाबलाः।चरितब्रह्मचर्य्याश्चसर्वेचातितपस्विनः।ह्रीमंतःपुरुषव्याघ्राव्याघ्राइवबलोत्कटाः।जवेप्रहारेसंमर्देसर्वएवा
तिमानुषाः।सर्वैर्जितामहीपालादिग्जयेभरतर्षभ।नचैषांपुरुषाःकेचिदायुधानिगदाःशराः।विषहंतेसदाकर्तुमधि
ज्यान्यपिकौरवोद्यंतवाग्दायुद्धी।शराणांत्वमाद्रवेज्रावलकम्पस्तरणात्तेपांडुविकर्षणे।बालैरपिनवेतात्
:सर्वएवविशारदाः।एतत्केन्यंसमासाद्यसर्वएवबलोत्कटाः।विधःसयिष्यंतिरणमास्मातेःमहसंगमः।एकैकशस्त्वसं
माहेहन्युःसर्वान्महीक्षिताः।प्रत्यक्षंतवराजेंद्रराजसूयययथानवत।द्रौपद्याश्चपरिक्लेशंद्यूतेचपरुषागिरः।तेस्मरंतश्चसं
ग्रामेविचरिष्यंतिरुद्रवत्।लोहिताक्षोगुडाकेशोनारायणसहायवान्॥उभयोःसेनयोर्वीरारथोनास्तीतितादृशः।नहि
देवेषुवादेवंमनुष्येष्वरगेषुवा।राक्षसमेष्वथयक्षेषुनरेषुकुतएवतु।भूतोथवाभविष्योवारथःकश्चिन्मयाश्रुतः।समा
युक्तोमहाराजरथःपार्थस्यधीमतः।वासुदेवश्चसंयंताधाविधनंजयः।गांडीवंचधनुर्दिव्यंतेचाश्वावातरंहसः।अभे
द्यकवचंदिव्यमक्षय्योचमहेषुधी।अस्त्रग्रामश्चमाहेंद्रोरोद्रकौबेरएवच।याम्यश्चवारुणश्चैवगदाश्चोग्रप्रदर्शना॥

नानाप्रहरणे।समायुक्तःउपकरणैर्दिव्यैःसमक्षःसमायुक्तोरथादिभिः।मत्त॥

सहसंवोगःसहितैर्येरुपलक्षितानां॥

उद्योग। वृन्दारीनिचयस्थ्यानिनानाथहरणानि वै। दानवानांसहस्राणि हिरण्यपुरवासिनां। हतान्येकरथेनाजौ कस्तस्य स
दृशोरथः॥ एष हन्ता हि संरंभी बलवान्सत्यविक्रमः। न वक्ष्यामि महाबाहुः स्वान्विपक्षान्पालयन्। अहं विनेष्ये हि यथा चा
त्याबाधनंजयो नदती त्यास्थिरा जिडासनत्यारुत्यापारपि। यएतं शरवर्षाणि वर्षतस्तु दिव्यायुधो। श्रीकृत्स इव वर्म्माणि महावात उ
समीरितः॥ समायुक्तरथो कोन्तयो वासुदेवसहायवान्॥ तरुणश्च कृती चैव जीर्णा वावामुभावपि॥ वैशंपायन उवाच॥ ॥
एतच्छ्रुत्वा तु भीष्मस्य राज्ञां दध्मिरे तदा कांचनांगदिनः पीनाद्भुजाश्चंदनरूषिताः। मनोभिः सहसंवेगैः संस्मृत्य वै पुरातनाम्सा
मर्थ्यं पांडवानां यथा प्रत्यक्षदर्शनात्॥ ॥इत्युद्योगपर्वणि रथातिरथसंख्यायां॥ ॥भीष्म उवाच॥ द्रौपदेयामहाराजस
र्वे पंच महारथाः। वैराटिरुत्तरस्त्वेष रथो दाराममतो मम। अभिमन्युर्महाबाहू रथयूथपयूथपः। समः पार्थेन समरे
वासुदेवेन वारिहा। लघ्वस्त्रश्चित्रयोधी च मनस्वी च दृढव्रतः। संस्मरन्वै परिक्लेशं स्वपितुर्विक्रमिष्यति। सात्यकिर्माधवः शू
रो रथयूथपयूथपः। एष वृष्णिप्रवीराणाममर्षी जितसाध्वसः। उत्तमौजास्तथा राजन्रथो मह्यं मतो मम। एतेषां बहु
साहस्रा रथा नागा हयास्तथा। यास्यंति ते तनुं त्यक्त्वा कुंतीपुत्रप्रियेप्सया। पांडवैः सह राजेंद्र तव सेनासु भारत॥ अ
ग्निमारुतवद्राजन्नाह्वयंतः परस्परं। अजेयौ समरे वीर विराटद्रुपदौ तथा। महारथौ महावीर्यौ मतौ मे पुरुषर्ष
भौ।

एकायनगतावेतावस्मानस्तौ पांडवाद्रुपती। वृत्तायं संप्रत्ययं पांडवानां स्वस्मिन्नारायत्। सर्वं संस्थितिं सर्वस्मिन्सहसंस्थानं॥ ॥

वयोवृद्धावपि हितौ क्षत्रधर्मपरायणौ। यतिष्येते परं शक्त्या स्थितौ वीरगतपथिकी। संबंधकेन राजेंद्र तौ वीर्यबलान्व
यात्। आर्यवृत्तौ महेष्वासौ स्नेहवीर्यसितावुभौ। कारणं प्राप्य तु नराः सर्व एव महाभुजाः। शूरा वा कातरा वापि भवंति कु
रुपुंगव। एकायनगतावेतौ पार्थिवौ दृढधन्विनौ। प्राणांस्त्यक्त्वा परं शक्त्या घटितारौ परंतप। पृथगक्षौहिणीभ्यां ताव
भौ संयति दारुणौ। संबंधिभावं रक्षंतौ महत्कर्म करिष्यतः। लोकवीरौ महेष्वासौ त्यक्तात्मानौ च भारत। प्रत्ययं परि
रक्षंतौ महत्कर्म करिष्यतः॥ ॥इत्युद्योगपर्वणि रथातिरथसंख्यायां॥ ॥भीष्म उवाच॥ ॥पंचालराजस्य सुतो राजन्पर
पुरंजयः। शिखंडी रथमुख्यो मे मतः पार्थस्य भारत। एष योत्स्यति संग्रामे नाशयन्पूर्वसंस्थितिं। परं यशो विप्रथयंस्तव
सेनासु भारत। एतस्य बहुलाः सेनाः पंचालाश्च प्रभद्रकाः। तेनासौ रथवंशेन महत्कर्म करिष्यति। धृष्टद्युम्नश्च सेना
नीः सर्वसेनासु भारत। मतो मेऽतिरथो राजन्द्रोणशिष्यो महारथः। एष योत्स्यति संग्रामे सूदयन्वै परान्रणे। भगवानि
व संक्रुद्धः पिनाकी युगसंक्षये। एतस्य तद्रथानीकं कथयंति रणप्रियाः। बहुत्वात्सागरप्रख्यं देवानामिव संयुगे। क्षत्र
धर्मा तु राजेंद्र मम तोऽर्धरथो नृप। धृष्टद्युम्नस्य तनयो बाल्यान्नातिकृतश्रमः। शिशुपालसुतो वीरश्चेदिराजो महारथः

महद्बलं। यवीयमस्तरुणाद्याम्याति॥ ॥

अविमृश्यमत्तोऽसहत्वंक्रुद्धात्त्वयथासंमन्यात्तमप्यक्रमन्मात॥
धृष्टकेतुर्महेष्वासःसंबंधीपांडवस्यह।एषचेदिपतिःशूरःसहपुत्रैर्महारथः।महारथानांसुकरंमहत्कर्मकरिष्यति॥
क्षत्रधर्मरतोमह्यंमतःपरपुरंजयः।क्षत्रदेवस्तुराजेंद्रपांडवेषुरथोत्तमः।जयंतश्चामितौजाश्चसत्यजिच्चमहारथः।म
हारथामहात्मानःसर्वेपांचालसत्तमाः॥योत्स्यंतेसमरेतातसंरब्धाइवकुंजराः।अजोभोजश्चविक्रांतौपांडवार्थेमहा
रथौ।योत्स्यतस्तौबलिनौशूरौपरानीकंक्षपयिष्यतः।शीघ्रास्त्राश्चित्रयोधाश्चकृतिनोदृढविक्रमाः।सर्वेचैवरथोदाराःस
र्वेलोहितकध्वजाः।काशिकःसुकुमारश्चनीलोयश्चापरोनृपः।सूर्यदत्तश्चशंखश्चमदिराश्वश्चनामतः।सर्वएतेरथोदाराःसर्वेचा
हवलक्षणाः।सर्वेबाहुबलक्षणाः।सर्वास्त्रविदुषःसर्वेमहात्मानोमतामम।वार्धक्षेमिर्महाराजमतोममहारथः।चि
त्रायुधश्चनृपतिर्मतोमेरथसत्तमः।सहिसंग्रामशोभीचभक्तश्चापिकिरीटिनः।चेकितानःसत्यधृतिःपांडवानांमहारथौ
द्वावेतौपुरुषव्याघ्रौरथोदारौमतौमम।व्याघ्रदत्तश्चराजेंद्रचंद्रसेनश्चभारत।मतौममरथोदारौपांडवानांनसंश
यः।सेनाबिंदुश्चराजेंद्रक्रोधहंताचनामतः।यःसमोवासुदेवेनभीमसेनेनवाविभो।सयोत्स्यतिहिविक्रम्यसमरेतव
सैनिकैः।मांचद्रोणंकृपंचैवयथासंमन्यतेनृप।तथासमरश्लाघीमंतव्योरथसत्तमः।काश्यःपरमशीघ्रास्त्रः
श्लाघनीयोनरोत्तमः।रथएकगुणोमह्यंज्ञेयःपरपुरंजयः।अयंचयुधिविक्रांतोमंतव्योष्टगुणोरथः।सत्यजित्सम



रश्लाघीद्रुपदस्यात्मजोयुवा।गतःसोतिरथत्वंहिधृष्टद्युम्नेनसंमितः।पांडवानांयशस्कामःपरंकर्मकरिष्यति।अनु
रक्तश्चशूरश्चरथोयमपरोमहान्।पांड्यराजोमहावीर्यःपांडवानांधुरंधरः।दृढधन्वामहेष्वासःपांडवानांमहारथः।श्रेणि
मान्कौरवश्रेष्ठवसुदानश्चपार्थिवः।उभावेतावतिरथौमतौपरपुरंजय॥ ॥इत्युद्योगपर्वण्यतिरथसंख्यायां॥ ॥
भीष्मउवाच॥ ॥रोचमानोमहाराजपांडवानांमहारथः।योत्स्यतेमरवत्संख्येपरसैन्येषुभारत।पुरुजित्कुंतिभो
जश्चमहेष्वासोमहाबलः।मातुलोभीमसेनस्यसचमेतिरथोमतः।एषवीरोमहेष्वासःकृतीचनिपुणश्चह।चित्रयोधीच
शक्तश्चमतोमेरथपुंगवः।सयोत्स्यतिहिविक्रम्यमघवानिवदानवैः।योधाश्चास्यपरिख्याताःसर्वेयुद्धविशारदाः।भा
गिनेयकृतेवीरःसकरिष्यतिसंगरे।सुमहत्कर्मपांडूनांस्थितःप्रियहितेरतः।भैमसेनिर्महाराजहैडिंबोराक्षसेश्वरः
मतोमेबहुमायावीरथयूथपयूथपः।योत्स्यतेसमरेतातमायावीसमरप्रियः।येचास्यराक्षसावीराःसचिवा
वशवर्तिनः।एतेचान्येचबहवोनानाजनपदेश्वराः।समेताःपांडवस्यार्थेवासुदेवपुरोगमाः।एतेप्राधान्यतोरा
जन्पांडवस्यमहात्मनः।रथाश्चातिरथाश्चैवयेचान्येर्धरथाःस्मृताः।नेष्यंतिसमरेसेनांभीमांयौधिष्ठिरींनृप।महेंद्रेणे
ववीरेणपाल्यमानांकिरीटिना।तैरहंसमरेवीरमायाविद्भिर्जयैषिभिः।योत्स्यामिजयमाकांक्षन्नथवानिधनंर

इतिरथातिरथसंख्या॥ महारथा

उद्योग ण। वासुदेवं च पार्थं च चक्रं गांडीवमेव च॥ संध्यागतौ विवार्केंदू समेष्ये ऽतिरथान्नामो। ये चैवातिरथोदाराः पांडुपुत्र
स्य सैनिकाः॥ सहसैन्यानहं तान्वै प्रतीयां रणमूर्धनि॥ एते रथाश्चातिरथाश्च तिरथाश्च यथाप्रधानं तव पकीर्तिता मया॥ तथाप
रायर्धरथाश्च केचित्। ये चैव तेषामपि कौरवेंद्र॥ अर्जुनं वासुदेवं च ये चान्ये तत्र पार्थिवाः॥ सर्वांस्तान्वारयिष्यामि यावद्द्र
क्ष्यामि भारत॥ पांचाल्यं तु महाबाहो नाहं हन्यां शिखंडिनं॥ उद्यतेषुमथो दृष्ट्वा प्रतियुध्यंतमाहवे॥ लोकस्तद्वेद यदहं पितुः प्रि
यचिकीर्षया। प्राप्तं राज्यं परित्यज्य ब्रह्मचर्ये व्यवस्थितः॥ चित्रांगदं कौरवाणामधिपत्ये भ्यषेचयं॥ विचित्रवीर्यं च शिशुं यौवरा
ना ज्येभ्यषेचयं॥ देवव्रतत्वं विख्याप्य पृथिव्यां सर्वराजसु॥ नैव हन्यां स्त्रियं जातु न स्त्रीपूर्वं कदाचन॥ स हि स्त्रीपूर्वको राजन् शि
खंडी यदि ते श्रुतः॥ कन्या भूत्वा पुमाञ्जातो न योत्स्ये तेन भारत॥ सर्वांस्त्वन्यान्हनिष्यामि पार्थिवान्भरतर्षभ॥ यान्स
मेष्यामि समरे न तु कुंतीसुतान्नृप॥ ॥इत्युद्योगे रथातिरथसंख्या समाप्ता॥ ॥दुर्योधन उवाच॥ किमर्थं भरतश्रे
ष्ठ नैव हन्याः शिखंडिनं॥ उद्यतेषुमथो दृष्ट्वा समरेष्वाततायिनं॥ पूर्वमुक्त्वा महाबाहो पांडवान्सह सोमकै
ः॥ हनिष्यामीति गांगेय तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥शृणु दुर्योधन कथां सहैभिर्वसुधाधि २८७
पैः॥ यदर्थं युधि संप्रेक्ष्य नाहं हन्यां शिखंडिनं॥ महाराजो मम पिता शांतनुर्लोकविश्रुतः॥ दिष्टांतमाप धर्मा

स्वरूपा स्वसुहृल्ला दिवसरशाकलस्यामावात्॥ यागःसमवत्तं॥

त्मा समयेन भरतर्षभ॥ ततोऽहं भरतश्रेष्ठ प्रतिज्ञां परिपालयन्॥ चित्रांगदं भ्रातरं वै महाराज्येभ्यषेचयं॥ तस्मिंश्च नि
धनं प्राप्ते सत्यवत्या मते स्थितः॥ विचित्रवीर्यं राजानमभ्यषिंचं यथाविधि॥ मयाभिषिक्तो राजेंद्र यवीयानपि धर्म
तः॥ विचित्रवीर्यो धर्मात्मा मामेव समुदैक्षत॥ तस्य दारक्रियां तात चिकीर्षुरहमप्युत॥ अनुरूपादिव कुलादि
त्येवं च मनो दधे॥ अथाश्रौषं महाबाहो तिस्रः कन्याः स्वयंवराः॥ रूपेणाप्रतिमाः सर्वाः काशिराजसुतास्तदा॥
अंबा चैवांबिका चैव तथैवांबालिका परा॥ राजानश्च समाहूताः पृथिव्यां भरतर्षभ॥ अंबा ज्येष्ठाभवत्तासां अं
बिका त्वथ मध्यमा॥ अंबालिका तु राजेंद्र राजकन्या यवीयसी॥ सोहमेकरथेनैव गतः काशिपतेः पुरीं॥ अपश्यं
ता महाबाहो तिस्रः कन्याः स्वलंकृताः॥ राज्ञश्चैव समाहूतान्पार्थिवान्पृथिवीपते॥ ततोऽहं तान्नृपान्सर्वान्
आहूय समरे स्थितान्॥ रथमारोपयांचक्रे कन्यास्ता भरतर्षभ॥ वीर्यशुल्काश्च ता ज्ञात्वा समारोप्य रथं तदा॥ अ
वोचं पार्थिवान्सर्वानहं तत्र समागतान्॥ भीष्मः शांतनवः कन्या हरतीति पुनः पुनः॥ ते यतध्वं परं शक्त्या सर्वे
मोक्षाय पार्थिवाः॥ प्रसह्य हि हराम्येष मिषतां सर्वधन्विनां॥ ततस्ते पृथिवीपालाः समुत्पेतुरुदायुधाः॥ योगो योग
इति क्रुद्धाः सारथींश्चाप्यचोदयन्॥ ते रथैर्मेघसंकाशैर्गजैश्च गजयोधिनः॥

उद्योग

पार्ष्ण्याःपार्ष्ण्याः उपसंगृह्याभिवाद्य॥

पार्ष्णीः

हृष्टैश्चाप्यैर्महीपालाः सख्युत्तरुदायुधाः॥ ततस्तैर्मां महीपालाः सर्व एव विशांपते रथव्रातेन महता सर्वतः पर्यवारयन्॥ तानहं शरवर्षेण समंतात्पर्यवारयं। सर्वान्नृपांश्चाप्यजयं द्वाराडिबसनवान्॥ अपातयं यदारेहींशेषदस्मस्मरतर्षभ॥ तथा मापततांश्चित्रान्ध्वजान्हेमपरिष्कृतान्॥ एकैकेन हि बाणेन भूमौ पातितवानहं। हयांस्तेषां गजांश्चैव सारथींश्चाप्यहं रणे॥ ते निवृत्ताश्च भग्नाश्च दृष्ट्वा तल्लाघवं मम। तथाहं हास्तिनपुरमायां जित्वा महीक्षितः॥ ततोऽहं ताश्च कन्याश्च भ्रातुरर्थाय भारत। तच्च कर्म महाबाहो सत्यवत्यै न्यवेदयं॥ **इत्युद्योगे अंबोपाख्याने॥**

भीष्म उवाच॥ ॥ततोऽहं भरतश्रेष्ठ मातरं वीरमातरं। अभिगम्योपसंगृह्य दाशेयीमिदमब्रुवं॥ इमाः काशिपतेः कन्या मया निर्जित्य पार्थिवान्। विचित्रवीर्यस्य कृते वीर्यशुल्काः कृता इति। ततो मूर्धन्युपाघ्राय पर्यश्रुनयना नृप। आह सत्यवती हृष्टा दिष्ट्या पुत्र जितं त्वया। सत्यवत्यास्त्वनुमते विवाहे समुपस्थिते। उवाच वाक्यं सव्रीडा ज्येष्ठा काशिपतेः सुता। भीष्म त्वमसि धर्मज्ञः सर्वशास्त्रविशारदः। श्रुत्वा च वचनं धर्म्यं मह्यं कर्तुमिहार्हसि। मया शाल्वपतिः पूर्वं मनसाभिवृतो वरः। तेन चास्मि वृता पूर्वं रहस्यविदितं पितुः। कथं मामन्यकामां त्वं राजन्धर्ममधीत्य वै। वासयेथा गृहे भीष्म कौरवः सन्विशेषतः। एतद्बुद्ध्या विनिश्चित्य मनसा भरतर्षभ॥ २८१

यत्क्षमं तन्महाराज तदिहारब्धुमर्हसि। स मां प्रतीक्षते व्यक्तं शाल्वराजो विशांपते। तस्मान्मां त्वं कुरुश्रेष्ठ समनुज्ञातुमर्हसि। कृपां कुरु महाबाहो मयि धर्मभृतां वर। त्वं हि सत्यव्रतो वीर पृथिव्यामिति नः श्रुतं॥ **॥इत्युद्योगे अंबोपाख्याने॥**

भीष्म उवाच॥ ॥ततोऽहं समनुज्ञाप्य कालीं गंधवतीं तदा। मंत्रिणश्च द्विजांश्चैव तथैव च पुरोहितान्। समनुज्ञासिषं कन्यामंबां ज्येष्ठां नराधिप। अनुज्ञाता ययौ सा तु कन्या शाल्वपतेः पुरं। वृद्धैर्द्विजातिभिर्गुप्ता धात्र्या चानुगता तदा। अतीत्य च तमध्वानमाससाद नृपं तदा। सा तमासाद्य राजानं शाल्वं वचनमब्रवीत्। आगताहं महाबाहो त्वामुद्दिश्य महामते। तामब्रवीच्छाल्वपतिः स्मयन्निव विशांपते। त्वयान्यपूर्वया नाहं भार्यार्थी वरवर्णिनी। गच्छ भद्रे पुनस्तत्र

भी सकाशं भीष्मकस्य वै। नाहमिच्छामि भीष्मेण गृहीतां त्वां प्रसह्य वै। त्वं हि भीष्मेण निर्जित्य नीता प्रीतिमती तदा। परामृश्य महायुद्धे निर्जित्य पृथिवीपतीन्। नाहं त्वय्यन्यपूर्वायां भार्यार्थी वरवर्णिनी। कथमस्मद्विधो राजा परपूर्वां प्रवेशयेत्। नारीं विदितविज्ञानः परेषां धर्ममादिशन्। यथेष्टं गम्यतां भद्रे मा त्वा कालोऽत्यगादयं। अंबा तमब्रवीद्राजन्ननंगशरपीडिता। मैवं वद महीपाल नैतदेवं कथंचन। नास्मि प्रीतिमती नीता भीष्मेणामित्रकर्शन। बलान्नीतास्मि रुदती विद्राव्य पृथिवीपतीन्। भजस्व मां शाल्वपते भक्तां बालामनागसं। भक्तानां हि परित्यागो न धर्मेषु प्रशस्यते।

साहमामंत्र्य गांगेयं समरेष्वनिवर्तिनं। अनुज्ञाता तातेन विततोहं स्वगृहमागता। न सभीक्ष्णो महाबाहुर्भीष्मो मतिर्विशांप
ते। भ्राता हेतोः समारंभो भीष्मस्येति श्रुतं मया। भगिन्यो मम येनीते अंबिकांबालिके च याः। प्रादाद्विचित्रवीर्याय गांगे
यो हि यवीयसे। यथा शाल्वपते नान्यं वरं ध्यामि कथंचन। त्वामृते पुरुषव्याघ्र तथा मूर्द्धानमालभे। न चान्यं सर्वराजें
द्र त्वामहं समुपस्थिता। स त्वं ब्रवीति शाल्वितं समेनात्मानमालभे। भजस्व मां विशालाक्ष स्वयं कन्यामुपस्थितां।
अन्यपूर्वा गिरा ज्ञेन्त्वत्समादानिकांक्षिणी। तामेवं भाषमाणां तु शाल्वः काशिपतेः सुतां। अत्यजद्भरतश्रेष्ठ जीर्णां
त्वचमिवोरगः। एवं बहुविधैर्वाक्यैर्याच्यमानस्तया नृपः। नाश्रद्दधच्छाल्वपतिः कन्याया भरतर्षभ। ततः सा मन्युना
विष्टा ज्येष्ठा काशिपतेः सुता। अब्रवीत्सास्नुनयना बाष्पविप्लुतनेत्रया। त्वया त्यक्ता गमिष्यामि यत्र तत्र विशांपते। तत्र
मे संतु गतयः संतः सत्यं यथा ध्रुवं। एवं तां भाषमाणां तु कन्यां शाल्वपतिस्तदा। परितत्याज कौरव्य करुणं परिदे
वतीं। गच्छ गच्छेति तां शाल्वः पुनः पुनरभाषत। बिभेमि भीष्मात्सुश्रोणि त्वं च भीष्मपरिग्रहः। एवमुक्ता तु सा तेन शाल्वे
ना दीर्घदर्शिना। निश्चक्राम पुराद्दीना रुदती कुररीयथा॥ ॥इत्युद्योगे अंबोपाख्याने॥ ॥भीष्म उवाच॥ ॥निष्क्रा २८२
मंती तु नगराच्चिंतयामास दुःखिता। पृथिव्यां नास्ति युवतिर्विषमस्थतरा मया। बंधुभिर्विप्रहीणास्मि शाल्वेन च निराकृ

आरण्यके उपनिषदि। प्रव्राजयितुं वनवासं याद्दयितुं। आत्मानं कार्श्यमनुरूपं कर्तुं॥

ता। न च शक्यं पुनर्गंतुं मया वारणसाह्वयं। अनुज्ञाता हि भीष्मेण शाल्वमुद्दिश्य कारणं। किं नु गर्हाम्यथात्मानमथ भी
ष्मं दुरासदं। अथवा पितरं मूढं यो मेकार्षीत्स्वयंवरं। ममायं स्वकृतो दोषो याहं भीष्मरथात्तदा। प्रवृत्ते दारुणे युद्धे शा
ल्वार्थं नापतं पुरा। तस्येयं फलनिर्वृत्तिर्यदापन्नास्मि मूढवत्। धिग्भीष्मं धिक्च मे मंदं पितरं मूढचेतसं। येनाहं वीर्य
शुल्केति पण्यस्त्रीवत्प्रवर्जिता। धिग्मां धिक्शाल्वराजानं धिग्धातारमथापि वा। येषां दुर्नीतभावेन प्राप्तास्म्यापद
मुत्तमां। सर्वथा भागधेयानि स्वानि प्राप्नोति मानवः। अनयस्यास्य तु मुखं भीष्मः शांतनवो मम। सा भीष्मे प्रतिकर्तव्य
महं पश्यामि सांप्रतं। तपसा वा युधा वापि दुःखहेतुः स मे मतः। को नु भीष्मं युधा जेतुमुत्सहेत महीपतिः। एवमा परि
निश्चित्य जगाम नगराद्बहिः। आश्रमं पुण्यशीलानां तापसानां महात्मनां। ततस्तामवसद्रात्रिं तापसैः परिवारिता
। आचख्यौ च यथा वृत्तं सर्वमात्मनि भारत। विस्तरेण महाबाहो निखिलेन शुचिस्मिता। हरणं च विसर्गं च शाल्वेन
च विसर्जनं। ततस्तत्र महानासीद्ब्राह्मणः संशितव्रतः। शैखावत्यस्तपोवृद्धः शास्त्रे चारण्यके गुरुः। आर्तां तामाह स
मुनिः शैखावत्यो महातपाः। निःश्वसंतीं सतीं बालां दुःखशोकपरायणां। एवं गते तु किं भद्रे शक्यं कर्तुं तपस्विभि
ः। आश्रमस्थैर्महाभागे तपोयुक्तैर्महात्मभिः। सा त्वेनमब्रवीद्राजन् क्रियतां मदनुग्रहः। प्राव्राज्यमहमिच्छामि तपस्त ७

आत्मानंकार्यमनुरूपंकर्तुंप्रतिजज्ञे॥

मदुःखरंनामयियेतानिकर्माणिपूर्वदेहेनमूढया।कृतानिनूनंपापानितेषांमेतत्फलंध्रुवं।नोत्सहेवैपुनर्गंतुंस्वजनं
प्रतितापसाः।प्रत्याख्यातानिरानंदाशाल्वेनचनिराकृता।उपदिष्टमिहेच्छामितापस्यंवीतकल्मषाः।युष्माभिर्देवसंका
शाः।कृपाभवतुवोमयि।सतामाश्वासयत्कन्यांदृष्टांतागमहेतुभिः।सांत्वयामासकार्यंचप्रतिजज्ञेद्विजैःसह॥
॥इत्युद्योगेअंबोपाख्याने॥ ॥भीष्मउवाच॥ ॥ततस्तेतापसाःसर्वेकार्यवंतोभवंस्तदा।तांकन्यांचिंतयंतस्ते
किंकार्यमितिधर्मिणः।केचिदाहुःपितुर्वेश्मनीयतामितितापसाः।केचिदस्मदुपालंभेमतिंचक्रुर्हितापसाः।
केचिच्छाल्वपतिंगत्वानियोज्यमितिमेनिरे।नेतिकेचिद्व्यवस्यंतिप्रत्याख्यातादितेनसा।एवंगतेतुकिंशक्यंभद्रे
कर्तुंमनीषिभिः।पुनरूचुश्चतांसर्वेतापसाःसंशितव्रताः।अलंप्रव्रजितेनेहभद्रेशृणुहितंवचः।इतोगच्छस्वभद्रंते
पितुरेवनिवेशनं।प्रतिपत्स्यतिराजासपितातेयदनंतरं।तत्रवत्स्यसिकल्याणिसुखंसर्वगुणान्विता।नचतेन्यागति
र्न्याय्याभवेद्भद्रेयथापिता।पतिर्वापिगतिर्नार्याःपितावावरवर्णिनि।गतिःपतिःसमस्थायाविषमेचपितागतिः।
प्रव्रज्याहिसुदुःखेयंसुकुमार्याविशेषतः।राजपुत्र्याःप्रकृत्याचसुकुमार्याश्रुताविनि।भद्रेदोषाहिविद्यंतेबहवो २८३
वरवर्णिनि।आश्रमेवैवसंत्यास्तेनभवेयुःपितुर्गृहे।ततस्त्वन्येतुवचनंतापसास्तांतपस्विनीं।त्वामिहैकाकिनीं

पर्यायमतिशयेनतवमन्मनःशुष्यतिशोषयतिदुःखं॥

दृष्टानिर्जनेगहनेवने।प्रार्थयिष्यंतिराजानस्तस्मान्मैवंमनःकृथाः॥ ॥अंबोवाच॥ ॥नशक्यंकाशिनगरंपुनर्गंतुंपितु
र्गृहान्।अवज्ञाताभविष्यामिबांधवानांनसंशयः।उषितास्मितथाबाल्येपितुर्वेश्मनितापसाः।नाहंगमिष्येभद्रंव
स्तत्रयत्रपितामम।तपस्तप्तुमभीप्स्यामितापसैःपरिरक्षिता।यथापरेपिमेलोकेनस्यादेवंमहात्ययः।दौर्भाग्यंब्राह्मणश्रे
ष्ठास्तस्मात्तप्स्याम्यहंतपः॥ ॥भीष्मउवाच॥ ॥इत्येवंतेषुविप्रेषुचिंतयत्सुयथातथा।राजर्षिस्तद्वनंप्राप्तस्तपस्वीहोत्र
वाहनः।ततस्तेतापसाःसर्वेपूजयंतिस्मतंनृपं।पूजाभिःस्वागताद्याभिरासनेनोदकेनच।तस्योपविष्टस्यसतोविश्रांत नि
स्योपशृण्वतः।पुनरेवकथांचक्रुःकन्यांप्रतिवनौकसः।अंबायास्तांकथांश्रुत्वाकाशिराज्ञश्चभारत।राजर्षिःस
महातेजावभूवोद्विग्नमानसः।तांतथावादिनींश्रुत्वादृष्ट्वाचसमहातपाः।राजर्षिःकृपयाविष्टोमहात्माहोत्रवाहनः।स
वेपमानउत्थायमातुस्तस्याःपितामहः।तांकन्यामंकमारोप्यपर्याश्वासयतप्रभो।सतामपृच्छत्कार्त्स्न्येनव्यसनोत्पत्तिमा
दितः।साचतस्मैयथावृत्तंविस्तरेणन्यवेदयत्।ततःसराजर्षिस्तुदुःखशोकसमन्वितः।कार्यंचप्रतिपेदेतन्म
नसासुमहातपाः।अब्रवीद्वेपमानश्चकन्यामार्तांसुदुःखितां।मागाःपितृगृहंभद्रेमातुस्तेजनकोह्यहं।
दुःखंछिद्यामहंतेविमयिवर्तस्वपुत्रिके।पर्याप्तंतेमनोवत्सेयदेवंपरिशुष्यसि।गच्छमद्वचनाद्रामंजामदग्न्यंतपस्वि

प्रीत्या सुरचितं दर्षतिस्रेकन्तकथामुदायुता ॥

उद्योग नं। रामस्ते सुमहद्दुःखं शोकं चापनेष्यति। हनिष्यति रणे भीष्मं न करिष्यति चेद्वचः। तं गच्छ भार्गवश्रेष्ठं कालाग्निसम
तेजसं। प्रतिष्ठापयिता स त्वां समे पथि महातपाः। ततस्तु सस्वरं बाष्पमुत्सृजन्ती पुनः पुनः। अब्रवीत्पितरं मातुः सा त
दा होत्रवाहनं। अभिवादयित्वा शिरसा गमिष्ये तव शासनात्। अपि नामाद्य पश्येयमार्यं तं लोकविश्रुतं। कथं वा ती
व्रं दुःखमेनं नाशयिष्यति भार्गवः। एतदिच्छाम्यहं ज्ञातुं यथा यास्यामि तत्र वै॥ ॥होत्रवाहन उवाच॥ ॥रामं द्रक्ष्यसि
भद्रे त्वं जामदग्न्यं महावने। उग्रे तपसि वर्तन्तं सत्यसंधं महाबलं। महेन्द्रं वै गिरिश्रेष्ठं रामो नित्यमुपास्ति ह। ऋषयो वे
दविद्वांसो गंधर्वाप्सरसस्तथा। तत्र गच्छस्व भद्रं ते ब्रूयाश्चैनं वचो मम। अभिवाद्य च तं मूर्ध्ना तपोवृद्धं दृढव्रतं। ब्रूयाश्चैनं
पुनर्भद्रे यत्ते कार्यं मनीषितं। मयि संकीर्तिते रामः सर्वं तत्ते करिष्यति। मम रामः सखा वत्से प्रीतियुक्तः सुहृच्च मे। जम
दग्निसुतो वीरः सर्वशस्त्रभृतां वरः। एवं ब्रुवति कन्यां तु पार्थिवे होत्रवाहने। अकृतव्रणः प्रादुरासीद्रामस्यानुचरः प्रि
यः। ततस्ते मुनयः सर्वे समुत्तस्थुः सहस्रशः। स च राजा वयोवृद्धः सृंजयो होत्रवाहनः। ततो दृष्ट्वा कृतातिथ्यमन्योन्यं वनौ
कसः। सहिता भरतश्रेष्ठ निषेदुः परिवार्य तं। ततस्ते कथयामासुः कथास्ताः सुमनोरमाः। धन्या दिव्याश्च राजेंद्र प्रीतिह २८४
र्षमुदायुताः। ततः कथांते राजर्षिर्महात्मा होत्रवाहनः। रामं श्रेष्ठं महर्षीणामपृच्छदकृतव्रणं। क्व संप्रति महाबाहो जामद

रा

ग्न्यः प्रतापवान्। अकृतव्रण शक्यो वै द्रष्टुं वेदविदां वर॥ ॥अकृतव्रण उवाच॥ ॥भवंतमेव सततं रामः कीर्त
यति प्रभो। सृंजयो मे प्रियसखो राजर्षिरिति पार्थिव। इह रामः प्रभाते श्वो भवितेति मतिर्मम। द्रष्टास्येनमिहायांतं तव द
र्शनकांक्षया। इयं च कन्या राजर्षे किमर्थं वनमागता। कस्य चेयं तव च का भवतीच्छामि वेदितुं॥ ॥होत्रवाहन उ
मुने वाच॥ ॥दौहित्रीयं ममैं काशिराजसुता प्रिया। ज्येष्ठा स्वयंवरे तस्थौ भगिनीभ्यां सहानघ। इयमंबेति विख्याता ज्ये
ष्ठा काशिपतेः सुता। अंबिकांबालिके त्वन्ये कनीयस्यौ तपोधन। समेतं पार्थिवं क्षत्रं काशिपुर्यां ततोऽभवत्। कन्यानि
मित्तं विप्रर्षे तत्रासीदुत्सवो महान्। ततः किल महावीर्यो भीष्मः शांतनवो नृपान्। अधिक्षिप्य महातेजास्तिस्रः कन्या ज
हार ताः। निर्जित्य पृथिवीपालानथ भीष्मो गजाह्वयं। आजगाम विशुद्धात्मा कन्याभिः सह भारत। सत्यवत्यै निवेद्या
थ विवाहार्थमनंतरं। भ्रातुर्विचित्रवीर्यस्य समाज्ञापयत प्रभुः। ततो वैवाहिकं दृष्ट्वा कन्येयं समुपार्जितं। अब्रवीत्तत्र
गांगेयं मंत्रिमध्ये द्विजर्षभ। मया शाल्वपतिर्वीर मनसाभिवृतः पतिः। न मामर्हसि धर्मज्ञ दातुं भ्रात्रेऽन्यमानसां। तच्छ्रुत्वा वच
नं भीष्मः संमंत्र्य सह मंत्रिभिः। निश्चित्य विससर्जेमां सत्यवत्या मते स्थितः। अनुज्ञाता तु भीष्मेण शाल्वं सौभपतिं
ततः। कन्येयं मुदिता तत्र काले वचनमब्रवीत्। विसर्जितास्मि भीष्मेण धर्मं मां प्रतिपादय। मनसाभिवृतः पूर्वं मया

दुःखद्वयमिमान्यात्पागः चिकीर्षति प्रतीकारं परावरात परलोकाम्यं॥

त्वं यावद्विवर्षेत। प्रत्याच बलो वशाद्वो भ्याः श्वात्रिंशस्मात्तिरांकितः। सेयं तपोवनं प्राप्ता ज्ञातायस्मै निरता दृष्टा॥ मयाच
स्तत्वमिज्ञाता वंशस्य परिकीर्तिना राजा अस्य दुःखस्योत्पत्तिर्भीष्म एव हि मन्यते॥ ॥अम्बोवाच॥ ॥भगवन्नेवमे
वेदय यथाह पृथिवीपतिः शरीरकर्त्ता मातुर्मे सृंजयो होत्रवाहनः॥ न ह्युत्सहे स्वनगरं प्रतियातुं तपोधन। अपमान
भयाच्चैव व्रीडया च महामुने। यत्तु मां भगवान् रामो वक्ष्यति द्विजसत्तम। तन्मे कार्यतमं कार्यमिति मे भगवन्मतिः॥ ॥
इत्युद्योगे अम्बोपाख्याने॥ ॥अकृतव्रण उवाच॥ ॥दुःखद्वयमिदं भद्रे कतरस्य चिकीर्षसि। प्रतिकर्तव्यमबले तत्त्व
वत्से वद स्व मे। यदि सौभपतिर्भद्रे नियोक्तव्यो मतस्तव। नियोक्ष्यति महात्मा स रामस्त्वद्धितकाम्यया। अथापगेयं भी
ष्मं त्वं रामेणेच्छसि धीमता। रणे विनिर्जितं द्रष्टुं कुर्यात्तदपि भार्गवः॥ सृंजयस्य वचः श्रुत्वा तव चैव शुचिस्मिते॥ यदत्र
ते भृशं कार्यं तदद्यैव विचिन्त्यतां॥ ॥अम्बोवाच॥ ॥अपनीतास्मि भीष्मेण भगवन्नविजानता। न हि जानाति मे भी
ष्मो ब्रह्मन् शाल्वगतं मनः॥ एतद्विचार्य मनसा भवानेतद्विनिश्चयं। विचिनोतु यथान्यायं विधानं क्रियतां तथा। भी
ष्मे वा कुरुशार्दूले शाल्वराजेऽथवा पुनः। उभयोरेव वा ब्रह्मन्युक्तं यत्तत्समाचर। निवेदितं मया ह्येतद्दुःखमूलं यथातथं 
विधानं तत्र भगवन्कर्तुमर्हसि युक्तितः॥ ॥अकृतव्रण उवाच॥ ॥उपपन्नमिदं भद्रे यदेवं वरवर्णिनि। धर्मं

प्रति वचो ब्रूयाः शृणु चेदं वचो मम। यदि त्वामापगेयो वै न नयेद्गजसाह्वयं। शाल्वस्त्वां शिरसा भीरु गृह्णीयाद्रामचोदि
तः। तेन त्वं निर्जिता भद्रे यस्मान्नीतासि भाविनि। संशयः शाल्वराजस्य तेन त्वयि सुमध्यमे। भीष्मः पुरुषमानी च जित
काशी तथैव च। तस्मात्प्रतिक्रिया युक्ता भीष्मे कारयितुं तव॥ ॥अम्बोवाच॥ ॥ममाप्येष महान्ब्रह्मन् हृदि कामो
ऽभिवर्तते। घातयेयं यदि रणे भीष्ममित्येव नित्यदा। भीष्मं वा शाल्वराजं वा यं वा दोषेण गच्छसि। प्रशाधि तं महाबाहो
यत्कृतेऽहं सुदुःखिता॥ ॥भीष्म उवाच॥ ॥एवं कथयतामेव तेषां स दिवसो गतः। रात्रिश्च भरतश्रेष्ठ सुखशीतोष्ण
मारुता। ततो रामः प्रादुरासीत्प्रज्वलन्निव तेजसा। शिष्यैः परिवृतो राजन्जटावीरधरो मुनिः। धनुष्पाणिरदीनात्माम
च राजा महातपाः। विनयाद्राजशार्दूल सृंजयः सोऽभ्ययान्नृपः। ततस्तं तापसाः दृष्ट्वा स च राजा महातपाः। तस्थुः प्रांजल
यो राजन्सा च कन्या यशस्विनी। पूजयामासुरव्यग्रा मधुपर्केण भार्गवं। अर्चितश्च यथान्यायं निषसाद सहैव तैः।
ततः पूर्वव्यतीतानि कथयंतौ स्म तावुभौ। आसतां जामदग्न्यश्च सृंजयश्चैव भारत। तथा कथांते राजर्षिर्भृगुश्रेष्ठं म
हाबलं। उवाच वचनं काले राममर्थवदर्थवत्। रामेयं मम दौहित्री काशिराजसुता प्रभो। अस्याः शृणु यथातत्त्वं का
र्यं कार्यविशारद। परमं कथ्यतां चेति तां रामः प्रत्यभाषत। ततः साभ्यवदद्रामं ज्वलंतमिव पावकं। ततो निवाद्य

उद्योग

चरणौ रामस्य शिरसा स्पृष्ट्वा। स्पृष्टा पद्मदलाभाभ्यां पाणिभ्यामग्रतः स्थिता। रुरोद सा शोकवती बाष्पगद्गदलोचना।। प्रपेदे
शरणं चैव शरण्यं भृगुनंदनं।। ।।राम उवाच।। ।।यथासि सृंजयस्यास्य तथा मे त्वं नृपात्मजे। ब्रूहि यत्ते मनोदुःखं करि
ष्ये वचनं तव।। ।।अंबोवाच।। ।।भगवञ्छरणं गत्वाद्य प्रपन्नास्मि महाव्रत। शोकपंकार्णवे मग्नां घोरादुद्धर मां विभो
।। ।।भीष्म उवाच।। ।।तस्याश्च दृष्ट्वा रूपं च वपुश्चाभिनवं पुनः। सौकुमार्यं परं चैव रामश्चिंतापरोऽभवत्। किमियं व
क्ष्यतीत्येवं विममर्श भृगूद्वहः। इति दध्यौ चिरं रामः कृपयाभिपरिप्लुतः। कथ्यतामिति तां भूयो रामेणोक्ता शुचिस्मिता।
सर्वमेव यथावत्त्वं कथयामास भार्गवे। तच्छ्रुत्वा जामदग्न्यस्तु राजपुत्र्या वचस्तदा। उवाच तां वरारोहां निश्चित्यार्थविनिश्च
यं।। ।।राम उवाच।। ।।प्रेषयिष्यामि भीष्माय कुरुश्रेष्ठाय भाविनि। करिष्यति वचो मह्यं श्रुत्वा च स नराधिपः। न चेत्करि
ष्यति वचो मयोक्तं जाह्नवीसुतः। धक्ष्याम्येनं रणे भद्रे सामात्यं शस्त्रतेजसा। अथवा ते मतिस्तत्र राजपुत्रि निवर्तते।।
यावच्छाल्वपतिं वीरं योजयाम्यत्र कर्मणि।। ।।अंबोवाच।। ।।विसर्जिताहं भीष्मेण श्रुत्वैव भृगुनंदन। शाल्वराज
गतं भावं मम पूर्वं मनीषितं। सौभराजमुपेत्याहमवोचं दुर्वचं वचः। न च मां प्रत्यगृह्णात्स चारित्रपरिशंकितः। एव
सर्वं विनिश्चित्य स्वबुद्ध्या भृगुनंदन।। तायसा स्त महात्मानो नृपश्रेष्ठ पुरस्कृता।। इत्युद्योगेंऽबोपाख्याने ।। २८६

यदत्रौपयिकं कार्यं तच्चिंतयितुमर्हसि। मम तु व्यसनस्यास्य भीष्मो मूलं महाव्रतः। येनाहं वशमानीता समुत्क्षिप्य ब
लात्तदा। भीष्मं जहि महाबाहो यत्कृते दुःखमीदृशं। प्राप्ताहं भृगुशार्दूल चराम्यप्रियमुत्तमं। स हि लुब्धश्च मानी च जितकाशी
च नानघ। तस्मात्प्रतिक्रिया कर्तुं युक्ता तस्मै त्वयानघ। एष मे क्रियमाणाया भारतेन तदा विभो। अभवद्धृदि संक
ल्पो घाताय सुमहाव्रत। तस्मात्कामं ममाद्येमं राम संपादयानघ। जहि भीष्मं महाबाहो यथा वृत्रं पुरंदरः।। इत्यु
द्योगेंऽबोपाख्याने।। ।।भीष्म उवाच।। एवमुक्तस्तदा रामो जहि भीष्ममिति प्रभो। उवाच रुदतीं कन्यां चोदयं
तीं पुनः पुनः। काश्ये न कामं गृह्णामि शस्त्रं वै वरवर्णिनि। ऋते ब्रह्मविदां हेतोः किमन्यत्करवाणि ते। वाचा भीष्म
श्च शाल्वश्च मम राज्ञि वशानुगौ। भविष्यतो नवद्यांगि तत्करिष्यामि मा शुचः। न तु शस्त्रं ग्रहीष्यामि कथंचिदपि भा
मिनि। ऋते नियोगाद्विप्राणामेष मे समयः कृतः।। ।।अंबोवाच।। मम दुःखं भगवता व्यपनेयं यतस्ततः। तत्तु
भीष्मप्रसूतं मे तं जहीश्वर माचिरं।। ।।राम उवाच।। काशिकन्ये पुनर्ब्रूहि भीष्मस्ते चरणावुभौ। शिरसा वंद
नार्होपि यदा ग्रहीष्यति गिरा मम।। अंबोवाच।। जहि भीष्मं रणे राम गर्जंतमसुरं यथा। समाहूतो रणे वीर मम चेदिच्छ
सि प्रियं। प्रतिश्रुतं च यदपि तत्सत्यं कर्तुमर्हसि।। ।।भीष्म उवाच।। तयोः संवदतोरेव राजन्रामांबयोस्तदा।

ऋषिरुक्तवान्॥

उद्योग

ऋषिं प्रकृतं परमधर्मात्मा इदं वचनमब्रवीत्। शरणागतां महाबाहो कन्यां न त्यक्तुमर्हसि। यदि भीष्मो रणे राम समाहूतस्त्व
या मृधे। निर्जितोस्मीति वा ब्रूयात् कुर्याद्वा वचनं तव। कृतमस्या भवेत्कार्यं कन्याया भृगुनंदन। वाक्यं सत्यं च ते वी
र भविष्यति कृतं विभो। इयं चापि प्रतिज्ञात तदा राम महामुने। जित्वा वै क्षत्रियान्सर्वान् ब्राह्मणेषु प्रतिश्रुतं। ब्राह्मण
क्षत्रिया वैश्यः शूद्रश्चैव रणे यदि। ब्रह्मद्विड्भविता तं वै हनिष्यामीति भार्गव। शरणं च प्रपन्नानां भीतानां शरणार्थि
नां। न शक्ष्यामि परित्यागं कर्तुं जीवन्कथंचन। यश्च कृत्स्नं रणे क्षत्रं विजेष्यति समागतं। दीप्तात्मानमहं तं च हनिष्यामीति भार्गव। स
एवं विजयी राम भीष्मः कुरुकुलोद्वहः। तेन युध्यस्व संग्रामे समेत्य भृगुनंदन॥ राम उवाच॥ स्मराम्यहं पूर्वकृतां प्रतिज्ञामृषिसत्त
म। तथैव च करिष्यामि यथा साम्नैव लप्स्यते। कार्यमेतन्महाब्रह्मन् काशिकन्यामनोगतं। गमिष्यामि स्वयं तत्र कन्यामादाय
यत्र सः। यदि भीष्मो रणश्लाघी न करिष्यति मे वचः। हनिष्याम्येनमुद्रिक्तमिति मे निश्चिता मतिः। न हि बाणा मयोत्सृष्टाः स
ज्जंतीह शरीरिणां। कायेषु विदितं तुभ्यं पुरा क्षत्रियसंगरे। एवमुक्त्वा ततो रामः सह तैर्ब्रह्मवादिभिः। प्रयाणाय म
तिं कृत्वा समुत्तस्थौ महातपाः। ततस्ते तामुषित्वा तु रजनीं तत्र तापसाः। हुताग्नयो जप्तजप्याः प्रतस्थुर्मज्जिघांसया। अभ्यग २८७
च्छत्ततो रामः सह तैर्ब्रह्मवादिभिः। कुरुक्षेत्रं महाराज कन्यया सह भारत। न्यविशंत ततः सर्वे परिगृह्य सरस्वतीं।

---

नातिमनसं सक्रोधं॥

तापसास्ते महात्मानो भृगुश्रेष्ठपुरस्कृताः॥ ॥इत्युद्योगपर्वणि अंबोपाख्याने॥ ॥भीष्म उवाच॥ ॥ततस्तृतीये दिवसे
संदिदेश व्यवस्थितः। कुरु प्रियं स मे राजन्प्राप्तोस्मीति महाव्रतः। तमागतमहं श्रुत्वा विषयांतं महाबलं। अभ्यगच्छं जवे
नाशु प्रीत्या तेजोनिधिं प्रभुं। गां पुरस्कृत्य राजेंद्र ब्राह्मणैः परिवारितः। ऋत्विग्भिर्देवकल्पैश्च तथैव च पुरोहितैः। स माम
भिगतं दृष्ट्वा जामदग्न्यः प्रतापवान्। प्रतिजग्राह तां पूजां वचनं चेदमब्रवीत्॥ ॥राम उवाच॥ ॥भीष्म कां बुद्धिमास्था
य काशिराजसुता तदा। अकामेयं त्वया नीता पुनश्चैव विसर्जिता। विभ्रंशिता त्वया हीयं धर्मादावाप्यशस्विनी। परामृष्टां
त्वया हीमां को हि गंतुमिहार्हति। प्रत्याख्याता हि शाल्वेन त्वया नीता हि भारत। स्वधर्मं पुरुषव्याघ्र राजपुत्री लभत्वियं। न
युक्तमवमानोयं राजन्कर्तुं त्वयानघ। ततस्तं वै विमनसमुदीक्ष्याहमथाब्रुवं। नाहमेनां पुनर्दद्यां ब्रह्मन्भ्रात्रे कथं
नातिमनसं पादः चन। शाल्वस्याहमिति प्राह पुरा मामेव भार्गव। मया चैवाभ्यनुज्ञाता गता सौभपुरं प्रति। न भयान्नाप्यनुक्रोशान्नार्थलो
भान्न काम्यया। क्षात्रं धर्ममहं जह्यामिति मे व्रतमाहितं। अथ मामब्रवीद्रामः क्रोधपर्याकुलेक्षणः। न करिष्यसि चेदेतद्वा
क्यं मे नरपुंगव। हनिष्यामि सहामात्यं त्वामद्येति पुनः पुनः। संरंभादब्रवीद्रामः क्रोधपर्याकुलेक्षणः। तमहं गीर्भिरि
ष्टाभिः पुनः पुनररिंदम। अयाचं भृगुशार्दूलं न चैव प्रशशाम सः। प्रणम्य तमहं मूर्ध्ना भूयो ब्राह्मणसत्तमं। अब्रुवं कारणं किं

यो यस्मिन्वर्त्तते यथा प्रीत्या ब्राह्मणा वा तत्र तथा वर्त्तेयं स्वात्मानं प्रवर्त्तयन्॥

उद्योग त्वयास्त्रं ग्राहितं भार्गवसि इष्वस्त्रं मम बालस्य भवतैवं चतुर्विधं। उपदिष्टं महाबाहो शिष्योस्मि तव भार्गव॥ नतामामब्रवीद्रा
मः क्रोधसंरक्तलोचनः। जानीषे मां गुरुं भीष्म न चैनां प्रतिगृह्णसि। सुतां काशिपतेः कौरव्य मत्प्रियार्थं महामते। नहि ते वि
द्यते शान्तिरन्यथा कुरुनन्दन। गृहाणेमां महाबाहो रक्षस्व कुलमात्मनः। त्वया विभ्रंशिता हीयं भर्तारं नाधिगच्छति। त
था ब्रुवन्तं तमहं रामं परपुरंजयं। नैतदेवं पुनर्भावि ब्रह्मर्षे किं श्रमेण ते। गुरुत्वं त्वयि संप्रेक्ष्य जामदग्न्य पुरातनं। प्रसादय
त्वां भगवंस्त्यक्ता चैषा पुरा मया। को जातु परभावां हि नारीं व्याललालीमिव। वासयेत गृहे जानन्स्त्रीणां दोषान्महात्ययान्
न भयाद्वासवस्यापि धर्मं जह्यां महाव्रत। प्रसीद मा वा यद्वा ते कार्यं तत्कुरुष्व मा चिरं। अयं चापि विशुद्धात्मन्पुराणे श्रूयते विभो। म
रुत्तेन महाबुद्धे गीतः श्लोको महात्मना। गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीय
ते। स त्वं गुरुरिति प्रेम्णा मया संमानितो भृशं। गुरुवृत्तिं न जानीषे तस्माद्योत्स्यामि वै त्वया। गुरुं न हन्यां समरे ब्राह्मणं
च विशेषतः। विशेषतस्तपोवृद्धमेवं क्षान्तं मया तव। उद्यतेषुमथो दृष्ट्वा ब्राह्मणं क्षत्रबन्धुवत्। यो हन्यात्समरे क्रुद्धं यु
ध्यन्तमपलायिनं। ब्रह्महत्या न तस्य स्यादिति धर्मेषु निश्चयः। क्षत्रियाणां स्थितो धर्मे क्षत्रियोस्मि तपोधन। यो यथा वर्त्ते २८८
न्नास्ति त यस्मिंस्तस्मिन्नेवं प्रवर्त्तयन्॥ नाधर्मं समवाप्नोति न चाश्रेयश्च विन्दति॥

अर्थधर्मा या द्विधा कालविनाशनः समर्थस्तं विवक्तुं सतिः संशये न संशयाभावेन श्रेयानेव इह। यतोऽनर्थसंशयो

अर्थे वा यदि वा धर्मे समर्थो देशकालवित्। अर्थसंशयमापन्नः श्रेयान्निःसंशयो नरः। यस्मात्संशयितेप्यर्थे यथान्यायं प्र
वर्त्तसे। तस्माद्योत्स्यामि सहितस्त्वया राम महाहवे। पश्य मे बाहुवीर्यं च विक्रमं चातिमानुषं। एवं गतेपि तु मया यच्छक्यं
भृगुनन्दन। तत्करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह। द्वन्द्वे राम यथेष्टं ते सज्जो भव महाद्युते। तत्र त्वं निहतो राम म
या शरशताहतः। लप्स्यसे निर्जितांल्लोकाञ्शस्त्रपूतो महारणे। स गच्छ विनिवर्त्तस्व कुरुक्षेत्रं रणप्रिय। तत्रैष्यामि म
हाबाहो युद्धाय त्वां तपोधन। अपि यत्र त्वया राम कृतं शौचं पितुः पुरा। तत्राहमपि हत्वा त्वां शौचं कर्त्तास्मि भार्गव। तत्र
राम समागच्छ त्वरितं युद्धदुर्मद। व्यपनेष्यामि ते दर्पं पौराणं ब्राह्मणब्रुव। यच्चापि कत्थसे राम बहुशः परिषत्सु नि
र्जिताः क्षत्रिया लोके मयैकेनेति तच्छृणु। न तदा जातवान्भीष्मः क्षत्रियो वापि मद्विधः। पश्चाज्जातानि तेजांसि
तृणेषु ज्वलितं त्वया। यस्ते युद्धमयं दर्पं कामं च व्यपनाशयेत्। सोहं जातो महाबाहो भीष्मः परपुरंजयः। व्यपनेष्या
मि ते दर्पं युद्धे राम न संशयः॥ ॥इत्युद्योगपर्वणि अंबोपाख्याने॥ ॥भीष्म उवाच॥

अत्रानार्थसंशयप्राप्तः संशयितार्थपापहेतोः श्रेयस्यान्याये अपि चिन्त्य इति पापवदयथान्यायमिति। अर्थधर्मौ द्वं
नवि विवेक्तव्यौ। एवंगते एवं गतेपि॥

ब्ला:काका:

ततो मामब्रवीद्रामः प्रहसन्निव भारत। दिष्ट्या भीष्म मया सार्धं योद्धुमिच्छसि संगरे॥ अयं गच्छामि कौरव्य कुरुक्षे
उद्योग त्रं त्वया सह। भाषितं तत्करिष्यामि तत्र गच्छ परंतप॥ तत्र त्वां निहतं माता मया शरशताचितं। जाह्नवी पश्यतां भीष्म गृध
कंकबलाशनं॥ कृपणं त्वामभिप्रेक्ष्य सिद्धचारणसेविता। मया विनिहतं देवी रोदतामद्य पार्थिव॥ अतदर्हा महाभा
गा भगीरथसुता नदी। या त्वामजीजनन्मंदं युद्धकामुकमातुरं॥ एहि गच्छ मया भीष्म युद्धकामुक कौरव। गृहाण सर्वं कौरव्य र
थादि भरतर्षभ॥ इति ब्रुवाणं तमहं रामं परपुरंजयं। प्रणम्य शिरसा राममेवमस्त्वित्यथाब्रुवं॥ एवमुक्त्वा ययौ राम
ः कुरुक्षेत्रं युयुत्सया। प्रविश्य नगरं चाहं सत्यवत्यै न्यवेदयं। ततः कृतस्वस्त्ययनो मात्रा च प्रतिनंदितः॥ द्विजातीन्वाच्य
पुण्याहं स्वस्ति चैव महाद्युते। रथमास्थाय रुचिरं राजतं पांडुरैर्हयैः। सूपस्करं स्वधिष्ठानं वैयाघ्रपरिवारणं। उपपन्नं
महाशास्त्रैः सर्वोपकरणान्वितं। तत्कुलीनेन वीरेण हयशास्त्रविदा नृप। युक्तं सूतेन शिष्टेन बहुशो दृष्टकर्मणा।
दंशितः पांडुरेणाहं कवचेन वपुष्मता। पांडुरं कार्मुकं गृह्य प्रायां भरतसत्तम। पांडुरेणातपत्रेण ध्रियमाणेन मूर्ध
नि। पांडुरैश्चापि व्यजनैर्वीज्यमानो नराधिप। शुक्लवासाः सितोष्णीषः सर्वशुक्लविभूषणः। स्तूयमानो जयाशी
र्भिर्निष्क्रम्य गजसाह्वयात्। कुरुक्षेत्रं रणक्षेत्रमुपायां भरतर्षभ। ते हयाश्चोदितास्तेन सूतेन परमाहवे। अवहन्मां भृशं २८९

राजन्मनोमारुतरंहसः। गत्वाहं तत्कुरुक्षेत्रं स च रामः प्रतापवान्। युद्धाय सहसा राजन्पराक्रांतौ परस्परं। ततः संदर्श
नेऽतिष्ठं रामस्यातितपस्विनः। प्रगृह्य शंखप्रवरं ततः प्राधममुत्तमं। ततस्तत्र द्विजा राजंस्तापसाश्च वनौकसः। अपश्यंत रणं
दिव्यं देवाः सेंद्रगणास्तदा। ततो दिव्यानि माल्यानि प्रादुरासंस्ततस्ततः। वादित्राणि च दिव्यानि मेघवृंदानि चैव ह। ततस्ते
तापसाः सर्वे भार्गवस्यानुयायिनः। प्रेक्षकाः समपद्यंत परिवार्य रणाजिरं। ततो मामब्रवीद्देवी सर्वभूतहितैषिणी। माता स्व
रूपिणी राजन्किमिदं ते चिकीर्षितं। गत्वाहं जामदग्न्यं तु प्रयाचिष्ये कुरूद्वह। भीष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः। मा मैवं
पुत्र निर्बंधं कुरु विप्रेण पार्थिव। जामदग्न्येन समरे योद्धुमित्यवभर्त्सयत्। किं न वै क्षत्रियहणो हरतुल्यपराक्रमः। विदित
ः पुत्र रामस्ते यतस्त्वं योद्धुमिच्छसि। ततोऽहमब्रुवं देवीमभिवाद्य कृतांजलिः। सर्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयंवरे। यथा च रामो रा
जेंद्र मया पूर्वं प्रचोदितः। काशिराजसुतायाश्च तथा कर्म पुरातनं। ततः सा राममभ्येत्य जननी मम महानदी। मदर्थं तमृषिं दे
वी क्षमयामास भार्गवं। भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत्। स च तामाह देवीं तां भीष्ममेव निवर्तय। न च मे कु
रुते काममित्यहं तमुपागमत्॥ ॥वैशंपायन उवाच॥ ततो गंगा सुतस्नेहाद्भीष्मं पुनरुपागमत्। न चास्या
स्याकरोद्वाक्यं क्रोधपर्याकुलेक्षणः। अथादृश्यत धर्मात्मा भृगुश्रेष्ठो महातपाः। आह्वयामास च पुनर्युद्धाय द्विजसत्त

स्वदमातरो गायत्री सावित्री सरस्वती स्पृशः। स व्यतिक्रमालंघितक्रमः॥ स्व॑
उद्योग मः॥ ॥इत्युद्योगपर्वण्यंबोपाख्याने॥ ॥भीष्म उवाच॥ ॥ततमहं स्मयन्निव तं रथो भूम्यां व्यवस्थितं। भूमिष्ठं नाभ्य द
र्त्याकुं नवं तं रथमास्थितः। आरोह स्यंदनं वीर कवचं च महाभुज। बधान समरे राम यदि योद्धुं मयेच्छसि। ततो मामब्रवीद्
रामः स्मयमानो रणाजिरे। रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत्। सूतश्च मातरिश्वा वै कवचं वेदमातरः। सु व्यतिक्रमः
वीतारणे नाभिर्याश्ये कुरुनंदन। एवं ब्रुवाणो गांधार रामो मां सत्यविक्रमः। शरव्रातेन महता सर्वतः प्रत्यवारयत्
। ततोऽपश्यं जामदग्न्यं रथमध्ये व्यवस्थितं। सर्वायुधधरे श्रीमत्यद्भुतोपमदर्शने। मनसा विहितं पुण्ये विस्तीर्णे नगरो
पमे। दिव्याश्वयुजि सन्नद्धे कांचनेन विभूषिते। कवचेन महाबाहो सोमार्ककृतलक्षणं। धनुर्धरो बद्धतूणो बद्धगो
धांगुलित्रवान्। सारथ्यं कृतवांस्तस्य युयुत्सोरकृतव्रणः। सखा वेदविदत्यंतं दयितो भार्गवस्य ह। आह्वयानः स मां
युद्धे मनो हर्षयतीव मे। पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः। तमादित्यमिवोद्यंतमनाधृष्यं महाबलं। क्षत्रि २८८
यांतकरं राममेकमेकः समासदं॥ ततोऽहं बाणपातेषु त्रिषु वाहान्निगृह्य वै। अवतीर्य धनुर्न्यस्य पदातिर्ऋषि
सत्तमं। अभ्यगच्छं तदा राममर्चिष्यन् द्विजसत्तमं। अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमं। राम त्वया यो
विशिष्टेन ˎविशिष्टे॥ योत्स्यामि त्वधिकेन गुरुणा च। चरणं राम महाबाहो समग्रे विताश्वपादरदताडयत्। यदंत्य वसायं
राम सह यशोनाधिकेन वः। गुरुणा धर्मशीलेन जयमाशास्व मे विभो॥ राम उवाच॥ एवमेतत्कुरुश्रेष्ठ क
र्तव्यं भूतिमिच्छता। धर्मो ह्येष महाबाहो विशिष्टैः सह युध्यतां। शपेयं त्वां न चेदेवमागच्छेथा विशां पते। युध्यस्व
त्वं रणे यत्तो धैर्यमालंब्य कौरव। न तु ते जयमाशासे त्वां हि जेतुमहं स्थितः। गच्छ युध्यस्व धर्मेण प्रीतोऽस्मि चरिते
न ते। ततोऽहं तं नमस्कृत्य रथमारुह्य सत्वरः। प्राध्मापयं रणे शंखं पुनर्हेमपरिष्कृतं। ततो युद्धं समभवन्मम तस्य च
भारत। दिवसान् सुबहून् राजन् परस्परजिगीषया। स मे तस्मिन् रणे पूर्वं प्राहरत्कंकपत्रिभिः। षष्ट्या शतैश्च नवभिः
शराणामग्निवर्चसां। चत्वारस्तेन मे वाहाः सूतश्चैव विशां पते। प्रतिरुद्धास्तथैवाहं समरे दंशितः स्थितः। नमस्कृत्य च दे
देवाः भ्यो ब्राह्मणेभ्यश्च भारत। अवोचं प्रहसन् रामं रणमध्ये व्यवस्थितं। आचार्यता मानिता मे निर्मर्यादे ह्यपि त्वयि। भूयस्तु
शृणु मे ब्रह्मन् संपदं धर्मसंग्रहे। ये ते वेदाः शरीरस्था ब्राह्मण्यं यच्च ते महत्। तपश्च सुमहत्तप्तं न तेभ्यः प्रहराम्यहं
धर्मे प्रहरे क्षत्रधर्मस्य यं त्वं राम समास्थितः। ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात्। पश्य मे धनुषो वीर्यं पश्य बाह्वोर्ब
लं च मे। एष ते कार्मुकं वीर द्विधा कुर्मि सायकैः। तस्याहं निशितं भल्लं चिक्षेप भरतर्षभ। तेनास्य धनुषः कोटि
श्छिन्ना भूमावथापतत्। नव चापि पृषत्कानां शतानि नतपर्वणां। चिक्षेप कंकपत्राणां जामदग्न्यरथं प्रति। काये विष

कोस्तुतदावाहुनासत्तुदारिता ॥ चक्षुःस्फुरंतालधिंनागाङ्कवचात्तसरा ॥ स्ततोहितसर्वांगःस्रवन्स्रुधिरंरणे ॥ बभौ
 रामस्तदाराजन्मेरुर्धातूनिवोत्सृजन् ॥ हेमंतांतेशोकइवरक्तस्तबकमंडितः ॥ बभौरामस्तदाराजन्प्रफुल्लइवकिं
शुकः ॥ ततोन्यद्धनुरादायरामःक्रोधसमन्वितः ॥ हेमपुंखान्सुनिशितान्शरांस्तान्हिववर्षसः ॥ तेसमासाद्यमांरौद्राब
हुधामर्मभेदिनः ॥ अकंपयन्महावेगाःसर्पानलविषोपमाः ॥ तमहंसमवष्टभ्यपुनरात्मानमाहवे ॥ शतसंख्यैःशरैःक्रु
द्धस्तदाराममवाकिरं ॥ सततःसोग्न्यर्कसंकाशैःशरैराशीविषोपमैः ॥ शितैरभ्यर्दितोरामोमंदचेताइवाभवत् ॥ ततोहंकृप
याविष्टोविनिंद्यात्मानमात्मना ॥ धिग्धिगित्यब्रुवंयुद्धंक्षत्रंचभरतर्षभ ॥ असकृद्भृशसंतप्तःशोकवेगपरिप्लुतः ॥ अहोब
तकृतंपापंमयेदंक्षत्रकर्मणा ॥ गुरुर्द्विजातिर्धर्मात्मायदेवंपीडितःशरैः ॥ ततोनप्राहरंभूयोजामदग्न्यायभारत ॥ अथा
वतप्यपृथिवींपूषादिवससंक्षये ॥ जगामास्तंसहस्रांशुस्ततोयुद्धमुपारमत् ॥ ॥ इत्युद्योगप० अंबोपाख्याने ॥ ॥
भीष्मउवाच ॥ ॥ आत्मनस्तुततःसूतोहयानांचविशांपते ॥ ममचापनयामासशल्यान्कुशलसंमतः ॥ स्नातोपवृ
त्तैस्तुरगैर्लब्धतोयैरविह्वलैः ॥ प्रभातउदितेसूर्येततोयुद्धमवर्त्तत ॥ दृष्ट्वामांतूर्णमायांतंदंशितंस्यंदनस्थितं ॥ २८१
अकरोद्रथमत्यर्थंरामःसज्जंप्रतापवान् ॥ ततोहंराममायांतंदृष्ट्वासमरकांक्षिणं ॥ धनुःश्रेष्ठंसमुत्सृज्यसहसाव

तरंरथात् ॥ अभिवाद्यतथैवाहंरथमारुह्यभारत ॥ युयुत्सुर्जामदग्न्यस्यप्रमुखेवीतभीःस्थितः ॥ ततोहंशरवर्षेणमह
तासमवाकिरं ॥ सचमांशरवर्षेणवर्षंतंसमवाकिरत् ॥ संक्रुद्धोजामदग्न्यस्तुपुनरेवपतत्रिणः ॥ संप्रैषीन्मेशरान्घो
रान्दीप्तास्यानुरगानिव ॥ तानहंनिशितैर्भल्लैःशतशोथसहस्रशः ॥ अच्छिदंसहसाराजन्नंतरिक्षेपुनःपुनः ॥ ततस्त्व
स्त्राणिदिव्यानिजामदग्न्यःप्रतापवान् ॥ मयिप्रयोजयामासतान्यहंप्रत्यषेधयं ॥ अस्त्रैरेवमहाबाहोचिकीर्षन्नधि
कांक्रियां ॥ ततोदिविमहानादःप्रादुरासीत्समंततः ॥ ततोहमस्त्रंवायव्यंजामदग्न्येप्रयुक्तवान् ॥ प्रत्याजघ्नेचतद्रामोगु
ह्यकास्त्रेणभारत ॥ ततोहमस्त्रमाग्नेयमनुमंत्र्यप्रयुक्तवान् ॥ वारुणेनैवतद्रामोवारयामासमेविभुः ॥ एवमस्त्राणिदि
व्यानिरामस्याहमवारयं ॥ रामश्चममतेजस्वीदिव्यास्त्रविदरिंदमः ॥ ततोमांसव्यतोराजन्रामःकुर्वन्द्विजोत्तमः ॥ उर
स्यविध्यत्संक्रुद्धोजामदग्न्यःप्रतापवान् ॥ ततोहंभरतश्रेष्ठसंन्यषीदंरथोत्तमे ॥ ततोमांकश्मलाविष्टंसूतस्तूर्णमपाव
हत् ॥ ग्लायंतंभरतश्रेष्ठरामबाणप्रपीडितं ॥ ततोमामपयातंवैभृशंविद्धमचेतसं ॥ रामस्यानुचराहृष्टाःसर्वेदृष्ट्वाविचु
क्रुशुः ॥ अकृतव्रणप्रभृतयःकाशिकन्याचभारत ॥ ततस्तुलब्धसंज्ञोहंज्ञात्वासूतमथाब्रुवं ॥ याहिसूतयतोरामः
सज्जोहंगतवेदनः ॥ ततोमामवहत्सूतोहयैःपरमशोभितैः ॥ नृत्यद्भिरिवकौरव्यमारुतप्रतिमैर्गतौ ॥ ततोहं

लोमवाहि निःश्वासान्यपि वहद्भिः शरद्भिः॥

उद्योगे रामस्य मायया बाणा वर्षेद्धि कौरव। अवाकिरत् सुमंत्रश्च संरब्धश्च जिगीषया। तानापतत एवाशु स रामो बाणैरजिह्मगैर्बा
णान्निवारयन्नसौ मिकिंकरे निरादरात्। ततास्तु दितासावविममबाणान्सुसंचितान्। रामबाणोर्द्धमविन्नाः शतशोथ स
हस्रशः। ततः पुनश्च शरेंद्रं संधूपनं कालसंमितं। अस्त्रं जग्राह दैत्याय रामामाहंतुं जिघांसया। ततश्चिन्नहतमार्गं बाणं विगत्व
गतः। स मोहमगमद्रामो भूमौ च निपपात ह। ततो हाहाकृतं सर्वं रामस्तत्र समाश्रितः। जगञ्चारतसं विसंज्ञावाकंपत न
तथा। ततस्ते परमसंविग्नाः सर्व एवाभितस्थिरे। तपोधनास्तु संरक्षाकान्ताया चक्रकरनंदना। ततस्तं परिष्वज्य ह्वा निरास्वा मयंच
दायाणि निर्कलशीतिभ्रूजयाज्ञान्निद्धि कौरव। ततः स विकलवाक्यं राममुवाच चाब्रवीत्। तिष्ठन्नोष्मद्गंमा सातिबाणसंधि
यं काशुकं। सत्रकौन्यपतन्नूर्सं सन्वेपाशू महाहवा। येनासंन्त्रशत्रु हिंमो व्याघृसिसि इव द्रुमाः। दृष्ट्वा हयास्तु ता रामः चा
पाश्चेरामहाहवे। अश्वाकिरन्मांबिच्छेदो बाणौघो ग्राममवाहिनि। ततोहमपि शाखास्त्वं समरप्रतिवारणा। अश्वास्तज
महद्बाहो ततरा विहिता शरा। रामस्य ममविवास्थ व्योमाद्दस्म समंततः। न स्मरत्यपि ततपतिचारजालसमाहतः। मातरि
श्वानतनस्मिन्मद्यकरुद्रश्वाभवत्। ततोवायोः प्रकंपाचस्तयोस्य चगन क्षितिः। अतिनिघात प्रलावाश्य पावकः समजा २८२

यत। ततशरास्त्रमस्त्रेन प्रदीप्ता अग्निवनात्तनामैसा वितरा राजस्समन्वतः। भयेदिशातद्राशतसहस्राणि च
श्रुतान्यत्रुदानिव। अस्तुतान्यपस्त्रवाणि निरवघ्नाणि चा कौरवः। रामः शरगणासं कुद्धो मयि हूसैन्यपातयत्। ततो व
तान पिरणशरिरागा। विशेषपमे। संच्छिद्यन्न्मोहपातपातयप्रवगानिव। एवं तदन्तवद्युद्धंतदानरतमसत्तमा। सं
धाकालव्यती। तत्तुव्यपायासमप्रभुः॥ ॥इत्युद्योगपर्वे रामोपाख्याने॥ ॥मार्कण्डेय उवाच॥ समागतस्य रा
मेणउत्तरवानिदारुण। अत्यद्भुतं सुसंस्तदानरतमत्तमांतलादिव्याख्यविह्वगादिव्याणएस्त्रान्यतकश
॥ अयोजयत्स धर्मात्मा दिवसविन्तुः। तान्यहतंस्तु ताघाते राक्षसेस्त्राणि मायारताव्यधमन्नलसुधेप्राणेसत्का
तुरूस्यजाराच्च स्वैरान्विसृजतकृधमहात्तापरवचनार रामास्त्रं कुध्यतमहात्तजास्यकप्राणास्त्रमंत्रण। ततः शोक्षिप्रादि
णाशीरक्षसामस्त्ररुद्धजामदग्न्योमहात्मा। कालोपश्वजलितामिवोल्कां संदीप्यां। तत्रसाव्याप्यलोकं। ततो
हंतामित्रनिहीप्यमानासमात्यांतीमन्तकाललाभरोदासा। छिन्वात्रिधन्वपातयामासरामो ता तावदोपवनः सुपर्ग
धि। तस्यापि ह्रिनापाकोधदीप्तोपश्वरामः शक्रोपाशःप्रादिणोहृदेशान्याः। तासीरूपनारतने तन्त्रशक्तंतत्रखिया।
ध्ना पघवाविवक्तुं। किंविवाद विकृतैः मप्राहृदयहृदयस्यः सवोस्तमहात्मा इवासनः। नानाकंकेंवेपींस्वपास्त्वज

रुक्मवर्मं निश॥

सोग्नौ वा वायथादित्या दश लोकसंहराय।ततो जालं बाणमयं विहितं संदृश्य निवाचारजालेन राजन्।शरैः समाहि
उद्योग णवं रणे हतं तत्र घोरं यद्धर्मघोसरूपा॥ ततो राजन्नजामदग्न्यो महात्मा रामः कोपाद्विव्याक्षिपद्वै महेद्रा॥ चिचिता॥ वि
काचनपट्टनद्धाय या मप्रोल्का ज्वलिता स्त्रया ना॥ तास्त्वापतन्त्या राम्यमणा चारबिंदू रव क्षेनाज्ञो पातयि वान
रंड्रा बाणो दिव्यकमदग्न्यस्य संरब्धादिव्यानश्वानन्यवर्षसमृता न निशितानापत्रगानी स्वरूपा हस्तान्नकी
म ट्टेमविचाचित्रकृता॥ घाकुरूक्का देमैरु महात्मा कोधविदृतो हद्दायराग्भमायात्रा ततस्त एपः ज्वलनानामि वोग्राः
समाप्तक्तवि विशिखा नां प्रदीप्ता॥ समाविध्ना चाप्यिहाजश्शरीरं च्यारत्कृत स्वरयचिवमहं। रघ्यः शरौर्म्लानि चित
॥ सर्वतोद्दरथाद्य सारथिस्त्रिव राजन्। धुगरध्येषां च तत्रैव चक्के ताप्येवाद्धं रुत्वापि न मः॥ ततस्तस्मिन्बाण श्री र
वर्षेव्यतीतन्वारोरा घरणाशल्यवर्षमुरुं तासविदलामार्गणो मंत्रस्नकृषि हृदस्नान्कं सुदुवेन्वरिरकं। प्रयारामो बा
णजालानि तस्य चाप्येवास्तु कृत्वा गाढविद्धः॥ तत्तातानुच्चमम बापरा बर्त्तीना विनाव स्वेसाणां संपानमदीशं॥ इतिश्रीउद्यो
गेअंबोपाख्याने॥ नाध्मवाच॥ ततः पुनस्तराजदृष्ट्वा पवि मलजकृतानार्गविस्मय मा हं पुनर्युद्धं मवर्त्तात॥ त २५७३
ताज्ञ्चांतराय निस्वनामम्बदहस्तांबरं गौं वर्षशरजालानि मिमंपि घसश्रो वाल। ततः सूत्र

व

ममश्रुत्वबरवर्षेणायीडितः॥ अप्यतेनारथो यत्नान्मनो मम विषादयन्।ततः सूतो मर्मत्यधकेश्मलं शाविशान्महत्।
पृथिव्यां च शराघातान्निपपात ममार च।ततोः सूतो दजहात्प्राणान्राम बाणप्रपीडितः।मुहूर्तादिव राजेंद्र मां च भी रा
म्रते विशत्तदा।ततः सूते हते तस्मिन् क्षिपतस्तस्य मे शरान्।प्रमत्तमनसो रामः प्राहिणोन्मृत्युसंमितः।ततः सूतव्यसनिनं विद्रुतं
मां समार्गणे॥ शरेणाभ्यहनद्गाढं विकृष्य बलवद्धनुः।समे तु जांतर राजन्निपत्य रुधिराशनः।मद्येव महाराजे इजमाम
वसुधातलं।मत्वा तु निहतं रामस्ततो मां भरतर्षभ।मेघवद्विननादोच्चैर्जहृषे च पुनः पुनः।तथा तु पतिते राजन्मयि
रामो मुदायुतः।उदक्रोशन्महानादं सह तैरनुयायिभिः।मम तत्रान्तवद्ये तु कुरवः पार्श्वतः स्थिताः।आगता ये च युद्ध
तत्र नाम्न दिदृक्षवः।आर्त्तं परमिकां जग्मुस्तेतदा पतिते मयि।ततो पश्यंपतितो राजसिंह द्विजानष्टौ सूर्यहुताशना
भान्।ते मां समंतात्परिकास्थ्यतस्तुः स्वबाहुभिः परिधाय्याजिमध्ये रक्ष्यमाणश्चाहंतैर्विप्रैर्नाहं भूमिमुपास्पृशं।अंत
रिक्षे धृतो ह्यस्मि तैर्विप्रैर्बान्धवैरिव।स्वसन्निवांतरिक्षे च जलबिंदुभिरुक्षितः।ततस्ते ब्राह्मणा राजन्नब्रुवन्परिगृह्य मां
स्व ।मा भैरिति समं सर्वे स्वस्ति तेस्त्विति चासकृत्।ततस्तेषामहं वाग्भिस्तर्पितः सहसोत्थितः।मातरं सरितां श्रेष्ठामपश्यं रथ
मास्थितां।हयास्तु मे संगृहीतास्तया मात्रा महानदी।पादौ जनन्याः प्रतिपूज्य चाहं तथा पितॄणां रथम

उद्योग स्यरोहं रथस्थसामां सरथं हयांश्चैव सकारणिव । तामहं प्रांजलिर्भूत्वा पुनराख्यमसर्जयं । ततो हं तस्य युद्धस्य हयोस्ता
वातरं हमः ॥ अस्युग्रं जामदग्न्येन निहते हनिमारता ॥ ततो हं नरतश्रेष्ठ वेगवत्तमहाबलं । अस्युचं समरे बाणं रामायहृ
दयविदं । ततो जगाम वसुधां मम बाणप्रपीडितः ॥ जानुभ्यां धनुरुत्सृज्य रामो मोहवशंगतः ॥ ततस्तस्मिन्निपतिते रामे
भूरिसहस्रदे । आवव्रुर्जलदा व्योम क्षरंतो रुधिरं बहु । उल्काश्च शतशः पेतुः सनिर्घाताः सकंपनाः ॥ अर्कं च सहसा
दीप्तं स्वर्भानुरभिसंवृणोत् । ववुश्च वाताः परुषाश्चलिता च वसुंधरा । गृध्रा बलाश्च कंकाश्च परिपेतुर्मुदायुताः ॥ दीप्ता
यां दिशि गोमायुर्दारुणं मुहुरुन्नदत् । अनाहता दुंदुभयो विनेदुर्भृशनिःस्वनाः ॥ एतदौत्पातिकं सर्वं घोरमासीद्भयं
करं । विसंज्ञकल्पे धरणीं गते रामे महात्मनि ॥ ततो रविर्मंदमरीचिमंडलो जगामास्तं पांसुपुंजावगुढः । निशा व्यगाह
त्सुखशीतमारुता ततो युद्धं प्रत्यवहारयावाव । एवं राजन्नवहारो बभूव ततः पुनर्विमले ह्युग्रं रौद्रं । कल्यं कल्यं विंश
तिविद्दिनानि तथैव चान्यानि दिनानि त्रीणि ॥ ॥ इत्युद्योगे अंबोपाख्याने ॥ ॥ भीष्म उवाच ॥ ॥ ततो हं निशि राजेंद्र
प्रणम्य शिरसा तदा । ब्राह्मणानां पितॄणां च देवतानां च सर्वशः ॥ नक्तंचराणां भूतानां राजन्यानां विशांपते । शयनं प्राप्य २५४
रहिते मनसा समचिंतयं । जामदग्न्येन मे युद्धमिदं परमदारुणं । अहानि सुबहून्यद्य वर्तते सुमहात्ययं । न च रामं

इदं विघ्नकृतं विश्वकृत्यं ॥

महावीर्यं शक्तो स्मि रणमूर्धनि । विजेतुं समरे विप्रं जामदग्न्यं महाबलं । यदि शक्यो मया जेतुं जामदग्न्यः प्रतापवान् ।
शि॰ दैवतानि प्रसन्नानि दर्शयंतु निशां मम । ततो निशि च राजेंद्र प्रसुप्तः शरविक्षतः । दक्षिणेनेह पार्श्वेन प्रभातसमये तदा
। ततो हं विप्रमुख्यैस्तैर्यैरस्मि पतितो रथात् । उत्थापितो धृतश्चैव माभैरिति च सांत्वितः । तएव मां महाराज स्वप्ने दर्श
नमेत्य वै । परिवार्याब्रुवन्वाक्यं तन्निबोध कुरूद्वह । उत्तिष्ठ मा भैर्गांगेय न भयं तेस्ति किंचन । रक्षामहे त्वां कौरव्य स्वश
रीरं हि नो भवान् । न त्वां रामो रणे जेता जामदग्न्यः कथंचन । त्वमेव समरे रामं विजेता भरतर्षभ । इदमस्त्रं सुदयितं प्रत्य
भिज्ञास्यते भवान् । विदितं हि तवाप्येतत्पूर्वस्मिन् देहधारणे । प्राजापत्यं विश्वकृतं प्रस्वापं नाम भारत । न हीदं वेद रा
मोपि पृथिव्यां वा पुमान् क्वचित् । तत्स्मरस्व महाबाहो भृशं संयोजयस्व च । न च रामः क्षयं गंता तेनास्त्रेण नराधिप ॥
एनसा च न संयोगं प्राप्स्यसे जातु मानद । स्वप्स्यते जामदग्न्योसौ त्वद्बाणबलपीडितः । ततो जित्वा त्वमेवैनं पुनरुत्थाप
यिष्यसि । अस्त्रेण दयितेनाजौ भीष्म संबोधनेन वै ॥ एवं कुरुष्व कौरव्य प्रभाते रथमास्थितः । प्रसुप्तं वा मृतं वेति तु
ल्यं मन्यामहे वयं । न च रामेण मर्तव्यं कदाचिदपि पार्थिव । ततः समुत्पन्नमिदं प्रस्वापं युज्यतामिति । इत्युक्त्वांत
र्हिता राजन् सर्व एव द्विजोत्तमाः । अष्टौ सदृशरूपास्ते सर्वे भास्वरमूर्तयः ॥ ॥ इत्युद्योगे अंबोपाख्याने ॥ ॥

स्त्राकाशगंधिष्ण्यमुग्रंविमानंयथाभवतितथादाहकंज्वलंतीमित्यन्वयः॥

उद्योग भीष्मउवाच॥ ॥ततोरात्र्यांव्यतीतायांप्रतिबुद्धोस्मिभारत।ततःसंचिन्त्यवैस्वप्नमवाप्यहर्षमुत्तमं।ततःसमभवद्यु
द्धंममतस्यचभारत।तुमुलंसर्वभूतानांलोमहर्षणमद्भुतं।ततोबाणमयंवर्षंववर्षमयिभार्गवः।न्यवारयमहंतच्च
शरजालेनभारत।ततःपरमसंक्रुद्धःपुनरेवमहातपाः।ह्यस्तनेनचकोपेनशक्तिंवैप्राहिणोन्मयि।इन्द्राशनिस
मस्पर्शांयमदंडसमप्रभां।ज्वलंतीमग्निवत्संख्येलेलिहानांसमंततः।ततोभरतशार्दूलधिष्ण्यमाकाशगंयथा।सा
मामभ्यवधीत्तूर्णंजत्रुदेशेकुरूद्वह।अथासृगरुणंघोरंगिरिगैरिकधातुवत्।रामेणसुमहाबाहोक्षतस्यक्षते
जेक्षणा।ततोहंजामदग्न्यायभृशंक्रोधसमन्वितः।चिक्षेपमृत्युसंकाशंबाणंसर्पविषोपमं।सतेनाभिहतोवीरोलला
टेद्विजसत्तमः।अशोभतमहाराजसशृंगइवपर्वतः।समंरब्धःसमावृत्यशरंकालांतकोपमं।संदधेबलवत्कृष्यघो
रंशत्रुनिबर्हणं।सवक्षसिपपाताथशरोव्यालइवश्वसन्।महींराजंस्ततश्चाहमगमंरुधिराविलः।अवाप्यतुपुन
ःसंज्ञांजामदग्न्यायधीमते।प्राहिण्वंविमलांशक्तिंज्वलंतीमशनीमिव।सातस्यद्विजमुख्यस्यनिपपातभुजांतरे। २८५
विह्वलश्चाभवद्राजन्वेपथुश्चैनमाविशत्।ततस्तंपरिष्वज्यसखाविप्रोमहातपाः।अकृतव्रणःशुभैर्वाक्यै

रश्वासयदनेकधा।समाश्वस्तस्ततोरामःक्रोधामर्षसमन्वितः।प्रादुश्चक्रेतदाब्राह्मंपरमास्त्रंमहाव्रतः।ततस्तत्प्रतिघातार्थंब्रा
ह्ममेवास्त्रमुत्तमं।मयाप्रयुक्तंजज्वालयुगांतमिवदर्शयत्।तयोर्ब्रह्मास्त्रयोरासीदंतरावैसमागमः।असंप्राप्यैवरामंचमांचभ
रतसत्तम।ततोव्योम्निप्रादुरभूत्तेजएवहिकेवलं।भूतानिचैवगंधर्वादेवताश्चैवभारत।संतापंपरमंजग्मुरस्त्रतेजोभिपीडिता
ः।ततश्चचालपृथिवीसपर्वतवनद्रुमा।संतप्तानिचभूतानिविषादंजग्मुरुत्तमं।प्रजज्वालनभोराजन्धूमायंतेदिशोदश।
नस्थातुमंतरिक्षेचशेकुराकाशगास्तदा।ततोहाहाकृतेलोकेसदेवासुरराक्षसे।इदमंतरमित्येवमोक्तुकामोस्मिभारत॥
प्रस्वापमस्त्रंत्वरितोवचनाद्ब्रह्मवादिनां।विचित्रंचतदस्त्रंमेमनसिप्रत्यभात्तदा॥ ॥इत्युद्योगेअंबोपाख्याने॥ ॥भीष्मउ
वाच॥ ॥ततोहलहलाशब्दोदिविराजन्महानभूत्।प्रस्वापंभीष्ममास्वाक्षीरितिकौरवनंदन।अयुंजमेवचैवाहंतदस्त्रं
भृगुनंदने।प्रस्वापंमांप्रयुंजानंनारदोवाक्यमब्रवीत्।एतेवियतिकौरव्यदिविदेवगणाःस्थिताः।तेत्वांनिवारयंत्यद्यमाप्रस्व
पमाप्रयोजय।रामस्तपस्वीब्रह्मण्योब्राह्मणश्चगुरुश्चते।तस्यावमानंकौरव्यमास्मकार्षीःकथंचन।ततोपश्यंदिविष्ठान्वै
तानहंब्रह्मवादिनः।तेमांस्मयंतोराजेंद्रशनकैरिदमब्रुवन्।यथाहभरतश्रेष्ठोनारदस्तत्तथाकुरु।एतद्धिपरमंश्रे
योलोकानांभरतर्षभ।ततश्चप्रतिसंहृत्यतदस्त्रंस्वापनंमहत्।ब्रह्मास्त्रंदीपयांचक्रेतस्मिन्युधियथाविधि।ततोरा

मोरुषितो गछसिंदहष्ट्वा तदस्त्रं विनिवर्त्तितं वा। हतो मि भीष्मेति सुमंदबुद्धिरित्येव वाक्यं महसा व्यमुंचत। ततोपांचया
त्पितरं ऊामदग्न्यः पितुस्तथा पितरं वास्य चान्ये। ततत्वचैनं परिवार्य्य तस्थुरूचुश्चैनं मा त्व पूर्वेदंदन तदानीं॥ ॥पितर
ऊचुः॥ ॥मास्मैवं साहसं तात पुनः कार्षीः कथंचन। भीष्मेण संयुगं गंतुं क्षत्रियेण विशेषतः॥ क्षत्रियस्य तु धर्मोयं
यद्युद्धं भृगुनंदनः स्वाध्यायो व्रतचर्य्या च ब्राह्मणस्य परं धनं। इदंनिमित्तेकस्मिंश्चिदस्माभिः प्रागुदाहृतं। शस्त्रधारण
मत्युग्रं तत्र कार्य्यं कृतं त्वया। वत्स - पर्याप्तमेतावद्भीष्मेण सह संयुगे। विमर्दस्ते महाबाहो व्यपयाहि रणादितः॥ पर्य्या
प्तमेतद्भद्रं ते तव कार्मुकधारणं। विसर्जयैतद्दुर्द्धर्ष तपस्तप्यस्व भार्गव॥ एष भीष्मः शांतनवो देवैः सर्वैर्निवारितः॥
निवर्त्तस्व रणादस्मादिति चैव प्रसादितः॥ रामेण सह मा योत्सीर्गुरुणेति पुनः पुनः। न हि रामो रणे जेतुं त्वया न्याय्यः कु
रूद्वह। मानं कुरुष्व गांगेय ब्राह्मणस्य रणाजिरे। वयं तु गुरवस्तुभ्यं ततस्त्वां वारयामहे। भीष्मो वसूनामन्यतमो दिष्ट्या
जीवसि पुत्रक। गांगेयः शांतनोः पुत्रो वसुरेष महायशाः। कथं शक्यस्त्वया जेतुं निवर्त्तस्वेह भार्गव। अर्जुनः पांडव
श्रेष्ठः पुरंदरसुतो बली। नरः प्रजापतिर्वीरः पूर्वदेवः सनातनः। सव्यसाचीति विख्यातस्त्रिषु लोकेषु वीर्यवान्॥ २५६
भीष्ममृत्युर्यथाकालं विहितो वै स्वयंभुवा॥ ॥भीष्म उवाच॥ ॥एवमुक्तः स पितृभिः पितृन्रामो ब्रवीदि

दं। नाहं युद्धं विनिवर्त्तेयमिति मे व्रतमाहितं। न निवर्त्तितपूर्वश्च कदाचिद्रणमूर्द्धनि। निवर्त्यतामापगेयः कामं युद्धात्पि
तामहाः। न त्वहं विनिवर्त्तेयं युद्धादस्मात्कदाचन। ततस्ते मुनयो राजन्नृचीकप्रमुखास्तदा। नारदेनैव सहिताः सम
गम्येदमब्रुवन्। निवर्त्तस्व रणात्तात मानयस्व द्विजोत्तमं। नेत्यवोचमहं तांश्च क्षत्रधर्मव्यपेक्षया। मम व्रतमिदं लोके ना
हं युद्धात्कदाचन। विमुखो विनिवर्त्तेयं पृष्ठतोभ्याहतः शरैः। नाहं लोभान्न कार्पण्यान्न भयान्नार्थकारणात्। त्यजेयं शा
श्वतं धर्ममिति मे निश्चिता मतिः। ततस्ते मुनयः सर्वे नारदप्रमुखा नृप। भागीरथी च मे माता रणमध्यं प्रपेदिरे। तथैवा
त्तशरो धन्वी तथैवाहं दृढनिश्चयः। स्थिरोहमाहवे योद्धुं ततस्ते राममब्रुवन्। समेत्य सहिता भूयः समरे भृगुनंदनं। नावनी
तं हि हृदयं विप्राणां शाम्य भार्गव। राम राम निवर्त्तस्व युद्धादस्माद्द्विजोत्तम। अवध्यो वै त्वया भीष्मस्त्वं च भीष्मस्य
भार्गव। एवं ब्रुवंतस्ते सर्वे प्रतिरुध्य रणाजिरं। न्यासयांचक्रिरे शस्त्रं पितरो भृगुनंदनं। ततोहं पुनरेवाथ तानष्टौ ब्रह्म
वादिनः। अद्राक्षं दीप्यमानान्वै ग्रहानष्टाविवोदितान्। ते मां सप्रणयं वाक्यमब्रुवन्समरे स्थितं। प्रैहि रामं महाबाहो
गुरुं लोकहितं कुरु। दृष्ट्वा निवर्त्तितं रामं सुहृद्वाक्येन तेन वै। लोकानां च हितं कुर्वन्नहमप्याददे वचः। ततोहं राममा

द्युवंवदेत्तत्र विस्मितः॥ रामस्त्वास्त्वस्मरन्प्रेम्णा मामुवाच महातपाः॥ त्वत्समो नास्ति सो लोके स्मिन्क्षत्रियः पृथि
वीचरः॥ गम्यतां भीष्म युद्धेस्मिंस्तोषितोहं भृशं त्वया॥ मम चैव समक्षं तां कन्यामाहूय भार्गवः॥ उक्तवान्दीनया वा
चा मध्ये तेषां महात्मनां॥ ॥इति उद्योग अंबोपाख्याने॥ ॥राम उवाच॥ प्रत्यक्षमेतल्लोकानां सर्व
षामेव भामिनि॥ यथा मया परं शक्त्या कृतं वै पौरुषं परं॥ न चैव युधि शक्नोमि भीष्मं शस्त्रभृतां वरं॥ विशेषयि
तुमत्यर्थमुत्तमास्त्राणि दर्शयन्॥ एषा मे परमा शक्तिरेतन्मे परमं बलं॥ यथेष्टं गम्यतां भद्रे किमन्यद्वा करोमि ते॥
भीष्ममेव प्रपद्यस्व न तेन्या विद्यते गतिः॥ निर्जितो ह्यस्मि भीष्मेण महास्त्राणि प्रमुंचता॥ एवमुक्त्वा ततो रामो वि
निःश्वस्य महामनाः॥ तूष्णीमासीत्ततः कन्या प्रोवाच भृगुनंदनं॥ भगवन्नेवमेवैतद्यथाह भगवांस्तथा॥ अजय्यो युधि भीष्मो
यमपि देवैरुदारधीः॥ यथाशक्ति यथोत्साहं मम कार्यं कृतं त्वया॥ अनिवार्यं रणे वीर्यमस्त्राणि विविधानि च॥
न चैवाहमनेनाद्य? न चाहमेनं यास्यामि पुनर्भीष्मं कथंचन॥ गमिष्यामि तु तत्राहं यत्र भीष्मं तपोधन॥ २५७
समरे पातयिष्यामि स्वयमेव भृगूद्वह॥ एवमुक्त्वा ययौ कन्या रोषव्याकुललोचना॥ तापस्ये धृतसंकल्पा मम

चिंतयत उपायं च तत मा भिरालोच्य रुते॥ ततः स प्रहृष्ट उन्मानाश्चोस्तन्निश्चायितं रणो वार्य्य

चिंतयती वधं॥ ततो महेंद्रं सह तैर्मुनिभिर्भृगुसत्तम॥ यथागतं तथा सोगान्मामुपामंत्र्य भारत॥ ततोहं रथमारुह्य स्तूय
मानो द्विजातिभिः॥ प्रविश्य नगरं मात्रे सत्यवत्यै न्यवेदयं॥ यथावृत्तं महाराज सा च मां प्रत्यनंदत॥ पुरुषांश्चादिशं प्राज्ञान्
कन्यावृत्तांतकर्मणि॥ दिवसे दिवसे ह्यस्या गतजल्पितचेष्टितं॥ प्रत्याहरंश्च मे युक्ताः स्थिताः प्रियहिते सदा॥ यदैव हि वनं प्रा
यात्सा कन्या तपसे धृता॥ तदैव व्यथितो दीनो गतचेता इवाभवं॥ न हि मां क्षत्रियः कश्चिद्वीर्येण व्यजयद्युधि॥ ऋते ब्रह्मवि
दस्तात तपसा संशितव्रतात्॥ अपि चैतन्मया राजन्नारदेपि निवेदितं॥ व्यासे चैव तथा कार्यं तौ चोभौ मामवोचतां॥ न विषा
दस्त्वया कार्यो भीष्म काशिसुतां प्रति॥ दैवं पुरुषकारेण को निवर्तितुमुत्सहेत्॥ सा कन्या तु महाराज प्रविश्याश्रममंडलं॥ य
मुनातीरमाश्रित्य तपस्तेपेतिमानुषं॥ निराहारा कृशा रूक्षा जटिला मलपंकिनी॥ षण्मासान्वायुभक्षा च स्थाणुभूता तपोधने॥
यमुनाजलमाश्रित्य संवत्सरमथापरं॥ उदवासं निराहारा पारयामास भामिनी॥ शीर्णपर्णेन चैकेन पारयामास सापरं॥ संवत्सरं
तीव्रकोपा पादांगुष्ठाग्रधिष्ठिता॥ एवं द्वादश वर्षाणि तापयामास रोदसी॥ निवर्त्यमानापि च सा ज्ञातिभिर्नैव शक्यते॥ ततो हि
समगमद्वत्सभूमिं सिद्धचारणसेवितां॥ आश्रमं पुण्यशीलानां तापसानां महात्मनां॥ तत्र पुण्येषु तीर्थेषु साप्लुतांगी दिवानि नि
श व्यचरत काशिकन्या सा यथाकामविचारिणी॥ नंदाश्रमे महाराज ततोलूकाश्रमे शुभे॥ च्यवनस्याश्रमे चैव ब्रह्मणः स्था

स्त्र इष्टमे मा मेस्त्र इम मासमर्थ्यं तां वस्तु च भिद्देहमेदं। परिधावंती पतिता मृता।

उद्योग

स्नुष्टमे तएव वत्साभ्रमागे देवयजने द्वारएप्सुविवहा। भोगवत्यां महाराज कौशिकस्याश्रमे तथा। मांडव्यस्याश्रमे रा
जन्दिलीपस्याश्रमे तथा। रामह्रदे च कौरव्य पैलगार्ग्यस्य चाश्रमे। एतेषु तीर्थेषु तदा काशिकन्या विगाहते। आप्ला
वयत गात्राणि व्रतमास्थाय दुष्करं। तामब्रवीच्च कौरव्य मम माता जले स्थिता। किमर्थं क्लिश्यसे भद्रे तथ्यमेतद्वदस्व मे।
सैनामथाब्रवीद्राजन् कृतांजलिरनिंदिता। भीष्मेण समरे रामो निर्जितश्चारुलोचने। कोऽन्यस्तमुत्सहेज्जेतुमुद्यते
षु महीपतिः। साहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणं। विचरामि महीं देवि यथा हन्यामहं नृपं। एतद्व्रतफलं देहे प
रमास्मिन्यथा हि मे। ततोऽब्रवीत्सागरगा जिह्मं चरसि भामिनि। नैष कामोऽनवद्यांगि शक्यः प्राप्तुं त्वया रणे। यदि
भीष्मविनाशाय काश्ये चरसि व्रतं। व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि। नदी भविष्यसि शुभे कुटिला वार्षिकोदका
। दुस्तीर्था तु न विज्ञेया वार्षिकी नाष्टमासिकी। भीममाहवती घोरा सर्वग्राहभयंकरी। एवमुक्त्वा ततो राजन्काशिकन्यां न्यव
र्तत। मातामम महाभागा स्मयमानेव भाविनी। कदाचिदष्टमे मासि कदाचिद्दशमे तथा। न प्राश्नीतोदकमपि पुनः सा वर
वर्णिनी। सा वत्सभूमिं कौरव्य तीर्थलोभात्ततस्ततः। पतिता परिधावंती पुनः काशिपतेः सुता। सा नदी वत्सभूम्यां तु प्र
थितांबेति भारत। वार्षिकी ग्राहबहुला दुस्तीर्था कुटिला तथा। सा कन्या तपसा तेन देहार्धेन व्यजायत। नदी च राजन्वत्सेषु २५८

कन्योजन्मांतरेण तपस्यं धृतनिश्चयं पूर्वजातिस्मरणात्॥

कन्या चैवाभवत्तदा॥ ॥इत्युद्योगे अंबोपाख्याने॥ ॥भीष्म उवाच॥ ॥ततस्ते तापसाः सर्वे तपसे धृतनिश्चयाः॥
॥दृष्ट्वा निवर्तयामासुः किं कार्यमिति चाब्रुवन्। तानुवाच ततो वृद्धांस्ततः कन्या ऋषींस्तदा। निराकृतास्मि भीष्मेण भ्रंशिता प
तिधर्मतः। वधार्थं तस्य दीक्षा मे न लोकार्थं तपोधनाः। निहत्य भीष्मं गच्छेयं शांतिमित्येव निश्चयः। यत्कृते दुःखवसतिमिमां
प्राप्तास्मि शाश्वतीं। पतिलोकाद्विहीना च नैव स्त्री न पुमानिह। नाहत्वा युधि गांगेयं निवर्तिष्ये तपोधनाः। एष मे हृदि संकल्पो
यदिदं कथितं मया। स्त्रीभावे परिनिर्विण्णा पुंस्त्वार्थे कृतनिश्चया। भीष्मे प्रतिविधास्यामि नास्मि वार्येति वै पुनः। तां देवो दर्श
यामास शूलपाणिरुमापतिः। मध्ये तेषां महर्षीणां स्वेन रूपेण तापसीं। छंद्यमाना वरेणाथ सा वव्रे मत्पराजयं। हनि
ष्यसीति तां देवः प्रत्युवाच मनस्विनीं। ततः सा पुनरेवाथ कन्या रुद्रमुवाच ह। उपपद्येत्कथं देव स्त्रियो युधि जयो मम।
स्त्रीभावेन च मे गाढं मनः शांतमुमापते। प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः। यथा स सत्यो भवति तथा कुरु वृषध्वज। य
था हन्यां समागम्य भीष्मं शांतनवं युधि। तामुवाच महादेवः कन्यां किल वृषध्वजः। न मे वागनृतं प्राह सत्यं भद्रे भविष्यति। ह
निष्यसि रणे भीष्मं पुरुषत्वं च लप्स्यसि। स्मरिष्यसि च तत्सर्वं देहमन्यं गता सती। द्रुपदस्य कुले जाता भविष्यसि महार
थः। शीघ्रास्त्रश्चित्रयोधी च भविष्यसि सुसंमतः। यथोक्तमेव कल्याणि सर्वमेतद्भविष्यति। भविष्यसि पुमान्पश्चात्क

उद्योग

साचित्कालपर्य्ययात्।एवमुक्त्वामहादेवःकपर्द्दीवृषभध्वजः॥पश्यतामेवविप्राणांतत्रैवांतरधीयत।ततःसा
पश्यतांतेषांमहर्षीणामनिंदिता।समाहृत्यवनेतस्मात्काष्ठानिवरवर्णिनी।चितांकृत्वासुमहतींप्रदायचहुताश
नं।प्रदीप्तेग्नौमहाराजरोषदीप्तेनचेतसा।उक्त्वाभीष्मवधायेतिप्रविवेशहुताशनं।ज्येष्ठाकाशिसुताराजन्य
मुनामभितोनदीं॥ ॥इत्युद्योगेअंबोपाख्याने॥ ॥दुर्य्योधनउवाच॥ ॥कथंशिखंडीगांगेयकन्याभूत्वापुरा
तदा।पुरुषोभूद्युधिश्रेष्ठतन्मेब्रूहिपितामह॥ ॥भीष्मउवाच॥ ॥भार्यातुतस्यराजेंद्रद्रुपदस्यमहीपतेः।महिषीद
यिताह्यासीदपुत्राचविशांपते।एतस्मिन्नेवकालेतुद्रुपदोवैमहीपतिः॥अपत्यार्थंमहाराजतोषयामासशंक
रं।अस्मद्वधार्थंनिश्चित्यतपोघोरंसमास्थितः।लेभेकन्यांमहादेवात्पुत्रोमेस्यादितिब्रुवन्।भगवन्पुत्रमिच्छामिभीष्मं
प्रतिचिकीर्षया।इत्युक्तोदेवदेवेनस्त्रीपुमांस्तेभविष्यति।निवर्तस्वमहीपालनैतज्जात्वन्यथाभवेत्।सतुगत्वाचनगरं
भार्यामिदमुवाचह।कृतोयत्नोमहादेविपुत्रार्थेतपसामया।कन्याभूत्वापुमान्भावीइतिचोक्तोस्मिशंभुना।पुनःपुन
र्याच्यमानोदिष्टमित्यब्रवीच्छिवः।नतदन्यद्धिभविताभवितव्यंतत्तथा।ततःसानियताभूत्वाऋतुकालेमनस्विनी।प २९९
त्नीद्रुपदराजस्यद्रुपदंप्रविवेशह।लेभेगर्भंयथाकालंविधिदृष्टेनकर्म्मणा।पार्षतस्यमहीपालयथामांनारदोब्र

ख्यायमानानमल्लोकेषु॥

ता।ततोदधारसादेवीगर्भंराजीवलोचना।तांसराजाप्रियांनार्यांद्रुपदःकुरुनंदन।पुत्रस्नेहान्महाबाहुःसुखंपर्यचर
त्तदा।सर्वानभिप्रायकृतान्भार्यालभतकौरव।अपुत्रस्यसतोराज्ञोद्रुपदस्यमहीपतेः।यथाकालंतुसादेवीमहिषी
द्रुपदस्यह।कन्यांप्रवररूपांतांप्राजायतनराधिप।अपुत्रस्यतुराज्ञःसाद्रुपदस्यमनस्विनी।ख्यापयामासरा
जेंद्रपुत्रोह्येषममेतिवै।ततःसराजाद्रुपदःप्रच्छन्नायानराधिप।पुत्रवत्पुत्रकार्य्याणिसर्वाणिसमकारयत्।रक्षणं
चैवमंत्रस्यमहिषीद्रुपदस्यसा।चकारसर्वयत्नेनब्रुवाणापुत्रइत्युत।नचतांवेदनगरेकश्चिदन्यत्रपार्षतात्।श्रद्द
धानोहितद्वाक्यंदेवस्याद्भुततेजसः।छादयामासतांकन्यांपुमानितिचसोब्रवीत्।राजकर्म्माणिसर्वाणिकारयामासपा जात
र्थिवः।ध्रुवहिधानस्तुकातिशिखंडीनिवर्ततेविदुः।अहमेकस्तुचारणवचनान्नारदस्यतु।ज्ञातवान्देववाक्येनअंबा
यातपसातथा॥ ॥इत्युद्योगेअंबोपाख्याने॥ ॥भीष्मउवाच॥ ॥चकारद्रुपदोयत्नंसुतायाःसर्वकर्मसु।ततोले
ख्यादिषुतथाशिल्पेषुचपरंतप।इष्वस्त्रेचैवराजेंद्रद्रोणशिष्योबभूवह।तस्यमातामहाराजराजानंवरवर्णिनी।चोदया
मासभार्यार्थंकन्यायाःपुत्रवत्तदा।ततस्तांपार्षतोदृष्ट्वाकन्यांसंप्राप्तयौवनां।स्त्रियंमत्वाततश्चिंतांप्रपेदेसहभार्यया

उद्योग

॥द्रुपद उवाच॥ ॥कन्या ममेयं संप्राप्ता यौवनं शोकवर्धिनी। मया प्रवादिता चेयं वचनात्शूलपाणिनः॥ ॥भार्योवा
च॥ ॥तत्तस्मिन् ख्याम् महाराज भविष्यतीकथं च न। त्रिलोककर्तृकस्माद्धि रथ्या च कुमिथ्या ईर्ति। यदि ते रोचते नाथ वक्ष्या
मि शृणु मम वचः। श्रुत्वेदानीं प्रपद्येथाः स्वां मतिं पृषतात्मज। क्रियतामस्य यत्नेन विधिवद्दारसंग्रहः। सविता तद्वचनमत्यमि
ति मे निश्चिता मतिः। ततस्तौ निश्चयं कृत्वा तस्मिन्कार्ये यदंपती। वरयां चक्रतुः कन्यां दशार्णाधिपतेः सुतां। ततो राजा द्रुपदो
राजसिंहः सर्वान्राज्ञः कुलतः समीक्ष्य। दाशार्णकस्य नृपतेस्तनयां शिखण्डिनो वरयामास दारान्। हिरण्यवर्मेति नृपो यो
सौ दाशार्णकः स्मृतः। स च प्रादान्महीपालः कन्यां तस्मै शिखण्डिने। स च राजा दशार्णेषु महानासीत्सुदुर्जयः। हिरण्यव
र्मा दुर्धर्षो महासेनो महायशाः। कृते विवाहे तु तदा सा कन्या राजसत्तम। यौवनं तु समापन्ना सा च कन्या शिखण्डिनी। हतदा
राः शिखण्डी च काम्पिल्यं पुनरागमत्। ततः सा वेद तां कन्यां कंचित्कालं स्त्रियं किल। हिरण्यवर्मणः कन्या ज्ञात्वा तां तु शिख
ण्डिनीं। धात्रीणां च सखीनां च व्रीडमाना न्यवेदयत्। कन्यां पंचालराजस्य सुतां तां वै शिखण्डिनीं। ततस्ता राजशार्दूल धा
त्र्यो दाशार्णिका मृदा। जग्मुरार्तिं परां प्रेष्याः प्रेषयामासुरेव च। ततो दशार्णाधिपतेः प्रेष्याः सर्वान्यवेदयन्। विप्रलं ३५५७

अभिवंगाद्धियावरणात्। तं कुमारं कृतं ज्ञात्वा ज्ञाय ज्ञाप्य गंकृकिं॥

नं यथा वृत्तं मत्कृते कोपपार्थिवः। शिखण्डी अपि महाराज पुंवद्राजकुले तदा। विजहार मुदा युक्तः स्त्रीत्वं मेवाति रोचय
न्। ततः कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ। हिरण्यवर्मा राजेन्द्र रोषादार्तिं जगाम ह। ततो दाशार्णको राजा तीव्रकोपस
मन्वितः। दूतं प्रस्थापयामास द्रुपदस्य निवेशनं। ततो द्रुपदमासाद्य दूतः कांचनवर्मणः। एक एकांते सुसाद्य रहो वच
नमब्रवीत्। दशार्णराजो राजंस्त्वामिदं वचनमब्रवीत्। अभिषंगात्प्रकुपितो विप्रलब्धोस्म्यनघ। अवमन्यसे मां नृ
पते नूनं दुर्मंत्रितं तवा यत्त्वं कन्यां स्वकन्यार्थे मोहाद्याचितवानसि। तस्याद्य विप्रलब्धस्य फलं प्राप्नुहि दुर्मते। एष त्वां
सजनामात्यमुद्धरामि स्थिरो भव॥ ॥इत्युद्योगे बोपाख्याने॥ ॥भीष्म उवाच॥ ॥एवमुक्तस्य दूतेन द्रुपदस्य त
दा नृप। चोरस्येव गृहीतस्य न प्रावर्तत भारती। स यत्नमकरोत्तीव्रं संबंधिनमनुमानने। दूतैर्मधुरसंभाषैर्नैतदस्तीति सं
दिशन्। स राजा भूय एवाथ ज्ञात्वा तत्त्वमथागमत्। कन्येति पांचालसुतां त्वरमाणो विनिर्ययौ। ततः स प्रेषयामास मित्रा
णाममितौजसां। दुहितुर्विप्रलंभं तं धात्रीणां वचनात्तदा। ततः समुदयं कृत्वा बलानां राजसत्तमः। अभियाने मतिं चक्रे द्रु
पदं प्रति भारत। ततः संमंत्रयामास मंत्रिभिः स महीपतिः। हिरण्यवर्मा राजेन्द्र पांचाल्यं पार्थिवं प्रति। तत्र वै निश्चितं तेषा
मभूद्राज्ञां महात्मनां॥

किंतथ्यमथयंपुमानितितिमिथ्याचेतत्तशिखंडिः कृपयायतिविधास्येतत्त्वधर्मतः ॥ एवंमचिंतितोविचिंतोमहादेवेनख्या
तथ्यंभवतिचाद्दलत्तकन्याराजेंद्रशिखंडिनी ॥ वधायपंचालराजानमानयिष्यामदेहहं ॥ अन्यंराज्ञानमाधायपंचालेपुनरे
स्वाराधातयिष्यामनृपतिंपांचालंशिखंडिनं ॥ ततत्रानतमासाद्यपुत्रतरैतात्त्वराधिप ॥ ह्रस्वायध्यत्यामंतायातिदन्मीति
स्विरोमवः सहिपुरुहत्यावेनीतःकिल्विषीचनराधिपः ॥ भयंतीव्रमत्तुपांस्तोद्रुपदःपृथिवीपतिः ॥ विसृज्यदूतान्दाशा
र्णेद्रुपदःशोकमूर्छितः ॥ सामत्यनाथ्यरिहितवाक्यमाद्दतराधिपः ॥ भायनमहताविष्टोहृदिशोकेनचाहतः ॥ पांचालरा
जोदयितांमातरंवैशिखंडिनः ॥ अब्रवीत्पश्येतिमांकोयानवधीसुमहाबलः ॥ हिरण्यवर्मानृपतिःकर्षमाणोवरूथिनीं ॥
किमिदानींकरिष्यावोमूढाकन्यामिमांप्रति ॥ शिखंडीकिलपुत्रस्तेकन्येतिपरिशंकितः ॥ इतिसंचित्यपत्नेनसमित्र
:सबलानुगः ॥ वंचितोस्मीतिमन्वानोमांकिलोद्धर्तुमिच्छति ॥ किमत्रतथ्यंसुश्रोणिमिथ्याकिंब्रूहिशोभने ॥ श्रुत्वात्वत्तः
शुभेवाक्यंसंविधास्याम्यहंतथा ॥ अहंहिसंशयप्राप्तोबालाचेयंशिखंडिनी ॥ सात्वंसर्वेविमोक्षायतत्त्वमाख्याहि
शुभेवाक्यंसंविधास्याम्यहंतथा ॥ अदंहिसंशयप्राप्तोबालाचेयंशिखंडिनी ॥ त्वंचसर्वेविमोक्षायतत्त्वमाख्याहि३
बंतः ॥ तथाविदंधांसुश्रोणिकृत्यमासुक्तुचिस्मिते ॥ शिखंडिनेचमात्तित्स्वविधास्येतनत्तवेनः ॥ कृपयादंवरारोदेवंधि ३५१
तःपुत्रधर्मतः ॥ मयादाशार्णकोराजावंचितःसमहीपतिः ॥ तदाब्रूहिमहाभागेविधास्येतत्रयद्धितं ॥ जानताहितनरे
द्रेणख्यापनार्थंपरस्यवै ॥ प्रकाशंचोदितादेवीप्रत्युवाचमहीपतिं ॥ ॥
पनार्थंपरस्यनमाद्यैतावतेकाल्यमेतत्तशान्तनतोममेपराधइति ॥

पुरख्यापनतद्दिरण्यवर्मप्रतिपाद्यैतेभानतापिस्त्रीवेडहितःएकाशेलोकसमक्षेहृष्टा ॥

इत्युद्योगेअंबोपाख्यान ॥ ॥भीष्मउवाच ॥ ॥ततःशिखंडिनोमातायथातत्त्वंनराधिप ॥ आचचक्षेमहाबाहोभर्त्रेक
न्यांशिखंडिनीं ॥ अपुत्रयामयाराजन्सपत्नीनांभयादिदं ॥ कन्याशिखंडिनीजातापुरुषोवैनिवेदिता ॥ त्वयाचैवनरश्रेष्ठ
तान्मप्रीत्यानुमोदितं ॥ पुत्रकर्मकृतंचैवकन्यायाःपार्थिवर्षभ ॥ भार्याचोढात्वयाराजन्दशार्णाधिपतेःसुता ॥ मया
चप्रत्यभिहितंदेववाक्यार्थदर्शनात् ॥ कन्याभूत्वापुमान्भावीत्येवंचैतदुपेक्षितं ॥ एतच्छ्रुत्वाद्रुपदोयज्ञसेनःसर्वंतत्त्वंमंत्रविद्भ्योनि
वेद्यतत् ॥ मंत्रंराजामंत्रयामासराजन्यथायुक्तंरक्षणेवैप्रजानां ॥ संबंधकंचैवसमर्थ्यतस्मिन्दाशार्णकेवैनृपतौनरेंद्र
॥ स्वयंकृत्वाविप्रलंभंयथावन्मंत्रैकाग्रोनिश्चयंवैजगाम ॥ स्वभावगुप्तंनगरमापत्कालेतुभारत ॥ गोपयामाससराजेंद्र
सर्वतःसमलंकृतं ॥ आर्तिंचपरमांराजन्देवीदेवपरंतदा ॥ अब्रवीच्चप्रजानामपात्रात्र्यविचनमब्रवीत ॥ देवानांप्रतिपत्तिश्चसत्सा
साधुमतासदा ॥ किंपुनःदुःखार्णवंप्राप्तस्मात्पूजयतांगुरून् ॥ दैवतानिचसर्वाणिपूज्यंतांभूरिदक्षिणाः ॥ अग्नयश्चापिहूय
तांदाशार्णप्रतिषेधने ॥ अयुद्धेननिवृत्तिंचमनसाचिंतयप्रभो ॥ देवतानांप्रसादेनसर्वमेतद्भविष्यति ॥ मंत्रिभिर्मं
त्रितंसार्धंत्वयापृथुललोचन ॥ पुरस्यास्याविनाशायतथाराजन्तथाकुरु ॥ दैवंहिमानुषोपेतंभृशंसिध्यतिपार्थिव ॥ प
रस्परविरोधात्तुनसिद्धिरस्तिचैतयोः ॥ तस्माद्विधायनगरेविधानंसचिवैःसह ॥ अर्चयस्वयथाकामंदेवतानिविशांप

सुधारूपा इति कालेपनं यस्याः॥ योगिका धूपः धूपोगरुप्रवृत्तिः॥ अनतिदोहसमयं॥


ना। एवं संतापमापन्नौ तौ दृष्ट्वा शोकपरायणौ। शिखंडिनी तदा कन्या व्रीडितेव तपस्विनी। ततः सा चिंतयामास मत्कृते दुःखि-
तावुभौ। इमाविति ततश्चक्रे मतिं प्राणविनाशने। एवं सा निश्चयं कृत्वा भृशं शोकपरायणा। निर्जगाम गृहं त्यक्त्वा गहनं निर्ज-
नं वनं। यक्षेणर्द्धिमता राजन् स्थूणाकर्णेन पालितं। तद्भयादेव च जनो विसर्जयति तद्वनं। तत्र च स्थूणभवनं सुधामृत्तिक-
लेपनं। लाजोल्लापिकधूमाढ्यमुच्चप्राकारतोरणं। तत्प्रविश्य शिखंडी सा द्रुपदस्यात्मजा नृप। अनश्नाना बहुतिथं शरीरमु-
पशोषयत्। दर्शयामास तां यक्षः स्थूणो मार्दवसंयुतः। किमर्थोऽयं तवारंभः करिष्ये ब्रूहि माचिरं। अशक्यमिति सा यक्षं पुनः पुन-
रुवाच ह। करिष्यामीति वै क्षिप्रं प्रत्युवाच स गुह्यकः। धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे। अदेयमपि दास्यामि
ब्रूहि यत्ते विवक्षितं। ततः शिखंडी तत्सर्वमखिलेन न्यवेदयत्। तस्मै यक्षप्रधानाय स्थूणाकर्णाय भारत॥ शिखंड्युवाच
अपुत्रो मे पिता यक्ष नचिरान्नाशमेष्यति। अभियास्यति सक्रोधो दशार्णाधिपतिर्हि तं। महाबलो महोत्साहः स हेमकवचो
नृपः। तस्माद्रक्षस्व मां यक्ष मातरं पितरं च मां। प्रतिज्ञातो हि भवता दुःखप्रतिगमो मम। भवेयं पुरुषो यक्ष त्वत्प्रसादादनिंदि- 
ता। यावदेव स राजा वै नोपयाति पुरं मम। तावदेव महायक्ष प्रसादं कुरु गुह्यक॥ ३ ॥ इत्युद्योगअंबोपाख्यान॥ ॥

अन्योन्यस्यअन्योन्यं। चक्रातां स्थूणान चापयः। शिखंडिनांगा। क्रियतइत्यर्थः॥

भीष्म उवाच॥ शिखंडिवाक्यं श्रुत्वाथ स यक्षो भरतर्षभ। प्रोवाच मनसा चिंत्य दैवेनोपनिपीडितः। भवितव्यं तथा त-
द्धि मम दुःखाय कौरव। भद्रे कामं करिष्यामि समयं तु निबोध मे। किंचित्कालांतरं दास्ये पुंलिंगं स्वमिदं तव। आगंतव्यं च
या कालं सत्यं चैव वदस्व मे। प्रभुः संकल्पसिद्धोऽस्मि कामचारी विहंगमः। मत्प्रसादात्पुरं चैव त्राहि बंधूंश्च केवलं। स्त्री-
लिंगं धारयिष्यामि त्वदीयं पार्थिवात्मजे। सत्यं मे प्रतिजानीहि करिष्यामि प्रियं तव॥ शिखंड्युवाच॥ ॥ प्रतिदास्या-
मि भगवन् पुंलिंगं तव सुव्रत। किंचित्कालांतरं स्त्रीत्वं धारयस्व निशाचर। प्रतियाते दशार्णे तु पार्थिवे हेमवर्मणि।
कन्यैव हि भविष्यामि पुरुषस्त्वं भविष्यसि॥ ॥ भीष्म उवाच॥ ॥ इत्युक्त्वा समयं तत्र चक्राते तावुभौ नृप। अन्यो-
न्यस्यानभिद्रोहे तौ संक्रामयतां ततः। स्त्रीलिंगं धारयामास स्थूणो यक्षोऽथ भारत। यक्षरूपं च तद्दीप्तं शिखंडी प्रत्यपद्यत। ततः
शिखंडी पांचाल्यः पुंस्त्वमासाद्य पार्थिव। विवेश नगरं हृष्टः पितरं च समासदत्। यथावृत्तं तु तत्सर्वमाचख्यौ द्रुपदस्य तत्।
द्रुपदस्तस्य तत्सर्वं हर्षमाहारयत्परं। सभार्यस्तच्च सस्मार महेश्वरवचस्तदा। ततः संप्रेषयामास दशार्णाधिपतेर्नृप।
पुरुषोऽयं मम सुतः श्रद्धत्तां मे भवानिति। अथ दाशार्णको राजा सहसाभ्यागमत्तदा। पंचालराजं द्रुपदं दुःखशोकसम-
न्वितः। ततः काम्पिल्यमासाद्य दशार्णाधिपतिस्तदा। प्रेषयामास सत्कृत्य दूतं ब्रह्मविदां वरं। ब्रूहि मद्वचनाद्दूत पांचाल्यं तं

आगमःपरीक्षा॥

रूपाधमं॥ यत्स्वकन्यां स्वकन्यार्थे हृतवानसि दुर्मते। फलं तस्यावलेपस्य द्रष्टास्यद्य न संशयः॥ एवं दूतमुखाच्छ्रुत्वा नाम्ना सो ह्यणो रा
जसत्तमाहूतः प्रयातो ताम्रदशार्णाधिपचोदितः। ततः प्रासादयामास सुमाधवद्रुपदः सुतां। तस्मै पांचालको राजा गामर्घं वृषं
मर्चितं। प्रेषयामास राजेंद्र मद्रतत्रैशिखंडिना। नाहं जाने नान्यमेदं सवाक्यामतवबालकः॥ यदुक्तं तन्नवारणा राज्ञा काच
नवर्मणा। यत्नेनमधमाचारं दुहितुस्त्वं निवेदितः। तस्य पापस्य करणात्फलं प्राप्नुहि दुर्मते। दारैर्द्विषन्नपतमभाधरणा
हर्हमि। उद्धरिष्यामि समग्रं सामात्यसुतबांधवं। तदुपालंभसंयुक्तं श्रावितः किल पार्थिवः। दशार्णपतिना राज्ञा मंत्रिम
ध्ये पाराधमाः। अन्येवं दूतास्य श्रुत्वा द्रुपदः प्रणयाद्वितः। यदास्मो न वा न दूतसमं बंधिवचनात्ततः। अथ प्रवरं पतिवचोऽहं तोर
ज्ञावदिष्यति। ततः संप्रेषयामास द्रुपदोऽपि महात्मने। हिरण्यवर्मणो दूतं ब्राह्मणायारगं। तमागम्य तु राजानं दशा
र्णाधिपतितदा तोतदाक्यमादद्दे राजन्द्रुपदकं दुपदनदः। आगमः क्रियतां क्षेत्रः कुमारार्यं सुतामम। माध्येतदुक्तं केना
पितन्नश्रद्धेयमिस्वतां। ततः स राजा द्रुपदस्य श्रुत्वा विमर्शयुक्तो युवतीर्वरिष्ठाः। संप्रेषयामास सुचारुरूपाः शिखंडि
नं स्त्री पुमान्वेति विद्धुं। ताः प्रेषितास्तत्त्वभावं विदित्वा प्रीत्या राजन्नच शशंसुरहितं वै। शिखंडिनं पुरुषं कौरवेंद्र दशार्णरा
राज्ञाय महौजसाय। ततः श्रुत्वा तु राजा स आगमं प्रीतिमानभूत्। संबंधिना समागम्य हृष्टो वासमवात्स्यत। शिखंडिने च 

सुदितः प्रादाद्धिनिनारत्नवरः। हस्तिनोऽश्वांश्च गाश्चैव दासीर्बहुशतास्तथा। पूजितश्च प्रतियायौ निर्भर्त्स्य तनयां किल। वि
नीतकिल्बिषे प्रीति हेमवर्मणि पार्थिवो पतिग्रयाते दाशार्णे सो हृष्टरूपा शिखंडिनी। कस्यचित्त्वथ कालस्य कुवेरा
नुचरो नरः। लोकयात्रां प्रकुर्वाणः स्थूणोऽप्यागाद्विमानेन। स तदृष्ट्वोपरि वर्तमानं आलोकयामास धनाधिगो स्था
स्थूणस्य यक्षस्य विवेश्म विस्मयः। स्वलंकृतं माल्यगुणैर्विविधैः। लाजैश्च गंधैश्च तथा वितानैरभ्यर्चितं धूपनधूपितं च।
ध्वजैः पताकाभिरलंकृतं च भक्ष्यान्नपेयामिषदत्तहोमं। तत्स्थानं तस्य हृष्टा तु सर्वतः समलंकृतं। मणिरत्नसुवर्णानामा
भाभिः परिपूरितं। नानागंधसुगंधाढ्यं सिक्तसंमृष्टशोभितं। अथाब्रवीद्यक्षपतिस्तान्यक्षाननुगांस्तदा। अलंकृत
मिदं वेश्म स्थूणस्यामितविक्रमाः। नापसर्पति मां चैव कस्मादद्य सुमंदधीः। यस्माज्जानन् सुमंदात्मा मामसौ नो
पतिष्ठति। तस्मात्तस्मै महादंडो धार्यः स्यादिति मे मतिः॥ ॥यक्षा ऊचुः॥ द्रुपदस्य सुता राजन् राज्ञो जाता शि
खंडिनी। तस्यै निमित्ते कस्मिंश्चित्प्रादात्पुरुषलक्षणं। अग्रहील्लक्षणं स्त्रीणां स्त्रीभूतस्तिष्ठते गृहे। नोपसर्पति त
नासौ सव्रीडः स्त्रीस्वरूपवान्। एतस्मात्कारणाद्राजन् स्थूणो न त्वाद्य सर्पति। श्रुत्वा कुरुष्व यान्याय्यं विमानमिह तिष्ठतां

उद्योग आनीयतां स्थूणो इति तत्र यक्षाधिपोऽब्रवीत्। कर्तास्मि निग्रहं तस्य प्रत्युवाच पुनः पुनः॥ सोऽभ्यगच्छत यक्षेन्द्रमाहूतः पृ
थिवीपते। स्त्रीस्वरूपो महाराज तस्थौ व्रीडासमन्वितः॥ तं शशापाथ संक्रुद्धो धनदः कुरुनंदन। एवमेव भवत्वद्य स्त्रीत्वं पाप
स्य गुह्यकाः॥ ततोऽब्रवीद्यक्षपतिर्महात्मा यस्मादकास्त्ववमन्य यक्षान्। शिखंडिनो लक्षणं पापबुद्धे स्त्रीलक्षणं चाग्रही
: पापकर्मन्॥ अप्रवृत्तं सुदुर्बुद्धे यस्मादेतत्त्वया कृतं। तस्मादद्य प्रभृत्येव स्त्रीत्वं मा पुरुषस्तथा॥ ततः प्रसादयामासुर्वै
विश्रवणं किल। स्थूणस्यार्थे कुरुस्वांतं शापस्येति पुनः पुनः॥ ततो महात्मा यक्षेंद्रः प्रत्युवाचानुगामिनः। सर्वान्यक्ष
गणांस्तात शापस्यांतचिकीर्षया। शिखंडिनि हते यक्षाः स्वरूपं प्रतिपत्स्यते। स्थूणो यक्षो निरुद्वेगो भवत्विति महाम
नाः॥ इत्युक्त्वा भगवान्देवो यक्षराजः सुपूजितः। प्रययौ सहितः सर्वैर्निमिषांतरचारिभिः॥ स्थूणस्तु शापं संप्राप्य तत्रैव न्यवस
मये चागमत्तूर्णं शिखंडी तं क्षपाचरं॥ सोऽभिगम्याब्रवीद्वाक्यं प्राप्तोऽस्मि भगवन्निति। तमब्रवीत्ततः स्थूणः प्रीतोऽस्मीति पुनः पुनः॥
आर्जवेनागतं दृष्ट्वा राजपुत्रं शिखंडिनं। सर्वमेव यथावृत्तमाचचक्षे शिखंडिने॥ यक्ष उवाच॥ शप्तो वैश्रवणेनाहं त्वत्कृ ३०४
ते पार्थिवात्मज। गच्छेदानीं यथाकामं चर लोकान्यथासुखं। दिष्टमेतत्पुरा मन्ये न शक्यमतिवर्त्तितुं। गमनं तव चेतो हि पौलस्त्यस्य

पांडवैः सह शिखंड्यर्थे श्रद्धा चित्त्वया॥ नव तु द्वालात पांडवानां तन सह संबंधमानावात्। वरुप्यादंदूद पुष्करशेषरूपं॥

वरस्थितिं। एवमुक्तः शिखंडी तु स्थूणेनाथ च भारत। प्रत्याजगाम नगरं हर्षेण महतान्वितः॥ पूजयामास विविधैर्गंधमाल्यैर्म
हाधनैः॥ द्विजातीन्देवताश्चैव चैत्यानथ चतुष्पथान्। द्रुपदः सह पुत्रेण सिद्धार्थेन शिखंडिना। मुदं च परमां लेभे पा
दो चाल्यः सह बांधवैः॥ शिष्यार्थं प्रददौ चापि द्रोणाय कुरुपुंगव। शिखंडिनं महाराज पुत्रं स्त्रीपूर्विणं तथा॥ प्रतिपेदे
चतुष्पादं धनुर्वेदं नृपात्मजः। शिखंडी सह युष्माभिर्धृष्टद्युम्नश्च पार्षतः॥ मम त्वेतच्चरास्तात यथावत्प्रत्यवेदय
त। जडांधबधिराकारा ये युक्ता द्रुपदे मया॥ एवमेव महाराज स्त्रीपुमान्द्रुपदात्मजः॥ स संभूतः कुरुश्रेष्ठ शिखंडी रथ
सत्तमः॥ ज्येष्ठा काशिपतेः कन्या अंबा नामेति विश्रुता। द्रुपदस्य कुले जाता शिखंडी भरतर्षभ। नाहमेनं धनुष्पाणिं युयु
त्सुं समुपस्थितं। मुहूर्तमपि पश्येयं प्रहरेयं न चाप्युत। व्रतमेतन्मम सदा पृथिव्यामपि विश्रुतं॥ स्त्रियां स्त्रीपूर्वके चैव स्त्री
स्वरूपिणि। न मुंचेयमहं बाणानिति कौरवनंदन। न हन्यामहमेतेन कारणेन शिखंडिनं। एतत्तत्त्वमहं वेद जन्म
तात शिखंडिनः॥ ततो नैनं हनिष्यामि समरेष्वाततायिनं। यदि भीष्मः स्त्रियं हन्यात्संतः कुर्युर्विगर्हणं। नैनं तस्माद्धनि
ष्यामि दृष्ट्वापि समरे स्थितं॥ ॥वैशंपायन उवाच॥ एतच्छ्रुत्वा तु कौरव्यो राजा दुर्योधनस्तदा। मुहूर्तमिव स ध्यात्वा भी
ष्मे युक्तममन्यत॥ ॥इत्युद्योगे अंबोपाख्यानं समाप्तं॥ ॥संजय उवाच॥ प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव।

प्रागाह्निकमद्यःस्त्वनिनाकार्य्यं॥


स्थितं मध्ये सर्वस्य सैन्यस्य पितामहमपृच्छत। पांडवेयस्य गांगेय यदेतत्सैन्यमुद्यतं। प्रभूतनरनागाश्वं महारथसमा
कुलं। भीमार्जुनप्रभृतिभिर्महेष्वासैर्महाबलैः। लोकपालसमैर्गुप्तं धृष्टद्युम्नपुरोगमैः। अप्रधृष्यमनावार्य्यमुद्धूतमि
व सागरं। सेनासागरमक्षोभ्यमपि देवैर्महाहवे। केन कालेन गांगेय क्षपयेथा महाद्युते। आचार्यो वा महेष्वासः कृ
पो वा सुमहाबलः। कर्णो वा समरश्लाघी द्रौणिर्वा द्विजसत्तमः। दिव्यास्त्रविदुषः सर्वे भवंतो हि बले मम। एतदिच्छाम्य
हं ज्ञातुं परं कौतूहलं हि मे। हृदि नित्यं महाबाहो वक्तुमर्हसि तन्मम॥ ॥भीष्म उवाच॥ ॥अनुरूपं कुरुश्रेष्ठ त्वय्ये
तत्पृथिवीपते। बलाबलममित्राणां तेषां यदिह पृच्छसि। शृणु राजन्मम रणे या शक्तिः परमा भवेत्। अस्त्रवीर्यं रणे य
च्च उपयो भुजयोर्महाभुज। आर्जवेनैव युद्धेन योद्धव्य इतरो जनः। मायायुद्धेन मायावी इत्येतद्धर्मनिश्चितं। हन्यामहं महा
भागपांडवानामनीकिनीं। दिवसे दिवसे कृत्वा भागं प्रागाह्निकं मम। योधानां दशसाहस्रं कृत्वा भागं महाद्युते। सहस्रं
रथिनामेकमेष भागो मतो मम। अनेनाहं विधानेन संनद्धः सततोत्थितः। क्षपयेयं महत्सैन्यं कालेनानेन भारत॥ संजय उवाच॥ श्रुत्वा
भीष्मस्य तद्वाक्यं राजा दुर्योधनस्तदा। पर्यपृच्छत राजेंद्र द्रोणमंगिरसां वरं। आचार्य्य केनं पांडुपुत्रस्य सैनिकान्॥ ३०५
× कालेन ×

क्षपयितासि चाश्वनात्ममप्युदपसि॥
निहन्याइति तं द्रोणः प्रत्युवाच हसन्निव। स्थविरोस्मि महाबाहो मंदप्राणविचेष्टितः। शस्त्राग्निना निर्दहेयं पांडवानाम
नीकिनीं। यथा भीष्मः शांतनवो मासेनेति मतिर्मम। एषा मम परा शक्तिरेतन्मम परमं बलं। द्वाभ्यामेव तु मासाभ्यां
कृपः शारद्वतो ब्रवीत्। द्रौणिस्तु दशरात्रेण प्रतिजज्ञे बलक्षयं। कर्णस्तु पंचरात्रेण प्रतिजज्ञे महास्त्रवित्। तच्छ्रु
त्वा सूतपुत्रस्य वाक्यं सागरगासुतः। जहास सस्वनं हासं वाक्यं चेदमुवाच ह। न हि यावद्रणे पार्थं बाणशंखधनु
र्धरं। वासुदेवसमायुक्तं रथमायांतमाहवे। समागच्छसि राधेय तेनैवमभिमन्यसे। शक्यमेवं च भूयश्च त्व
या वक्तुं यथेष्टतः॥ ॥इत्युद्योगपर्वणि॥ ॥वैशंपायन उवाच॥ एतच्छ्रुत्वा तु कौंतेयः सर्वान्भ्रातॄनुप
ह्वरे। आहूय नरशार्दूल इदं वचनमब्रवीत्। धार्तराष्ट्रस्य सैन्येषु ये चारपुरुषा मम। ते प्रवृत्तिं प्रयच्छंति ममे
मां व्युषितां निशां। दुर्योधनः किलापृच्छदापगेयं महाव्रतं। केन कालेन पांडूनां हन्याः सैन्यमिति प्रभो। मासेनेति च ते
न प्रोक्तो धार्तराष्ट्रः सुदुर्मतिः। तावता चापि कालेन द्रोणोपि प्रतिजज्ञिवान्। गौतमो द्विगुणं संमदि। पंचविंशद्दिवसे
हं तु मासेन प्रतिजज्ञिवान्। तस्मादहमपीच्छामि श्रोतुमर्जुन तव वचः। कालेन कियता शत्रून्क्षपयेरिति फाल्गुन

वेदांतवेदाधिगमांतव्रतेस्नातास्त्वयात्वत्यस्नाताः कालेनानेनहि त्रिमासावधिनाच्चलनव्यात्यास्मज्ञाकालेदनन

उद्योग एवमुक्तो गुडाकेशः पार्थिवेन धनंजयः॥ वासुदेवं समीक्ष्येदं वचनं प्रत्यभाषत॥ सर्वएते महात्मानः कृतास्त्राश्चित्रयु
द्धयोधिनः सर्वे तावद्यत्रेस्नाताः सर्वएतेपराजिताः॥ अमेयं महाराज हस्तुरखबलं तव त्वाच्छ्रोपितं मनसा पापयाम
स्तं यद्वीप्सदेकेस्यामकरध्येनिवा वासुदेवसहायवान्॥ सामरानपिलोकांस्त्रीन् सर्वान्स्थावरजंगमान्॥ भूतंभव्यं
भविष्यंच निमेषादितिमेमतिः॥ यत्तद्घोरं पशुपतिः प्रादादस्त्रं महन्मम॥ कैराते द्वंद्वयुद्धेतत्तदिदंमयिवर्त्तते॥ यद्युगां
गांतेपशुपतिः सर्वभूतानि संहरन्॥ प्रयुक्ते पुरुषव्याघ्र तदिदं मयि वर्त्तते॥ तन्न जानातिगांगेयो नद्रोणो नचगौ
तमः॥ नद्रोणसुतो राजन्कुत एव तु सूतजः॥ नतु युक्तं रणे हंतुं दिव्यैरस्त्रैः पृथग्जनं॥ आर्जवेनैव युद्धेन वि
जेष्यामो रणे रिपून्॥ तथेमे पुरुषव्याघ्राः सहायास्तव पार्थिव॥ सर्वे दिव्यास्त्रविदुषः सर्वे युद्धाभिकांक्षिणः॥
वेदांतावभृथस्नाताः सर्वएतेपराजिताः॥ निहन्युः समरे सेनां देवानामपि पांडवाः॥ शिखंडी युयुधानश्च धृष्टद्युम्नश्च पार्षतः॥ भीमसेनो य
मौ चोभौ युधामन्यूत्तमौजसौ॥ विराटद्रुपदौ चोभौ भीष्मद्रोणसमौ युधि॥ शंखश्चैव महाबाहुर्हैडिंबश्च महाबल
ः॥ पुत्रोस्यांजनपर्वा च महाबलपराक्रमः॥ शैनेयश्च महाबाहुः सहायो रणकोविदः॥ अभिमन्युश्च बलवान्द्रौ ३०६
पद्याः पंच चात्मजाः॥ स्वयं वापि समर्थोसि त्रिलोकोत्सादने त्वपि॥ स्यामपिसितव्यात्नव्यांवतिनात्तुपपन्न॥ ॥

आज्ञाव्यस्तात्वा अहिनलक्रणाधृतराष्ट्रविज्ञा॥

क्रोधाद्यं पुरुषं पश्येस्त्वं शक्रसमद्युते॥ सद्य एव न भवेत्स इति त्वां वेद्मि कौरव॥ ॥ महाभारते उद्योगपर्वणि॥ ॥ वै
शंपायन उवाच॥ ॥ ततः प्रभाते विमले धार्त्तराष्ट्रेण चोदिताः॥ दुर्योधनेन राजानः प्रययुः पांडवान्प्रति॥ आप्लाव्य शु
चयः सर्वे स्रग्विणः शुक्लवाससः॥ गृहीतशस्त्रा ध्वजिनः स्वस्ति वाच्य हुताग्नयः॥ सर्वे ब्रह्मविदः शूराः सर्वे सुचरितव्रता
ः॥ सर्वे कामकृतश्चैव सर्वे चाहवलक्षणाः॥ आहवेषु परान्लोकान्जिगीषंतो महाबलाः॥ एकाग्रमनसः सर्वे श्रद्दधानाः प
रस्परं॥ विंदानुविंदावावंत्यौ केकया बाह्लिकैः सह॥ प्रययुः सर्वएवैते भारद्वाजपुरोगमाः॥ अश्वत्थामा शांतनवः सैंधवो
थ जयद्रथः॥ दाक्षिणात्याः प्रतीच्याश्च पार्वतीयाश्च येनृपाः॥ गांधारराजः शकुनिः प्राच्योदीच्याश्च सर्वशः॥ शकाः किराता
यवनाः शिबयोथ वसातयः॥ स्वैः स्वैरनीकैः सहिताः परिवार्य महारथं॥ एते महारथाः सर्वे द्वितीये निर्ययुर्बले॥ कृतवर्मा
महानीकस्त्रिगर्त्ताश्च महारथाः॥ दुर्योधनश्च नृपतिर्भ्रातृभिः परिवारितः॥ शलो भूरिश्रवाः शल्यः कौशल्योथ बृहद्बलः॥ एते
पश्चादनुगता धार्त्तराष्ट्रपुरोगमाः॥ ते समेन पथा यात्वा योत्स्यमाना महाबलाः॥ कुरुक्षेत्रस्य पश्चार्द्धे व्यवतिष्ठंत दंशिताः
॥ दुर्योधनस्तु शिबिरं कारयामास भारत॥ यथैव हास्तिनपुरं द्वितीयं समलंकृतं॥ न विशेषं विजानंति पुरस्य शिबिरस्य वा॥
कुशला अपि राजेंद्र नरा नगरवासिनः॥ तादृशान्येव दुर्गाणि राज्ञामपि महीपते॥ कारयामास कौरव्यः शतशोथ

दाराचारस्त्रियः॥

महस्रशः॥ तेषां दुर्योधनो राजा मध्ये सैन्यानां महात्मनां॥ पंचयोजनमुत्सृज्य मंडलं तद्रणाजिरं॥ सेनानिवेशं तेजस्वी राजन्नावि
उद्योग मुक्तसंभ्रमः॥ तत्र ते पृथिवीपाला यथोत्साहं यथाबलं॥ विविशुः शिबिराण्यत्र द्रव्यवंति सहस्रशः॥ तेषां दुर्योध
नो राजा मध्ये सैन्यानां महात्मनां॥ व्यादिदेश सवाह्यानां भक्ष्यभोज्यमनुत्तमं॥ सनागाश्वमनुष्याणां ये च शिल्पोपजी
विनः॥ ये चान्येनुगतास्तत्र सूतमागधवंदिनः॥ वणिजो गणिका दारा ये चैव प्रेक्षकाजनाः॥ सर्वांस्तान्कौरवो राजा विधि
वत्प्रत्यपूजयत्॥ ॥इति महाभारते उद्योगपर्वणि॥ ॥वैशंपायन उवाच॥ ॥तथैव राजा कौंतेयो धर्मपुत्रो
युधिष्ठिरः॥ धृष्टद्युम्नमुखान्वीरांश्चोदयामास भारत॥ चेदिकाशिकरूषाणां नेतारं दृढविक्रमं॥ सेनापतिममित्रघ्नं धृ
ष्टकेतुमथादिशत्॥ विराटं द्रुपदं चैव युयुधानं शिखंडिनं॥ पांचाल्यौ च महेष्वासौ युधामन्यूत्तमौजसौ॥ ते शूराश्चित्र
वर्म्माणस्तप्तकुंडलधारिणः॥ आज्यावसिक्ता ज्वलिता धिष्ण्येष्विव हुताशनाः॥ अशोभंत महेष्वासा ग्रहाश्चित्रा यथा दिवः प्र
ज्वलिता इव॥ अथ सैन्यं यथायोगं पूजयित्वा नरर्षभः॥ दिदेश तान्यनीकानि प्रयाणाय महीपतिः॥ तेषां युधिष्ठिरो राजा
सैन्यानां महात्मनां॥ व्यादिदेश सवाह्यानां भक्ष्यभोज्यमनुत्तमं॥ सगजाश्वमनुष्याणां ये च शिल्पोपजीविनः॥ अभिम उ०
न्युं बृहंतं च द्रौपदेयांश्च सर्वशः॥ धृष्टद्युम्नमुखानेतानभ्यादिशत पांडुनंदनः॥ भीमं च युयुधानं च पांडवं च धनंजयं॥ ३०१

स्कंधं समूहं भांडं उपकरणं॥ बुद्धिनिःसर्वं बुद्धेर्विषयं प्रतिसर्वं। द्रौपदेयानित्यादिना याजयत् क्रियाव्ययः॥

द्वितीयं प्रेषयामास बलस्कंधं युधिष्ठिरः॥ भांडं समारोपयतां चरतां संप्रधावतां॥ हृष्टानां तत्र योधानां शब्दो दिवमिवा
स्पृशत्॥ स्वयमेव ततः पश्चाद्विराटद्रुपदान्वितः॥ अथापरैर्महीपालैः सह प्रायान्महीपतिः॥ भीमधन्वायनी सेना धृ
ष्टद्युम्नेन पालिता॥ गंगेव पूर्णा स्तिमिता स्यंदमाना व्यदृश्यत॥ ततः पुनरनीकानि व्ययोजयत बुद्धिमान्॥ मोहयन्धृ
तराष्ट्रपुत्राणां बुद्धिनिःसर्वं। द्रौपदेयानभिमन्युं च पांडवः॥ नकुलं सहदेवं च सर्वांश्चैव प्रभद्रकान्॥
दश चाश्वसहस्राणि द्वे तिनो॥ अयुतं च पदातीनां रथाः पंचशतास्तथा॥ भीमसेनं च दुर्धर्षं प्रथमं प्रादिशद्बलं॥ मध्यमे
च विराटं च जयत्सेनं च पांडवः॥ महारथौ च पांचाल्यौ युधामन्यूत्तमौजसौ॥ वीर्यवंतौ महात्मानौ गदाकार्मुकधारि
णौ॥ अन्वयातां तदा मध्ये वासुदेवधनंजयौ॥ बभूवुरतिसंरब्धाः कृतप्रहरणा नराः॥ तेषां विंशतिसाहस्राः ध्वजाः शू
रैरधिष्ठिताः॥ पंच नागसहस्राणि रथवंशाश्च सर्वशः॥ पदातयश्च ये शूराः कार्मुकासिगदाधराः॥ सहस्रशो न्वयुः प
श्चादग्रतश्च सहस्रशः॥ युधिष्ठिरो यत्र सैन्ये स्वयमेव बलार्णवे॥ तत्र ते पृथिवीपाला भूयिष्ठं पर्यवस्थिताः॥ तत्र ना
गसहस्राणि हयानामयुतानि च॥ तथा रथसहस्राणि पदातीनां च भारत॥ चेकितानः स्वसैन्येन महता पार्थिवर्षभ॥

गणशो वारयन्तीत्यन्वयः॥ ॥विद्भाषामसर्वज्ञश्रीनारायणनिर्मितः॥ भारतार्थप्रकाशोयमुद्योगार्थप्रकाशकः॥ ॥

उद्योग धृष्टकेतुश्च वेदीनां प्रणेता पार्थिवात्ययौ॥ सात्यकिश्च महेष्वासो वृष्णीनां प्रवरो रथः॥ वृतःशतसहस्रेण रथानां प्रण
दन्बली॥ क्षत्रदेवब्रह्मदेवौ रथस्थौ पुरुषर्षभौ॥ जघनं पालयंतौ च पृष्ठतोनुप्रजग्मतुः॥ तदत्राज्यं च यत्किंचिद्या
नंयुग्यं च सर्वशः॥ तत्र नागसहस्राणि हयानामयुतानि च॥ फल्गु सर्वं कलत्रं च यत्किंचित्कृशदुर्बलं॥ कोषसंचय
वाहांश्च कोशागारं तथैव च॥ गजानीकेन संगृह्य शनैः प्रायाद्युधिष्ठिरः॥ तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः॥ श्रे
णीमान्वसुदानश्च पुत्रः काश्यस्य वा विभुः॥ रथा विंशतिसाहस्रा ये तेषामनुयायिनः॥ हयानां नवकोट्यश्च महतां किं
किणीकिनां॥ गजा विंशतिसाहस्रा ईषादंताः प्रहारिणः॥ कुलीना भिन्नकरटा मेघा इव विसर्पिणः॥ षष्टिनागसह
स्राणि दशान्यानि च भारत॥ युधिष्ठिरस्य यान्यासन्युधि सेना महात्मनः॥ क्षरंत इव जीमूताः प्रभिन्नकरटामुखाः॥ रा
जानमन्वयुः पश्चाच्चलंत इव पर्वताः॥ एवं समनुबद्धेमं कुंतीपुत्रस्य धीमतः॥ यदाश्रित्याभियुयुधे धार्तराष्ट्रं सुयोधनं॥
नतान्यगणशः पश्चात्सहस्रायुतशो नराः॥ नदंतः प्रययुस्तेषामनीकानि सहस्रशः॥ तत्रान्तरसहस्राणि शंखानाम
युतानि च॥ न्यवादयन्त संहृष्टाः सहस्रायुतशो नराः॥ ॥इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामु ३०८
द्योगपर्व समाप्तमिति॥ ॥श्रीरामायनमः॥ ॥ ॥इदमुद्योगपर्व समाप्तं॥ ॥श्रीरस्तु॥ ॥

अत्र पर्वण्यभीवृत्तांताः॥ ॥राज्ञोऽन्तप्रस्थापने मंत्रः॥ पुरोहितयानं॥ शल्यवरप्रदानं॥ इंद्रविजयः॥ संजययानं॥ प्रजा
गरं॥ विदुरवाक्यानि॥ सनत्सुजातीयं॥ यानसंधिः॥ भगवद्यानं॥ दंभोद्भवाख्यानं॥ मातलिवरान्वेषणं॥ गालवचरितं॥ वि
श्वरूपदर्शनं॥ विदुलापुत्रानुशासनं॥ कर्णोपनिवादः॥ कर्णकुंतीसमागमः॥ अभिनिर्याणं॥ उलूकयानं॥ रथा
तिरथसंख्या॥ अंबोपाख्यानं चेति॥ ॥अतः परं भीष्मपर्व भविष्यति॥ ॥यस्यायं प्रतिसंधिः॥ ॥[illegible]नमेव
संवत् ७७ वर्षे शाके १५८२ प्रवर्त्तमाने सम्मूडौडीड ज्ञातीयं परीक्षक श्री नाथजी तस्यात्मज
परीक्षक श्री पनदान तस्यात्मज परीक्षक श्री पमोदेदासेन व्यासतीर्थ निवासी अग्निहोत्री
विष्णुजी तस्यात्मजो अग्निहोत्री शारंगधर तस्यात्मजाय पठनार्थ पाणिनिकायमदईश्वा
राय महाभारतस्य उद्योगपर्व पौर्वात दत्तौ अथोदयपर्वणि ब्रह्मार्पण बुध्यस प्रत्तं॥

उद्योगपर्व
३०८

३०८